नं: ८-घ-ज

काशिकावृत्तिटीका

पदमञ्जरी पत्राणि ११५

११५

नं० ४-च-ज
काशिका वृत्ति टीका
पदमञ्जरी
सप्तमोध्यायः
पत्राणि ११५

पु० ४

Z

श्रीगणेशाय नमः॥ ॥सर्वस्य द्वे॥ ॥नित्यवीप्सयोरित्येवमादीनां विधेयकार्याणां निर्देशेन साकांक्षत्वात्स्वरितत्वाच्चाधिकारोऽयं तत्राह सर्वस्येति
१ चेति। सर्वस्येत्युक्ते यत्प्रतीयते द्वे इति चेत्युक्ते यत्प्रतीयते एतदर्थस्वरूपमित्यर्थः। पचपचि द्वित्वरूपमिति न वचनात् उभयोरपि स्वरूपग्रहणे प्रयुक्ते न तथापि ना
म्रेडितस्य सम्भवानुशासनिस्य मात्रेडितेऽशनीति द्विरुक्ते खट्वाङ्गस्य तत्रासंगीकृतस्य कार्यविधानात्तदभावः। न हि द्वयोरन्यतरस्य वा स्वरूपग्रहणे द्विरुक्ते ष
ष्ठ्यसंभवः। तथा तस्य परमाम्रेडितमिति पूर्वस्य परमाम्रेडितानुपपन्नं स्यात्तस्मादर्थग्रहणं। सर्वशब्दश्चायं त्रयप्रकारावयवकार्त्स्न्ये वृत्तिः। द्रव्यकार्त्स्न्ये य
था सर्वं ददातीति। यच्च यावच्च वस्तु तत्सर्वं ददातीति गम्यते। प्रकारकार्त्स्न्ये यथा। सर्वान्नीनो भिक्षुरिति। सर्वप्रकारमन्नं भक्षयतीति गम्यते। अवयवका
र्त्स्न्ये यथा। सर्वः पटो दग्ध इति सर्वावयवः पटो दग्ध इति गम्यते। इह तु पर्यादीनां विशिष्टानां शब्दानामुपादानात् द्रव्यप्रकारकार्त्स्न्ययोरसंभवः। यत्रापि
किंचिन्नोपादीयते नित्यवीप्सयोरित्यत्रापि विशेषानुपादानादेव सर्वस्य शब्दस्य सिद्धं तस्मादवयवकार्त्स्न्यमत्र निर्दिश्यते। परेः सर्वस्य द्वे भवतः न क

सर्वस्य द्वे॥ ॥सर्वस्येति च द्वे इति चैतदधिकृतं वेदितव्यं। इत उत्तरं यद्वक्ष्यामः प्राक्पदस्येत्यतः सर्वस्य द्वे ⁝
इति तमेव स्यात् इति नित्यवीप्सयोरिति। न हि सर्वस्य स्थाने द्वे भवतः के द्वे भवतः ये शब्दतश्चार्थतश्चोभयथान्तरतमे

श्चिद्वचनो द्विर्वचनेन न वर्ज्यत इत्यर्थः। अत्र त्रयवर्गदर्शनं सम्प्रसारणमेव वर्तत इति द्वे इत्यस्य संख्येयापेक्षायां शब्दानुशासनप्रस्तावाच्छब्दरूपे सं
ख्येये षष्ठी स्थानेयोगेति वचनात् सर्वस्येति स्थानषष्ठी सर्वस्य पर्यादेः स्थाने द्वे शब्दरूपे भवत इत्यर्थः। यथा स्तेम्रेडितेति तदा स्थाने द्विर्वचनमित्ययं प
क्षो भवति। शब्दसंबंधिनित्यत्वात्तारणोः संख्येयस्य स्थानादेशभावो न संभवतीति निवृत्तिधर्मा हि स्थानी शब्दश्चेत् निवृत्तः कस्योच्चारणं स्यात्ततो माहतोच्चा
रणात् सर्वस्येति शब्दापेक्षणात् कर्तृकर्मणोः कृतीति सर्वस्येति कर्मणि षष्ठी सर्वस्य पर्यादेर्द्वे उच्चारणे भवतः सर्वः पर्यादिर्द्विरुच्चारणीय इत्यर्थः तत्र
द्विः प्रयोगो द्विर्वचनमित्येष पक्षो भवति। तत्र प्रथमं पक्षं दर्शयति सर्वस्य स्थाने द्वे भवत इति। के द्वे इति। विशेषानुपादानादाद्ये चेच्चेन द्वे प्राप्नुत इति प्रश्नः
। इत एव अन्तरतमपरिभाषामाश्रित्याह शब्दतश्चेति। विभीतकादिवाचिनामक्षादिशब्दानां शब्दत एवान्तर्यं न रूपादेः पादीनामर्थतः एवं द्वयोस्तु पचति
शब्दोरुभयथान्तर्यं तत्र यथोरुभयथान्तर्यं तत्त एव यथा स्यात्तामिति उभयग्रहणं। तत एवोभयथान्तरतमे दर्शयति॥ ॥छ॥ ॥छ॥ ॥छ॥ श्म०
१

एकस्येति। ननु वा हि त्रिंशत्क्षेण ताण्णाशक्कृत्वा कुम्भ्वतिद्वतिं मेधुकृ गोयुक्क शाड्प्राट् शाड्प्राट् उपानदुपानद् गीर्गीरित्यत्र नलोपकुत्वढत्वघत्व
षत्वधत्वदीर्घत्वानामसिद्धत्वात्कृतेष्वेव तेषु द्विर्वचने कृते पदस्य स्थाने समुदायस्यादिष्टत्वात्तस्यैव स्थानिवद्भावेन पदत्वं नावयवयोरिति सर्वत्रासा
गे नलोपादीनि न स्युः उत्तरत्र तु समुदायपदत्वेनापि सिध्यन्ति। ननु च नलोपादीन्यन्तरङ्गाणि पदत्वमात्रापेक्षत्वाद्द्विर्वचनं तु बहिरङ्गं वीप्साद्यर्था
पेक्षत्वात्तत्पूर्वं तेषु कृतेषु द्विर्वचनं भविष्यति एवमपि कृतानामपि तेषां द्विर्वचने कर्त्तव्ये असिद्धत्वान्नकाराद्युक्तस्य द्विर्वचने अभ्यासे हका
रस्यैव श्रवणं भवति। नैष दोषः। वक्ष्यते न सर्वत्रापि द्वयमद्विर्वचन इति तत्र अन्तरङ्गत्वान्नलोपादिप्रकृतेषु तद्युक्तस्यैव द्विर्वचनं भ
विष्यति। यानि तर्हि पदकार्याणि नाकृते द्विर्वचने प्राप्नुवन्ति तानि न स्युः। तद्यथा किंकिमिति चापदान्तस्येति परसवर्णविकल्पः अपचन्नपच
न्निति ङमुट् अग्ना अग्नाविति वलोपः छायाच्छायेति तुग्विकल्पः वृक्षान्वृक्षानिति पदान्तस्येति णत्वप्रतिषेधः अनेजेरिति एङः पदान्तादतीति
पूर्वरूपत्वं। किं चात्र स्वरितो वानुदात्ते पदादाविति स्वरविधिर्न स्यात् उत्तरभागपदत्वात्। तथा पदान्तलाक्षणिकानि कार्याणि प्राप्नुवन्ति। तद्य

एकस्य पचतिशब्दस्य द्वौ पचतिशब्दौ भवतः पचति २ ग्रामो २ रमणीयः १ ॥ ॥ ४॥

था अगे नागे नेत्यतो गुणो पररूपत्वं स्यात्। पपः पय इति सोपदादाविति सत्वप्रसङ्गश्चेत्यादिकं। अतो द्वयोरपि पृथक्पदत्वमेषितव्यं। तदुच्यते।
पदिप्रसक्तमिति अवयवभेदेन रूप एवादेशः स्याद्द्वे इति द्विर्वचनमनुपपन्नं स्यात्। तत्र तो द्वे इति वचनादेकस्य पदस्य स्थाने द्वे पदे समुदिते युगपदादेशत्वेन
विधीयेते तत्र स्थानिवद्भावेन समुदायस्यापि पदत्वं स्वत एव चावयवयोरपीति समुदायस्यावयवयोश्च पदकार्याणि भविष्यन्ति। एवमपि विसमुसलं मु
सलमित्यादावादेशप्रत्यययोरिति षत्वप्रसङ्गः। नैष दोषः। नैवं विज्ञायते आदेशस्य सकार इति कथं तर्ह्यादेशो यः सकार इति अत्र च समुदायस्य समु
दाय आदेशो न सकारमात्रस्य सकारमात्रमिति न भविष्यति। इह तर्हि त्वमित्रमपिपिरीति समुदायस्य पदत्वाद्रेफनकारयोः समानपदस्थत्वाद्रषाभ्यां
मिति णत्वप्रसङ्गः। एषोऽप्यदोषः। तत्र समानग्रहणं न कर्त्तव्यं पद इत्येवास्तु तदाय दृश्यते निमित्तनिमित्तिनोरसंभवादेकत्वविवक्षार्थमेव पद
ग्रहणमिति समानपदस्थत्वं सिध्यति तत्र च समानपदग्रहणे यत्र समानपदस्थत्वमेव तत्र णत्वं। इह तु स्थानिवद्भावादेकपदत्वं वस्तुतस्तु
पदद्वयात्मक आदेश इति पृथक्पदस्थत्वमिति णत्वाभावः। तदेवं निर्दोषः स्थाने द्विर्वचनपक्षः १

द्र.का.प.१

२

इदानीं द्वितीयं पक्षं दर्शयति पदशब्दस्येति । द्विरावर्त्तत इति उच्चार्यमाणस्य शब्दस्य यो व्यापारः उच्चारणं नाम स एवावृत्तिर्विवक्षिता द्विरुच्चरतीत्यर्थः । द्वे आ-
वृत्ती भवत इति । द्वे उच्चारणे क्रियेते भवत इत्यर्थः । न पुनर्मुख्ये एवावृत्ती द्वे भवतः । तथा सति त्रिर्वचनप्रसंगात् । ननु चास्मिन्पक्षे आमुपवसि पचसि देव-
दत्ता इत्यत्रावृत्तिभेदनिबंधनया द्वित्वसंख्यया स्वाश्रयस्यैकत्वस्य निवर्त्तनादेकान्तरताया अभावाद्दामय एकान्तरमिति निघातप्रतिषेधो न स्याद्य-
था किरिणौ साराववावृत्तिभेदनिबंधनेनापि पक्षत्वेन स्वाश्रयस्यैकाच्त्वस्य निवर्त्तनात्सा वेकाच इति विभक्त्याद्युदात्तत्वं न भवतीति चेत् । स्थाने द्वि-
र्वचने तु समुदायस्यापि स्थानिवद्भावेन पदत्वात्सिध्यति । तथा यौनः पुन्यमिति पुनः पुनर्भवति रिवर्त्तमानात्पुनः पुनः शब्दाद्द्वावेव्याजिष्यते पुनः पु-
नर्भवः यौनः पुनिक इति चकाल्लाद्वुञ् । नत्र द्विः प्रयोगे यदस्य विज्ञायमानेन समुदायस्य वीप्सालक्षणेनार्थेन सत्यप्यर्थवत्त्वे ऽर्थवत्समुदायानां समा-
सग्रहणं नियमार्थमित्यप्रातिपदिकत्वात्तद्धितो न स्यात् । सुबन्तात्तु सत्यपि पक्षे पि समुदायस्यासुबन्तत्वान्न स्यादेव । पक्षान्तरे तु स्थानिवद्भावादुभय-

॥ पदानुद्विः प्रयोगो द्विर्वचनं तदा मस एवपचति शुद्धो द्विरावर्त्तते· तस्य द्वे आवृत्ती भवतः । सर्वस्येति किं विस्पष्टार्थं २

थापस्तीति सिध्यति । यद्यप्यस्य स्थानी सुबन्तं तथापि सुब्लुकि कृते न ङिसंबुद्ध्योरिति निषेधाज्ज्ञापकात्प्रत्ययलक्षणेनाप्रत्यय इति निषेधाभावा-
त्प्रातिपदिकत्वमव्याहतमिति । अत्रैवं भाष्ये परिहार उक्तः । स्वचासि पचसीत्यर्थरूपयोः समानत्वात्स एव च शब्दः । स एव च तिङ् । ततश्चायं प्र-
र्वस्माद्विहितः स परस्मादपि पश्च परस्मात्स पूर्वस्मादपि । तदा द्विग्रहणं च पदं ज्ञायामनुवर्त्तते । तत्र समुदायस्यावयवयोश्च तुल्येऽपि तिङन्तत्वे स-
मुदायस्यैव पदसंज्ञा भविष्यति द्विर्वचनवत् । तद्यथा स्वयाचेत्यत्र समुदायस्यावयवानां च तुल्येऽप्येकाच्त्वे समुदायस्यैव द्विर्वचनं भवति नावयवा-
नां तत्कस्य हेतोः शास्त्रहानेः अवयवद्विर्वचने ह्यवयवान्तरे विषये समुदायविषये च शास्त्रं हीनं स्यात् । तद्वत्पदसंज्ञापि समुदायस्यैव भविष्यतीत्ये-
कान्तरता युज्यते । यौनः पुन्यमित्यादौ तद्धितोऽप्युक्तेन न्यायेन समुदायस्य सुबन्तत्वात्प्रातिपदिकत्वाच्च सिध्यतीति ॥ ॥छ॥ ॥छ॥ ॥ राम०

॥श्रीः॥ ॥श्रीः॥ ॥ २

न्मेत्रे वंचोदयंति। प्रागिव द्विर्वचनात्पचतीत्यस्यामवस्थायां प्रवृत्तापरसंज्ञा किमिति पुनः कृतेपि द्विर्वचने प्रवर्त्तते। प्रवर्त्तमाना वा किमिति समु
दायस्यैव प्रवर्त्तते न तु प्रत्येकमवयवयोः। न ह्येवं विधो द्विर्वचनस्यापस्य विषय इति। संयोगसंज्ञायामुक्तं निर्ग्लेयादित्यादौ त्रिष्वपि द्वयोः संयोगसंज्ञा
भ्युपगमात्। किंच यत्र समुदायस्यैव परत्वमपचन्त्र यवन्नित्यादौ तत्रावयवेषु पदकार्याभावप्रसंग इति। अपर आह। उच्चारणक्रियैवात्र परशब्दाभिध
तेन दृष्टत्वोपचारिकः परभेदः तत्र तस्यैकमेव परमित्येकांतरत्वमुच्यते। योनः पुमामित्यादौ च वीप्सालक्षणो नार्थेन समुदायस्याप्यर्थवत्वा
त्प्रातिपदिकत्वं। न च समासग्रहणान्निवृत्तिः। अतुल्यजातीयत्वात्। ये को हि भिन्नार्थानां सतां परस्परं संबंधपात्रमधिकं तत्समुदायस्यैव तुल्यजा
तीयस्यैतेन निवृत्तिः। न चात्रैतदुभयमस्ति। न हि द्वयोः पुनः शब्दयोरर्थोऽभिधीयते नापि तत्समुदायेन तत्संबंधोऽधिकः किंतर्हि वीप्सा। स्यो न्य एवेति। यद्ये
वं किरिणौ संतौ समावेकादशतीयादीति विभक्तिस्वरः स्यात् तत्रापि धुच्चारणक्रियैवाभिधीयते न त्वतस्त्वेकस्यैवैकारः। किंच नित्यानां विभिन्नानां वर्णा
नांतरात्मकानां च पदानां पदानां स्वरूपेणाव्यवधानमव्यवधानं च न संभवतीत्युपलब्धिगतमेव तदाश्रयितव्यं तत्र च यथा पदभेदेष्वप्युपलब्धिभे
दः तथात्रापि भेदेपीति कथमेकांतरता। यद्विच योनः पुमामित्यादावुक्तेन न्यायेन समुदायस्यापि प्रातिपदिकत्वं हंतैवं ग्रामो ग्रामो रमणीय इत्या
दावप्येवमेव प्रातिपदिकत्वे सति सुब्लुक् स्यात्। तस्मात्स्थाने द्विर्वचनमेवात्र रोचयामहे। अत एव स्थाने द्विर्वचनं पूर्ववृत्तिकारेण दर्शितं यश्चा
संभवधात्रेणाद्विःप्रयोगोपि दर्शितः। इह सर्वस्येति वचनमलोंत्यनिहायर्थं वा स्यात्। स्वश्च अर्थप्रसिद्ध्यर्थं वा। तत्र स्थाने द्विर्वचनपक्षे तावच्छ
ब्दतोऽर्थतश्चांतरतमाभ्यां द्वाभ्यामादेशाभ्यां भाव्यं। ये चैवंप्रकारास्ते नियोगतोऽनेकाल्स्वभावा इत्यंतरेणापि सर्वग्रहणमनेकाल्शित्सर्वस्ये
त्येव सर्वस्य भविष्यति। षष्ठ्यर्थोपि परिवर्जन इत्यादौ यत्र षष्ठ्युच्चार्यते तत्र तावदस्ति द्वः। यत्रापि षष्ठी नास्ति नित्यवीप्सयोरिति तत्रापि स्थाम
र्थाल्लभ्यते नित्यवीप्सयोर्यः शब्दस्तस्य द्वे भवत इति। द्विःप्रयोगपक्षे त्वलोंत्यविधिप्रसंग एव नास्ति स्थानषष्ठ्यभावात्। षष्ठ्यर्थोपि लभ्यत एव
वोच्चारणस्य शब्दधर्मत्वादितीनार्थः सर्वग्रहणेनेत्यभिप्रायेणाह सर्वस्येति किमिति। विस्पष्टार्थमिति। एवं प्रतिपत्तुमसमर्थस्तं प्रतिपु
खप्रतिपत्तये सर्वस्येत्युच्यत इत्यर्थः २ ॥ श्रीराम॥ ॥

र का० प० १

३

अथेत्यादि। एवंमन्यतेसमासतद्धितवाक्यनिवृत्त्यर्थमवश्यंपदस्येतिवक्तव्यं। समासनिवृत्त्यर्थंतावत्सप्रयर्णोत्रापदंन्यत्रसमस्तंमन्यानिपर्णानि
वीप्स्यंते ननुतद्धान्त्यद्र इतिवीप्सायामेकत्वंस्यानंतर्भावात्प्रागेवविभक्तेर्द्विर्वचनप्रसंगः। पदाधिकारात्तुनभवति। तद्धिता। द्विपदिकांददाति अत्रद्वि
त्वसंख्यायुक्तः यादार्थोवीप्स्यतइतिस्त्रीत्वैकत्वलक्षणयोर्लिंगसंख्ययोरनंतर्भावात्प्राक्तद्धितोत्पत्तेः समासेकृतेप्राप्नंद्विर्वचनंपदत्वाभावा
न्नभवति। वाक्य। ग्रामेग्रामेपानीयमितिवाक्यस्यापदत्वाद्द्विर्वचनंनभवति। ग्रामेपानीयंग्रामेपानीयमिति। किंच। उत्तरत्रपदस्येतिनवक्तव्यंभवति।
पदस्यपदादिस्येवानुवृत्तेरिति नेवंशक्यमिति। अस्याप्यभिप्रायः। पदस्येत्युच्यमानेपिसप्तपर्णीभ्यामित्यादौत्वादिषुप्रवर्त्स्यपदत्वाद्द्विर्वचन

अथपदस्येत्येवकस्मान्नोच्यते· नेवंशक्यमिहहिनस्यात· प्रपचतिप्रपचतीति। इहद्रोग्धाद्रोग्धाइतिघत्वढत्वयो
रसिद्धत्वात्कृतयोरेवतयोर्द्विर्वचनंप्राप्नोति॥ ॥श्री४॥ ॥श्री४॥ ॥श्री३॥ ॥श्री४॥ ॥

प्रसंगः। तस्मादेवमत्रपरिहारोवाच्यः यद्वीप्सायुक्तंनादः प्रयुज्यतेकिंपुनस्तत्पर्वणिपर्वणिसप्तपर्णोन्यस्येतियत्तुप्रयुज्यतेनतद्वीप्सायुक्तं
सप्तपर्णीमस्येतिपर्णीशब्दइति। तद्धितेनुतेनैवोक्तत्वाद्द्विर्वचनाभावः। सहिवीप्सायामिष्यते। वाक्यस्यापिद्विर्वचनंनभवति। यदद्विर्वचने
नोक्तत्वाद्वीप्सायाः तस्मात्समासादिनिवृत्त्यर्थंतावत्पदाधिकारोनकर्त्तव्यइति। प्रस्तुतक्रियमाणेपदाधिकारेऽव्याप्तिलक्षणोदोषइत्याह इह
हिनस्यादिति। प्रपचतीति। धातूपसर्गसमुदायः क्रियाविशेषवाचीअतआदिव्यवस्थार्थंतुधातूपसर्गयोः पृथक्कल्पनंततश्चक्रियाधर्मोनि
त्यत्वंसमुदायस्येतितस्यैवद्विर्वचनं। इहेत्यादि। द्रुहेस्तृविधिहितेवाद्रुहेति घत्वढत्वेप्राप्नुतः द्विर्वचनंचघत्वढत्वयोरसिद्धत्वात्पूर्वंद्विर्वचनं
प्राप्नोति अस्तुकोदोषस्तत्राह ॥ एम० ३

तत्रेति। पश्चाद्विकल्पे प्रवर्त्तमाने यदा परत्र ढत्वं तदा पूर्वत्रापि ठत्वमेवेति नियमाभावात् घत्वमपि कदाचित्स्यात्। एवं घत्वेपि द्रष्टव्यं। परत्र ढत्वं पू
र्वत्र ठत्वमिति। शतं चैव कस्याकृतेश्च रितरः प्रयोगो न द्वितीयस्यास्त्वतीयस्याश्च भवतीति न्यायमनाश्रित्योक्तं द्रष्टव्यं। अथ च न्यायः कृत्वानु
प्रयुज्यते लिप सत्रैव व्याख्यातः। पूर्वत्रासिद्धीयमिति। पूर्वत्रासिद्धमित्यस्मिन्नधिकारे भवं नलोपादिकार्यं पूर्वत्रासिद्धीयं द्विर्वचनादन्यत्रासिद्धं भ
वति। अथवा पूर्वत्र पूर्वस्यां सपादसप्ताध्याय्यामसिद्धं नलोपादि पूर्वत्रासिद्धं तत्र भवमसिद्धत्वं पूर्वत्रासिद्धीयं तद्द्विर्वचने कर्त्तव्ये न भवति। तत
श्च नलेटत्वे गा प्रवृत्ते नेत शुलस्ये वृद्धिर्वचनमिति नास्ति दोषः। सर्वस्येत्येतदेवे स्यादि। पूर्वपूर्वत्रासिद्धीयमद्वित्व इति वचनाश्रयेण द्रोग्धा द्रोग्धेति साधि

तच पश्चाद्विकल्पे सत्यनिष्टमपि स्यात्. द्रोग्धा द्रोढा. द्रोढा द्रोग्धेति. तस्मादुक्तव्यमेतत्पूर्वत्रासिद्धीयमद्विर्वचन इति। सर्वस्ये
त्येतदेव वाकृतं सर्वकार्यप्रतिपत्त्यर्थं द्रष्टव्यं॥ ॥तस्य परमाम्रेडितं॥ ॥तस्य द्विरुक्तस्य यत्परं शब्दरूपं तदाम्रेडितसंज्ञं भ
वति. चौर चौर ३ वृषल वृषला ३ दस्यो दस्यो ३ घातयिष्यामि त्वा बंधयिष्यामि त्वा. आम्रेडितप्रदेशा आम्रेडितं भ
र्त्सने इत्येवमादयः ३ ॥श्रीराम॥ ॥

तं एतदानीं सर्वस्येत्यनेन साधितमित्येकस्मिन्साध्ये द्वयोर्द्वित्वोर्विकल्पः। कथं पुनः सर्वस्येत्यनेन कृतसर्वकार्यप्रतिपत्तिः। अर्शआद्यच्प्रत्ययान्तो
यं सर्वशब्दः सर्वकार्यं यस्मिन्नस्तीति तदिदं सर्वं तस्य द्वे भवतः। सर्वेषु कार्येषु कृतेषु द्विर्वचनमित्यर्थः॥ ॥तस्य परमाम्रेडितं॥ ॥तस्येत्यवय
वयोगे षष्ठी। परशब्दोवयववचनः॥ दिक्शब्दो न्नरपरे त्यत्र यद्यपि दिशि दृष्टः शब्दो दिक्शब्द इत्याश्रयणात् संप्रत्यदिक्शब्दत्वेपि पंचमी वि ९
हिता तथाप्यस्मादेव निर्देशात् परयव्यवा विभियोगे षष्ठी भवति। एवं च पूर्वकायस्येत्यादि सिद्धं भवति। उदाहरणे आम्रेडितं भर्त्सने इति सूत्रतः।
तस्य ग्रहणं विषयावधारणार्थं तस्येत तस्यानंतरस्य द्विरुक्तस्येति। तेन ह्याह्निके द्विर्वचने ऽयं संज्ञा न भवति। नन्वाम्रेडितशब्दो निघंटुषु प्र
सिद्धः आम्रेडितं द्विस्त्रिरुक्तमिति। सत्यमर्थे प्रसिद्धः इह तु शब्दे परिभाष्यते। महासंज्ञाकरणं पूर्वाचार्यानु

४ अनुदात्तं च॥ ॥यदमित्यनेन सामानाधिकरण्यमाम्रेडितस्य चाज्झलसमुदायरूपत्वादन्वर्थोऽनुदात्तशब्दः। अविद्यमानोदात्तमनुदात्तमिति। स्वरितेऽप्युदात्तस्याभावात्तस्यापि निवृत्तिः। एवमपि न ज्ञायते केन स्वरेणाम्रेडितं प्रयोक्तव्यमिति। उच्यते। उदात्तस्वरितौ तावत्प्रतिषिद्धौ न चास्वरकस्यास्य उच्चारणं संभवति तत्र पारिशेष्यादनुदात्तत्वमेव भविष्यति। यद्वाऽनुदात्ताक्तमनुदात्तं। आम्रेडितस्य अचोऽनुदात्ता भवन्तीत्यर्थः। भुङ्क्ते इति भुजो भवन इत्यात्मनेपदं। तत्र तास्यनुदात्तेदित्यनुदात्तत्वं। श्नमः प्रत्ययस्वरः तस्य श्नसोरल्लोप इत्यल्लोपे उदात्तनिवृत्तिस्वरेण भुङ्क्ते शब्दोऽन्तोदात्तः द्विर्वचनेन परस्यानुदात्तत्वं पशुशब्दः कुप्रत्ययान्तोऽन्तोदात्तः॥ ॥नित्यवीप्सयोः॥ ॥नित्ये चार्थे वीप्सायां च यद्वर्तते इत्यनेन सप्तमीयमर्थनिर्देशार्थेति दर्शयति। प्रयोक्तृधर्मभूता वीप्सा न तु ग्रामादिशब्दैरभिधीयते। पचति पचतीत्यत्रापि वस्तुतो यन्नित्यं न तन्नित्यं न तन्नित्यशब्देनाभिधीयते। नित्यत्वं तु द्विर्वचनद्योत्यं। तथ्यादयमत्रार्थः। नित्यत्वे द्योत्यत्वेन विषयभूते वीप्सायां च द्योत्यत्वेन विषयभूतायामिति। एवं च तत्र वृत्तिः शब्दस्य यदुक्तं तद्विषयता। यदि पुनरेषा षष्ठी स्यात् स्वरूपविधिः प्रसज्येत। ततश्च नित्यं क्रीडाजीविकयोः पादशतस्य संख्यादेर्वीप्सायामिति निर्देशो नोपपद्यते। यदि तु नित्यार्थविषयः शब्दो नित्यशब्देन वीप्सार्थविषयश्च वीप्सेति तदा षष्ठ्यामप्यदोषः। गौणत्वप्रसंगात्तदनाश्रितं। नित्यशब्दोऽयं सर्वकालव्यापिनोऽपत्याकाशादयो येषामुत्पत्तिविनाशौ प्रयोक्तुमिनोयिलभ्येते तेषु पिप्रयुज्यमानो दृश्यते नित्य आत्मा नित्य आकाशो नित्यो घोष इति। आभीक्ष्ण्ये पि नित्यप्रहसितो नित्यप्रजल्पित इति। तत्राविशेषादुभयोरपि ग्रहणादाकाशादिशब्दानामपि द्विर्वचनप्रसंग इति मन्यमानः पृच्छति। केषु नित्यतेति। अथवा नित्यशब्दस्य कूटस्थलक्षण एवमुख्योऽर्थः शब्दान्तरसंनिधानपेक्षणादाभीक्ष्ण्ये तु क्रियापरप्रयोगसमधिगम्यो गौणोऽर्थः अविच्छेदोपलक्षितसामान्यमाश्रित्य तत्र प्रयोगात्। ततश्च गौणमुख्ययोर्मुख्ये संप्रत्यय इति कूटस्थवाचिनामेव द्विर्वचनप्रसंग इति मन्यमान आह॥

॥अनुदात्तं च॥ ॥अनुदात्तं च तद्भवति यदाम्रेडितसंज्ञं। भुंक्ते २ पशून् २॥ ॥नित्यवीप्सयोः॥ ॥नित्ये चार्थे वीप्सायां च यद्वर्तते तस्य द्वे भवतः॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

केषु नित्यतेति । इतरोऽपि विदितताभिप्राय आह तिङ्क्षु इति । अविशेषमेव मन्यमानः पृच्छति । कुत इति । आभीक्ष्ण्यमिहेति । अयमभिप्रायः कु
त एतद्वचनग्रहणात् तिङ्न्तानि संगृहीतानि नतु । आभीक्ष्ण्यलक्षणे तु नित्यत्वे गृह्यमाणे तल्लक्षणं द्विर्वचनं तिङ्न्तानां वीप्सालक्षणं तु सुब
न्तानामित्युभयानुग्रहो भवति गौणोऽपि चार्थो लिङ्गदर्शनवशादिहाश्रीयते यथाशीतो ब्राह्मणो कारिणी पार्श्वेनान्विच्छतीत्यादौ । उभयवि
धेऽपि नित्यत्वे गृह्यमाणे तद्वाचिनां सुबन्तानां स्वार्थ एव द्विर्वचनं स्यात् । न चैवं लोके प्रयोगोऽस्ति आत्मा नेति घुक्ते वीप्सा प्रतीयते न तु स्वार्थः त
स्मादाभीक्ष्ण्यस्यैव ग्रहणमिति । भवत्वाभीक्ष्ण्यमिह नित्यता सा च न तिङ् स्वव्ययकृत्सु चेत्येतत् कुतस्त्यमित्यत आह आभीक्ष्ण्यं च क्रियाधर्म इति ।
पौनःपुन्यमात्रीयस्य तु पुनः करणं घटादिष्वपि संभवति तथापि क्रियाविषये व पुनः पुनः क्रियत इति प्रतीतिः तद्वचनात्स्य पुनः पुनराभी

॥ केषु नित्यता । तिङ्क्षु अव्ययकृत्सु च । कुत एतत् । आभीक्ष्ण्यमिह नित्यता । आभीक्ष्ण्यं च क्रियाधर्मः यां क्रियां
कर्त्ता प्राधान्येनानुपरमन् करोति तन्नित्यं । पचति २ जल्पति २ भुक्त्वा २ व्रजति । भोजं २ व्रजति । लुनीहि लुनीहीत्ये
वायं लुनाति । क्त्वाणमुलौ लोट् च द्विर्वचनापेक्षाणामेव पौनःपुन्यप्रकाशने शक्तिः ४ ॥ श्रीः ॥ ॥

क्ष्ण्यं तिसमित्यादयः शब्दाः यथा पुनः पुनरादयः शब्दाः क्रियाविषयास्त एव क्रियावति तिङ् स्वव्ययकृत्सु चाभिधीयते । पाचकादिषु
तु साधनं प्रधानं पाकादिषु मितु सिद्धता प्रधानं न क्रिया । कीदृशी पुनः सा क्रिया यस्या आभीक्ष्ण्यं धर्म इत्याह यां क्रियामिति । तन्नित्यमिति
। नित्यशब्दस्य नपुंसकलिङ्गत्वात् तत्र तच्छब्दस्यापि नपुंसकत्वं । यथा गौश्चेत्स कर्त्वेत्यत्र पुंस्त्वं । लुनीहि लुनीहीति । क्रियासमभिहारे लो
ट् । पचपचेति तिङ्न्तस्य दर्शितमुदाहरणं तथाव्ययस्य त्ववन्त्यमिति तु नहुपन्यासः । तद्दर्शयति क्त्वाणमुलौ लोट् श्चेति । समानकर्तृकयोरित्या
दिनार्थान्तरेऽपि क्त्वाणमुलौ विहितौ लोडपि विध्यादावर्थान्तरे विहित इति सामान्यशब्दत्वाद् द्विर्वचनापेक्षा एव पौनःपुन्यं प्रकाशयन्ति ४

१का॰प॰१

५

पङ्‌ तन्निषेधस्य इति। सहि क्रियासमभिहारं न व्यभिचरति। तत्किं तस्य तद्द्योतने द्विर्वचनापेक्षया। ननु यङन्तस्यापि कदाचिद्द्विर्वचनमिष्यते तत्कथमि
त्याह यदा त्विति। द्विविधो हि क्रियायाः समभिहारः पौनःपुन्यं भृशार्थश्च तत्र यदा द्विर्वचनं भवति तदा भृशार्थे यङ्‌। तस्यैव पौनःपुन्यं द्योतयितुं द्वि
र्वचनं तस्य यङन्तस्य द्योतितत्वादित्यर्थः। लुनीहि च सामान्यशब्दस्यापि क्रियासमभिहारशब्दस्य भृशार्थलक्षणे क्रियासमभिहारे वृत्तिर्विज्ञेया। पा
पच्यते पापच्यत इति। सकला अवयवक्रियाः स्वयमेव संपादयन् पुनः पुनः पचतीत्यर्थः। लोटि अपि भवति पापच्यस्व पापच्यस्वेत्येवायं पापच्य
त इति। अथ नित्यतायां द्विर्वचनमुच्यमानं धातुमात्रस्य कस्मान्न भवति स हि क्रियावचनः। उच्यते। परिगृहीतसाधना क्रिया व्यवहारोपयोगि
नी भवति। अव्यभिधानाच्च धातुमात्रस्य द्विर्वचनाभावः। पदाधिकारो वाश्रयणीयः। अनेनैवाभिप्रायेण पूर्वमुक्तं प्रथमपदस्यैवेत्युक्त्वा अत

पङ्‌· तन्निषेधः प्रकाशयति पुनः २ पचति पापच्यत इति· यदा तु तत्र द्विर्वचनं तदा क्रियासमभिहारे यौनः पुन्यं द्‌ एवं
पापच्यते पापच्यत इति· अथ केषु वीप्सा· स्फुवीप्सा का पुनः सा· व्याप्तिविशेषविषया प्रयोक्तुरिच्छा वीप्सा॰ ॥ ३ ॥

इति। अस्मिन्पक्षे समतिकस्य द्विर्वचनेन क्रमभेदस्तदभिव्यक्तौ समर्थत्वात्। एवं वि॰। एतेनैतदपि निरस्तं भृशार्थे सावकाशो यङ् यौनःपुन्ये परेण
द्विर्वचनेन बाध्यत इति। कथमिदं निरस्तं पदस्य द्विर्वचनं धातोर्यङ्। तत्रान्तरङ्गस्य न युक्तो बाध इति। व्याख्यातं नित्यं। वीप्सां व्याख्यातुं स्वान्विषयं ता
वत्पृच्छति अथेति। स्फुवीप्सेति। सुपामेव तदभिव्यक्तौ समर्थत्वात्। एवं विषयमुक्त्वा स्वरूपं पृच्छति का पुनरिति। यदि सामान्येन व्याप्तुमिच्छा वीप्सा
तदा चिकीर्षतीत्यादेर्द्विर्वचनप्रसंगः। करोत्यादिक्रियाभिः कटादीनां व्याप्तुमिच्छात्मकत्वात्। इतरेतरयोगमात्रे वीप्सा शब्द इति अभिप्रायेण व्याप्तिवि
शेषविषयेति। प्रयोक्तुरित्यनेन नाभिधेया वीप्सा गृह्यते वीप्सा याचिनी हि भवत इति किं तर्हि प्रयोक्तुर्धर्मः ग्रामो ग्रामो वा रमणीय इति प्रयुक्ते प्रियस्य वीप्साम राम॰
नाद्रिनाथीति नो वाक्यं प्रयुंक्त इति प्रतीयते तेन चिकीर्षतीत्यादेर्द्विर्वचनं न भवतीति दर्शयति। व्याप्तिविशेषविषयेत्युक्तं स तु विशेषो नाद्याप्यभिहित इ ५
ति पुनः पृच्छति॥ ॥ श्री॰॥ ॥

काप्युनरस्याविति। नानावाचिनामित्यादिपूर्ववृत्तिस्थपठितवीप्सालक्षणं तद्व्याचष्टे। नानाभूतार्थवाचिनामितीति। तत्र नानावाचिनामिति वच
नान्नातिवाचिनां द्विर्वचनं न भवति ब्राह्मणो नहं जङ्घः संपन्नो ब्रीहिरिति। न हि जातिशब्दा नानाभूतार्थवाचिनो जातेरेकत्वात्। युगपदुच्चारणात्क
मपि वक्तायां द्विर्वचनाभावः यथास्मिन्वने एषं वृक्षः शोभनोऽयं वृक्षः शोभन इति क्रमेण शोभनत्वप्रतिपादने बहूनामपि शब्दानां प्रयोगो भवति
न चैकशेषेऽपि न भवति अस्मिन्वने वृक्षाः शोभना इति। नानावाचित्वाभावात्। पृथगर्थपर्यवसायित्वं हि नानावाचित्वं न चैकशेषे तदस्ति अत ए
व तत्र न प्रत्येकं विधेयसंबंधो नियमेन प्रतीयते नहि ब्राह्मणेभ्यः शतं देयमित्युक्ते नियमेन प्रत्येकं शतं देयं भवति। ब्राह्मणाय ब्राह्मणाय शतं देयमि
त्युक्ते प्रत्येकं शतं दीयते तत्कस्य हेतोः पृथगर्थपर्यवसायितया पृथग्देयस्य संबंधात्। यद्यपि च पृथगर्थपर्यवसायिता तदा यावंतोऽर्था अभिधित्सि
तास्तावंतः शब्दाः पृथगेकैकपर्यवसायिनः प्रसक्तास्तत्रानेन निवृत्तिः क्रियते वीप्सायां द्वेरेव प्रयोक्तत्वेन तु बहुप्रयोक्तव्यमिति। कथं तर्हि निवृत्ता

॥ काप्युनरस्ते॰ नानावाचिनामधिकरणानां क्रियागुणाभ्यां युगपत्प्रयोक्तुर्व्याप्तुमिच्छा वीप्सा॰ नानाभूतार्थवाचिनां शब्दानां या
न्यधिकरणानि वाच्यानि तेषां क्रियागुणाभ्यां युगपत्प्रयोक्तुमिच्छा वीप्साः ग्रामो २ रमणीयः जनपदो २ रमणीयः पुरुषः पुरु
षो निधनमुपैति ५ ॥श्री४॥ ॥

नामर्थः प्रतीयते यावता प्रत्येकपर्यवसायित्वे द्वयोरेव प्रतीतिः स्यात् उच्यते। एकशेषे यथान्येषामर्थः शिष्टेन गम्यते न तद्वद्द्विशेषेऽपि शिष्टाभ्या
मितरार्थधीः यथैव हि वृत्तौ वृक्षा इत्येकशेषविषये शिष्यमाण एव निवृत्तानामप्यर्थमाह तथेहापि शिष्यमाणौ द्वे एव विवक्षितानर्थानभिध
त्तः। न च बहुवचनप्रसंगः परिगृहीतैकत्वानां बहूनामभिधानात् अन्यथा प्रत्येकसंबंधस्याप्रतीतेः। द्विर्वचनादुत्तरकालं समासमपि बहुत्वाव
गतौ प्रातिपदिकत्वाद् बहुवचनाभावः। यथायमपि गोधावतीति समपि दर्शं ठक् क्रियायोगे कर्मत्वे द्वितीयाः भावः। एकैकमित्यत्र तु सम्भ
अधिकरणानि वाच्यानि तेषां सह विवक्षितानां पृथक्संख्यायुक्तानां प्रत्येकं क्रियागुणेन वा व्याप्तुमिच्छा सा वीप्सेति। क्रियागुणग्रहणाद्
द्रव्यस्याप्युपलक्षणं ग्रामे ग्रामे पानीयमिति तिष्ठत्यत्रासेहरादहरणं पुरुषः पुरुषो निधनमुपैतीति। निधनं मरणं। जातस्य हि ध्रुवो मृत्युरित्य
र्थः। अपरस्त्वाह साम्नो भक्तिविशेषो निधनं सर्वदैवाञ्जलिज्ञो निधनमुपयन्तीत्यर्थ इति ५

पत्तिरं तमित्यादि। अत्रातिप्रतिषेधो हेतुः। द्विर्वचनस्यावकाशो यत्र नित्यता विवक्षिता न प्रकर्षः पच पच निपचतीति। प्रकर्षप्रत्ययस्यावकाशो यत्र
प्रकर्ष एव विवक्षितेन नित्यता पचतितरामिति। उभयविवक्षायामुभयप्रसंगे परत्वाद्द्विर्वचनं ततः पुनः प्रसंगविज्ञानात्प्रकर्षप्रत्ययः। यद्वा प्रति
योग्यपेक्षः प्रकर्षो बहिरंगः पौनःपुन्यमंतरंगमिति पूर्वं द्विर्वचनं इत्यादि। इत्थं वेद्यं। यद्वा प्रकर्षयुक्ता एवाद्यादयस्तानयनक्रियया पुनःपु
पुन्येन इति लघुप्रकर्षी एव वीप्सने। किंचलत्तद्द्विर्वचनात्तरपि स्यात्पचतरमिति भवति त्वं नथाच प्रकर्षयोगः पौनःपुन्यं वीप्सेति पूर्वं प्रकर्षयोगः॥
॥परेर्वर्जने॥ ॥परिश्रि त्रिगर्त्तेभ्य इति। अपपरी वर्जन इति कर्मप्रवचनीयसंज्ञायं च पञ्चम्यपाङ्परिभिरिति पंचमी। परिषिंचतीति। परिः सर्वतो

यत्रिरं तं नित्यतया प्रकर्षेण च युक्तं ततः कृतद्विर्वचनात्प्रकर्षप्रत्यय इष्यते। पचति २ तरामिति। इहतु आघतरमान
येति प्रकर्षयुक्तस्य वीप्सायोग इष्यते॥ ॥परेर्वर्जने॥ ॥परीत्येतस्य वर्जनेर्थे द्वे भवतः परि २ त्रिगर्तेभ्यो वृष्टो देवः परि २
सौवीरेभ्यः परि २ सर्वसेनेभ्यः। वर्जनं परिहारः। वर्जन इति किं ओदनं परिषिंचति। परेर्वर्जने समासे चेति वक्तव्यं परि २
त्रिगर्तेभ्यो वृष्टो देवः परित्रिगर्तेभ्यः समासे तु तेनैवोक्तत्वाद्वर्जनस्य नैव भवति। परित्रिगर्तं वृष्टो देव इति॥ ॥ ॥

भावे। उपसर्गो त्सुनोतीत्यादौ यत्र तु नैव भवति तदाह अदिनाषत्वं। परेर्वर्जन इत्यादि। परेर्वर्जन इत्यत्र असमासे इति वक्तव्यं वेति च वक्तव्यं तेनासमा
से च भवति तत्र विविकल्पेन अपपरिबहिरञ्चवः पञ्चम्या समासे चेति। तेनैवोक्तत्वादिति। ननु वाक्ये तावद्वर्जनं परेरेव द्योत्यं समासेपि परिः संनिहित स्तत्किं समा
स एव वर्जने शक्तिः कल्प्यते तत्राह। अजहत्स्वार्था वृत्तिरिति पक्षे समास एव वर्ज्यमानोपसर्जने वर्जने वर्तते अवयवोत्वनर्थका वितिः। यदा
त्वजहत्स्वार्था वृत्तिरिति पक्षस्तदा नाके केवले वर्जने परिर्वर्तत इति तत्रैव द्विर्वचनं भवति। समासे तु वर्ज्यमानस्यानाद्यर्थः परिः केवले
वर्जने न वर्तते इति द्विर्वचनाभाव॥ ॥ राम॰ ६

।।प्रसमुपोदः पादपूरणे।। ।।प्रादीनां समाहारे द्वंद्वः। द्वंद्वाच्चदषहांतात्समाहारे इति समासांतस्तु न भवति· समासांतविधेरनित्यत्वात्। उदुतं
जातवेदसमिति। क्वचिदुदाहृतं तदयुक्तं न ह्यत्र द्वितीय उच्छब्दः किं तर्ह्युशब्दः सामर्थ्याच्छंदस्येवैतद्विधानमिति। किं सामर्थ्यमित्याह भाषायामपि
ति। नात्र द्विर्वचनस्य किंचिद्द्योत्यं केवलं पादपूरणमेव कार्यं न चैवंविधस्य भाषायां प्रयोगोऽस्ति। क्वचित्तु सामर्थ्यादित्यादि न पठ्यते।। ।।
उपर्यध्यधसः सामीप्ये।। ।।उपर्यादीनां योऽर्थस्तस्य सामीप्यद्योतनाय द्विर्वचनं। सामीप्यं प्रत्यासत्तिः तच्च देशकृतं कालकृतं वा। उपर्युप

प्रसमुपोदः पादपूरणे।। ।।प्र· सं· उप· उत· इत्येतेषां पादपूरणे द्वे भवतः· प्रप्रायमग्निर्भरतस्य शृण्वे· संसमिद्युवसे वृषन्· उपो
प मे परामृश· किं नोदुदु हर्षसे दातवा उ· पादपूरण इति किं प्रदेशं आधिपा· सामर्थ्याच्छंदस्येवैतद्विधानं भाषायामनर्थकस्य प्र
योगाभावात्।। ।।उपर्यध्यधसः सामीप्ये।। ।।उपरि· अधि· अधस्· इत्येतेषां द्वे भवतः सामीप्ये विवक्षिते। उपर्युपरि दुःखं· उपर्यु
परि ग्रामं। अध्यधि ग्रामं· अधोऽधो ग्रामं सामीप्य इति किं उपरि चंद्रमाः इह कस्मान्न भवति· उपरि शिरसो घटं धारयतीति।
अत्र सामीप्यमविवक्षितं औत्तराधर्यमेवलं विवक्षितमिति द्विर्वचनं न भवति ६ ।। ।।श्री४।। ।।श्री४।। ।।

रि दुःखमिति कालकृतस्योदाहरणं दुःखस्य सामीप्ये नोपरिष्टादित्यर्थः। उभसर्वतसोरित्युपसंख्यानेन द्वितीया। उपर्युपरि ग्राममिति।
ग्रामस्य सामीप्ये नोपरिष्टाद्देश इत्यर्थः· अध्यधि ग्राममिति। अधिरुपरिभावे। यथा समिधं स्रुवं चाध्यधि गार्हपत्यं हृत्वेति। अधोऽधो ग्राम
मिति। ग्रामस्य सामीप्ये नाधस्ताद्देश इत्यर्थः। यथा नवान धोधो हृतः पयोधरानिति। उपर्युपरि पश्यन्तः सर्वस्वदरिद्र इति। अधो
धो दर्शने कस्य महिमा नोपजायते इति तु वीप्सायां द्विर्वचनं। उपरि चंद्रमा इति। अत्र जगतमपेक्ष्योपरिभावस्य सामीप्यं नास्ति। उपरि शिरस
इत्यादि। न हि वस्तुसत्तैव शब्दव्युत्पत्तेः प्रधानं कारणं किं तर्हि विवक्षा सा चेदत्र नास्ति। शिरस उपरिष्टाद्घटं धारयति नाधस्तादिति यत्र विव
क्षितं सामीप्यं तु वस्तुतः संभवति ६

का. व. १

७

वाक्यादेरामंत्रितस्यासूयासंमतिकोपकुत्सनभर्त्सनेषु ॥ ॥ एकार्थः पदसमूहो वाक्यमिति यथाह भगवान्जैमिनिः अर्थैकत्वादेकं वाक्यं साकांक्षं चेद्विभागे स्यादिति। क्वचित्त्वेकतिङ् पदसमूहो वाक्यमिति पठ्यते। एकातिङ् विभक्तिर्यत्र स एकतिङ्। क्वचित्तु न किंचिदपि वाक्यलक्षणं पठ्यते। असूयासंमतिकोपकुत्सनभर्त्सनेषु यदितद्वाक्यं भवतीति। यद्यपि वाक्यादेरिति समासे गुणीभूतं वाक्यं तथाप्यसूयादि

वाक्यादेरामंत्रितस्यासूयासम्मतिकोपकुत्सनभर्त्सनेषु ॥ ॥ एकार्थः पदसमूहो वाक्यं वाक्यादेरामंत्रितस्य द्वे भवतः असूया. सम्मति. कोपः कुत्सन. भर्त्सन. इत्येतेष्वर्थेषु यदितद्वाक्यं भवति. तत्र परगुणानामसहनमसूया. पूजनं सम्मतिः क्रोधः कोपः निंदनं कुत्सनं. अपकारशब्दैर्नः (?) हैर्भयोत्पादनं भर्त्सनं. एते च प्रयोक्तृधर्मा नाभिधेयधर्माः असूयायां तावत्. माणवक३ माणवक। अभिरूपक३ अभिरूपक. ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ श्री ॥

नां तेनैव संबंधः असूयादिषु यद्वाक्यं तदादेरिति। ननु प्रधानेन वाक्यादि कमंत्रितेन। प्रयोक्तृधर्मा ह्यसूयादयो नाभिधेयधर्मास्ते च वाक्येनैव द्योत्यंते नामंत्रितेन। उदाहरणेषु संमतावनुकंपायां कनू। इतरत्र कुत्सितेकः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ ॥ राम०

७

रिक्तं अनंसुद्रमित्यर्थः। शक्तियष्टिशब्दाभ्यां तद्धतोः स्त्रियोर्वर्तमानाभ्यां कुत्सने कः। एवं हि कुत्सनं संबोधनं च समीचीनं भवति। भर्त्सने त्वित्य-
द्विपद्यपि भर्त्सने पर्यायेणेति वचनात् पूर्वस्यापि तत्र पर्यायेण प्लुतो भवति। तथापि भर्त्सने पदद्वित्वमिहोदाहरणं तद्धि हस्तेदमुक्तं मा त्रेरितस्यैवे-
ति। शोभनः खल्वसि माणवकेति। अत्र माणवकशब्दस्य द्विर्वचनं न भवति। ननु च मानमस्य न कुत्स्यते न चाकुपितो भर्त्स्यते ततः कोपासूययोर्द्वि-

रिक्तं ते आभिरूप्यं। सम्मतो· माणवक ३ माणवक· अभिरूपक ३ अभिरूपक· शोभनः खल्वसि। कोपे· माणवक ३ माणवक·
अविनीतक ३ अविनीतक· इदानीं ज्ञास्यसि जाल्म। कुत्सने· शक्तिके ३ शक्तिके· यष्टिके ३ यष्टिके· रिक्ता ते शक्तिः। भर्त्सने चौर
३ वृषल वृषल ३ घातयिष्यामि त्वा बंधयिष्यामि त्वा· असूयादिषु स्वरितमाम्रेडितं इति पूर्वपदस्य प्लुतः भर्त्सने त्वाम्रेडितं भर्त्सनेन
इत्याम्रेडितस्यैव। वाक्यादेरिति किं· अंत्यस्य मध्यमस्य वा मा भूत्। शोभनः खल्वसि माणवक। आमंत्रितस्येति किं· उदारो देवदत्तः अ-
सूयादिष्विति किं· देवदत्त गामभ्याज शुक्लां दंडेन॥ ॥ श्री४॥ ॥ श्री४॥ ॥ श्री४॥ ॥श्री४॥ ॥ श्री४॥ ॥

र्वचनं विधीयमानं भर्त्सनकुत्सनयोरपि सिद्ध्यतीति कारणत्वेन तत्रापि कोपासूययोर्भावात्। ततश्चनार्थः कुत्सनभर्त्सनग्रहणेनानैतदस्ति। गुरवो
हि हितैषित्वादकुप्यंतोऽपि भर्त्सनं कुर्वंति भर्त्स्यमानास्तु कुपितान्मन्यंते तान्। विनाप्यसूयया कुत्सां कुर्वंतीति पृथक्तयोः निर्देशः सूत्रकारेण
विहितः सूक्ष्मदर्शिना। साम्प्रतैः पाणिभिर्घ्नंति गुरवो न विषोक्षितैः। लालनाश्रयिणो दोषास्ताडनाश्रयिणो गुणाः। अभिप्रायेद्दुष्टे लालनेऽपि
दोषा भवंति विपर्यये तु ताडनेऽपि गुणा इत्यर्थः॥ ॥

८का०प०१ ॥एकंबहुव्रीहिवत्॥ ॥अत्रयदिकेवलोबहुव्रीहिवद्भावोऽनिर्दिष्टविषयोनेनविधीयेततत्श्चेहाविप्राप्नोत्येकइतितत्रचसुब्लुक्स्यात्।अ
स्तुबहुव्रीहिवद्भावात्परःसुप्भविष्यति।नैववाक्येसुब्लुक्प्राप्नोतिएकइत्यस्यप्रत्ययांतत्वेनाप्रातिपदिकत्वात्।कृत्तद्धितसमासाश्चेत्यत्र
८ चसमासग्रहणंनियमार्थंनविध्यर्थमितितेनापिनास्तिप्रातिपदिकत्वं।इहतर्ह्येकैकेतिपुंवद्भावःप्राप्नोति।स्यादेतत्।द्विरुक्तिरधिकाराद्द्वि

॥एकंबहुव्रीहिवत्॥ एकमित्येतच्छब्दरूपंद्विरुक्तंबहुव्रीहिवद्भवति ७ ॥

॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

र्वचनंर्हिनियोगेनविधीयमानोबहुव्रीहिवद्भावस्तदभावादिहनभवतीति।अथतदपिद्विर्वचनमनेनविधीयमानमत्रकस्मान्नभवतित
स्मादुक्तमोऽस्यविषयात्।आहएकमित्येतच्छब्दरूपंद्विरुक्तमिति।सर्वस्यद्वेइत्यनुवर्त्ततेनत्वनेनद्विर्वचनंविधीयतेकिंतर्ह्यन्येनविहितमनूद्य
तत्रबहुव्रीहिवद्भावोविधीयते।कश्चान्येनद्विर्वचनंविहितंवीप्सायां।यदिपुनर्वीप्साग्रहणमनुवर्त्येततत्रबहुव्रीहिवद्भावोविधीयतेनैवंशक्यंब राम०
हुव्रीहिवद्भावेनद्विर्वचनंबाध्येत।अथयदिवीप्सायांद्वेइत्येवमुभयमनुवर्त्यद्विर्वचनंबहुव्रीहिवद्भावश्चोभयमनेनविधीयतेनदोषो ८
भवति।तन्निकारस्तुकिंसुधावीप्साग्रहणानुवृत्त्येतिद्वेइत्येवानुवृत्तिः ७

सुब्लोपपुंवद्भावावितिायद्यप्येतौ बहुव्रीहावितिनोच्येते तथापि तत्र दृष्टाविहेतयोरतिदेशः। क्वचित्तु दृष्टत्वादेवायमर्थः पठ्यते। एकैकमिति। एकस्मिन्नस्य
द्विर्वचने द्वयोरपि सुपोर्लुकि सति पुनर्बहुव्रीहिवद्भावादेव सुप्। एकैकयेति टावंतात्तृतीयातदंतस्य द्विर्वचनं। सुब्लुकि पुंवद्भावेन पूर्वभागे टायो निवृत्तिः।
कः पुनस्तदायोनिवृत्तौ सत्यामसत्यां वा विशेषः। अवग्रहे स्ति विशेषः। एकैकयेत्येकएकयेति भवति। उत्तरत्र चग्रहणं गतेस्वादौ पुंवद्भावस्य प्रयोजनं नाय
टिपावच्चवद् बहुव्रीहौ दृष्टं कार्यं तस्य सर्वस्यातिदेशः सर्वनामसंज्ञाप्रतिषेधः स्वरः समासांतश्चेत्येते विषयाः प्राप्नुवंत्यत आह सर्वनामसंज्ञाप्रतिषेधस्वरस
मासांता न भवंति। न बहुव्रीहावितिप्रतिषेधो न भवति। तत्र हि विभाषादिक्समासे बहुव्रीहावित्यतो बहुव्रीहावित्यनुवर्त्तमाने पुनर्बहुव्रीहिग्रहणं बहु
व्रीहिरेव यो बहुव्रीहिस्तत्र यथा स्याद् बहुव्रीहिवद्भावेन यो बहुव्रीहिस्तत्र माभूदिति तेन संज्ञाप्रतिषेधस्तावत्समासाधिकारे बहुव्रीहौ विज्ञायते। न

बहुव्रीहिवत्त्वे प्रयोजनं सुब्लोपपुंवद्भावौ॰ यद्यपि तौ बहुव्रीहावितिनोक्तौ तथापि तत्र दृष्टावित्यतिदिश्येते॰ एकैकमक्षरं पठति॰
एकैकयाहुत्यानुहोति। सर्वनामसंज्ञाप्रतिषेधस्वरसमासांताः समासाधिकारविहिते बहुव्रीहौ विज्ञायंते तेनातिदेशिके बहुव्री
हौ न भवंति॰ एकैकस्मै ददाति॰ न बहुव्रीहावितिप्रतिषेधो न भवति॰ बहुव्रीहिरेव यो बहुव्रीहिरिति विज्ञानात्॰ न न॰ सुसु॰
नञ्सुभ्यामित्यंतोदात्तत्वं न भवति॰।। ।।श्री०।। ।।श्री०।। ।।श्री४।। ।। श्री४।। ।।श्री४।। ।।श्री४।।।।

नसुसुइति। आबाधे चेति द्विर्वचनं। न नकरोति सुस्रजा गत्रीत्यादिवाक्यैकदेश उदाहृतः। नञ्सुभ्यामित्यंतोदात्तत्वं न भवतीति। तत्र हि वनं समास
इत्यतः सिंहावलोकितन्यायेन समास इति संबध्यते बहुव्रीहाविदमेतन्नदूरत्वतो बहुव्रीहाविति च। तत्र बहुव्रीहेः समासत्वाव्यभिचारे पु
नः समास इति विशेषणं समासाधिकारविहितबहुव्रीहिपरिग्रहार्थं। अथात्र नञ्सुभ्यामित्यंतोदात्तत्वे सति कः स्वरो भवति। अत्र हि चत्वा
रः स्वराः प्राप्नुवंति। समासांतोदात्तत्वं पूर्वपदप्रकृतिस्वरो नञ्सुभ्यामित्यंतोदात्तत्वमाम्रेडितानुदात्तत्वं च। तत्र नञ्सुभ्यामित्ययं स्वरो भवती
त्युक्तं। आम्रेडितानुदात्तत्वमपि न भवति किं कारणं कार्यातिदेशे तावदिदमेव कार्यं गौणं विधायकमिति परत्वादाम्रेडितानुदात्तत्वं बहुव्रीहि
स्वरेण बाध्यते। शास्त्रातिदेशेपि विरुद्धस्य स्वाश्रयस्यातिदेशेन निवर्त्तनान्नैवाम्रेडितानुदात्तत्वं भवति। बहुव्रीहेः प्रकृत्येत्र च न समासमास
ग्रहणमनुवर्त्तते तेन बहुव्रीहिवद्भावात्पूर्वपदप्रकृतिस्वरो भवन्न समासांतोदात्तत्वं बाधते।।

।भ्रगणीति।आबाधेचेतिद्विर्वचनं।अकपुरव्रूरिति समासांतो न भवतीति।तत्र हि समासाच्च तद्विषयादित्यतः समासादित्यनुवर्त्तमाने पुनः समासग्रहणं समासाधिकारे विहितो यः समासान्तस्य ग्रहणार्थं तेनाति देशिके समासे न भवति।एवमेतेसंज्ञाप्रतिषेधादयः समासाधिकारे विहिते बहुव्रीहौ विज्ञायंते।वार्त्तिककारस्तु सर्वमेवैतद्वाचनिकं मन्यते यदाह सर्वनामस्वरसमासांतेषु दोषश्च इति।अथ ननेत्यत्र बहुव्रीहिवद्भावान्नलोपः कस्मान्न भवति।उच्यते।उत्तरपदस्येति च कार्यिणो निर्देशः।तत्र साक्षाच्छिष्टेन कार्यित्वेन नञो निमित्तभावो बाध्यते।यथा भद्रकृद्दोमद्रकृदद्रस्यत्र रेफस्याचोरहा॰

अकु॰२ पृ॰२ अकपुरव्रूरितिसमासांतो न भवति।। ।।आबाधेच।। ।।आबाधनमाबाधः पीडाप्रयोक्तृधर्मो नाभिधेयधर्मः तत्र वर्त्तमानस्य द्वे भवतः बहुव्रीहिवच्चास्य कार्यं भवति॰ गतगतः।नष्टनष्टः॰पतितपतितः गतगता॰ नष्टनष्टा॰पतितपतिताः प्रियस्य चिरगमनादिना पीड्यमानः कश्चिदेवं प्रयुंक्ते प्रयोक्ता।। ।। ८ ।। ।।श्री।। ।।श्री।। ।।

म्यांद्वेइतिद्विर्वचनप्रसंगउक्तेनेमोरहोकाविशेषोकिं ज्ञाहिनिमित्तमिमोद्विर्वचनस्येति।अयं तु परिहारः सर्वत्रापि यथासंभवं द्रष्टव्यः।। ।।आबाधेच।। ।।आबाधनमाबाध इति भावे घञ्।प्रयोक्तृधर्मो नाभिधेयधर्म इति।अभिधेयधर्मत्वे हि बाधितपीडिता दिशब्दानामेव द्विर्वचनं स्यात्।गतादिशब्दानां प्रयोक्तृधर्मत्वे हि मेधामपि भवतीति व्याप्तिर्भवति।तत्र वर्त्तमानस्येति।द्विर्वचने सत्याबाधस्य गम्यमानत्वो द्गतादिशब्दानां तत्र वृत्तिः न तु तमभिधानात्।प्रियस्य चिरगमनादिनेति प्रयोक्तृधर्मं दर्शयति।आदिशब्देन नाशादेर्ग्रहणं ८ ।। ।।छ।। ।।छ।। ।।
।।२ २।। ।।२ २।। ।।२ २।। ।। रा॰प॰
९

कर्मधारयवदुत्तरेषु॥ ॥कोपधायाश्चापि कर्मधारयवद्भावात्पुंवद्भावो भवतीति। तेन बहुव्रीहिवद्भावे प्रकृते कर्मधारयवद्भावो विधीयत इति भावः। समासान्तोदात्तत्वमपि तेन विधीयत इति। कार्यातिदेशपक्षस्य मुख्यत्वात्। शास्त्रातिदेशे तु पदस्याम्रेडितानुदात्तत्वमेव परं तथापि न तद्भवति। विरुद्धस्य शास्त्रस्यातिदेशेन निवर्त्तनात्॥ ॥प्रकारे॥ ॥प्रकारो भेदः सादृश्यं चेति। उभयत्रापि प्रकारशब्दस्य दृष्टत्वात्। भेदे तावद्बहुभिः प्रकारैर्भुङ्क्ते बहुभिर्भेदैर्विशेषैरिति गम्यते। सादृश्ये। ब्राह्मणप्रकारोऽयं माणवकः ब्राह्मणसदृश इति गम्यते। तदिहेति। तदिति वाक्योपन्यासे अस्य यं वा समप्रभार्थे हन्त्रिति त्रेसर्थः। सादृश्यं प्रकारो गृह्यत इति। द्विरुक्तावस्येव प्रतीतेः। अत्र चाभिधानस्वाभाव्यं हेतुः। प्रकारे वर्त्तमानस्येति। द्विर्वचनप्रकरणे निर्द्धारणे न द्योतकात्तत्र वृत्तिः। अपरिपूर्णगुणस्य

कर्मधारयवदुत्तरेषु॥ ॥इत उत्तरेषु द्विर्वचनेषु कर्मधारयवत्कार्यं भवति· कर्मधारयवत्त्वे प्रयोजनं सुब्लोपपुंवद्भावसमासान्तोदात्तत्वानि· सुब्लोपः पटुपटुः। मृदुमृदुः पंडितपंडितः। पुंवद्भावः पटुपट्वी मृदुमृद्वी· कालककालिका। कोपधाया अपि कर्मधारयवद्भावात्पुंवद्भावो भवति· अंतोदात्तत्वं· पटुपटुः पटुपट्वी॥ समासान्तोदात्तत्वमनेनैव विधीयत इति परत्वादाम्रेडितानुदात्तत्वं बाध्यते। अधिकारोऽयं वसिद्धेः पटुत्तरेषु इति वचनेन तद्भिन्नार्थः॥ ॥प्रकारे गुणवचनस्य॥ ॥प्रकारो भेदः सादृश्यं च· तदिह सादृश्यं प्रकारो गृह्यते· प्रकारे वर्त्तमानस्य गुणवचनस्य द्वे भवतः पटुपटुः मृदुमृदुः पंडितपंडितः अपरिपूर्णगुण इत्यर्थः। परिपूर्णगुणेन न्यूनगुणस्योपमाने सत्येवं प्रयुज्यते। जातीयरोनेन द्विर्वचनेन बाधनं नेष्यते· पटुजातीयः मृदुजातीय इत्यपीह भवति· प्रकार इति किं ॥ ॥

पट्विति। कथमेतदित्याह परिपूर्णगुणेनेति। यस्य पूर्णं पाटवं यः पटुकार्याणि करोतीति तेन यदा न्यूनपाटव उपसमीपते तदा पटुपटुरिति प्रयोगो भवति। तेनार्थादपरिपूर्णगुण इत्यर्थो भवति। जातीयरोनेन द्विर्वचनेन बाधनं नेष्यत इति। तद्धितो द्विविधस्यापि प्रकारस्य ग्रहणं मन्यते। जयादित्यस्तु तत्राह सामान्यस्य भेदको विशेषः प्रकार इति। इष्टिश्चेयं। अन्यथा ब्राह्मणजातीय इत्यादावगुणवचने गुणवचनेपि सादृश्यादन्यत्र भेदे चरितार्थस्य जातीयरो गुणवचनेषु सादृश्ये बाधः स्यात्॥ ॥छ॥ ॥

पटुर्देवदत्त इति। परिसरगुण एवात्र पटुशब्दो वर्तते न तत्साहचर्यादन्यगुणे। अग्निर्माणवक इति। अग्निशब्दोऽग्नौ वृत्तः सोपमिति सादृश्यनिमित्तादभेदोप
चारान्माणवके वर्तत इति द्रव्ये पूर्वं वृत्तः संप्रत्यपि द्रव्यवचन इति गुणवचनो न भवति। एवं गोशब्दः सास्नादिमति वर्तित्वा वाहीके वर्तमानः। नन्वग्निशब्दोऽग्नि
गतं तैक्ष्ण्यं माणवके प्रतिपादयितुं प्रयुज्यत इति गुणवचन एव तथा गोशब्दोऽपि सास्नादिमज्जाड्यप्रतिपादनाय वाहीके प्रयुज्यत इति गुणवचन एवे
त्यत आह यद्यप्यत्राग्निशब्द इति। अग्निशब्दो माणवके प्रयुज्यमानो यादृशमग्नेस्तैक्ष्ण्यं परस्य धादिभ्यो व्यावृत्तं तदेव प्रतिपादयति न तैक्ष्ण्यमात्रं। गो
शब्दोऽपि यादृशं गवां जाड्यं मनुष्येभ्यो व्यावृत्तं तदेव प्रतिपादयति आश्रयविशेषसंबंधाद्धि तैक्ष्ण्यजाड्यादिकं भिद्यते तदेतदाह मुख्यार्थसंबंधादव
धृतभेदं तैक्ष्ण्यं पैरस्य धोजाड्यादिकमिति। शब्दांतरसंनिधिमंतरेण शब्दश्रवणमात्राद्योऽर्थः प्रतीयते स मुख्यः विपरीतो गौणः। अवधृतभेदं निश्चितभेदं

॥ पटुर्देवदत्तः गुणवचनस्येति किं। अग्निर्माणवकः गौर्वाहीकः यद्यप्यत्राग्निशब्दो गोशब्दश्च मुख्यार्थसंबंधादवधृतभेदं तैक्ष्ण्यजाड्या
दिकमर्थांतरे गुणविशेषमेव प्रतिपादयितुं प्रवृत्तस्तथापि सर्वदा गुणवचनो न भवतीति न द्विरुच्यते। ९ ॥ ॥श्रीरामचंद्राय नमः

। आदिशब्देन यैंगल्पभारवहनादेर्ग्रहणं। अर्थांतरे गौणो माणवके वाहीके च। सर्वदा गुणवचनो न भवतीति न द्विरुच्यत इति। प्रकारे वर्तमानस्येत्येव
गुणवचनत्वे सिद्धे पुनर्गुणवचनग्रहणात्सर्वदा गुणवचनस्येत्याश्रीयते। न चायं सर्वदा गुणवचनः प्राक्प्रकाराद्द्रव्यवचनत्वात्। अत्र केचित् गुण
मुक्तवान् गुणवचन इति गुणोपसर्जनद्रव्यवचनस्यैव द्विर्वचनमिच्छंति। अस्मिंस्तु गुणवचनस्य गुणिवचनस्य चाविशेषेणेच्छंति शुक्लशुक्लं रूपं शुक्ल
शुक्लः पट इति। नवं नवं प्रीतिरहो करोतीत्यत्र वीप्सायां द्विर्वचनं। अनेन तु द्विर्वचने सुब्लोपप्रसंगः यथा नवनवा वनवायुभिराद्रधर इति ९ राम॰
१०

॥श्री४॥ ॥श्री४॥ ॥

मूलेमूलं इति। एकस्य वस्तुनो वेणुदलादेरेकमेव मुख्यमग्रं मूलं च। इतरेषां तु भागानामापेक्षिको मूलाग्रव्यपदेशः। स्थौल्यसौक्ष्म्ये अपि तेकस्ये किं
तर्हि यथा मूलमुपक्रीडते स्थौल्यं यथाग्रे च सौक्ष्म्यमिति वीप्साया अत्रासंभवः। मू लेमूले पश्चिविटपिनामिति वीप्सायामेव द्विर्वच
नं। स्वार्थ इति। अर्थांतराभावप्रदर्शनार्थमिदमुक्तं। अस्मात्कार्षापणादिति। अनेन रूप माषसमुदायः कार्षापणस्तत्र न सर्वे माषा दानक्रियया व्या
प्तं ते किं तर्हि द्वावेवेति वीप्साया अभावः तत्र हि तं निहि जस्यार्थस्य नकस्यचिद्वर्जनमस्ति नदिदमुक्तमत्र हीति। माषं देहि द्वौ माषौ देहि त्रीन्माषानिति।

आनुपूर्व्ये द्वे भवत इति वक्तव्यं. मूले २ स्थूलाः अग्रे २ सूक्ष्माः ज्येष्ठं २ प्रवेशय. स्वार्थे वधार्यमाणेऽनेकस्मिन्द्वे भवत इति वक्तव्यं।
अस्मात्कार्षापणादिह भवद्भ्यां माषं २ देहि. स्वार्थ इति स्वार्थ एव द्विर्वचनं न वीप्सायां. अत्र हि द्वावेव माषौ दीयेते न सर्वे कार्षापण
संबंधिनो माषाः तेन वीप्सा न विद्यते। अवधार्यमाण इति किं अस्मात्कार्षापणादिह भवद्भ्यां माषं देहि द्वौ माषौ देहि त्रीन्माषा
न्देहि. अनेकस्मिन्निति किं अस्मात्कार्षापणादिह भवद्भ्यां माषमेकं देहि। चापले द्वे भवत इति वक्तव्यं. संभ्रमेण प्रवृत्तिश्चापलं.
अहिरहिर्बुध्यस्व बुध्यस्व. नावश्यं द्वावेव शब्दौ प्रयोक्तव्यौ किं तर्हि यावद्भिः शब्दैः सोर्थोऽवगम्यते तावन्तः शब्दाः प्रयोक्तव्याः अ
हिरहिरहिः बुध्यस्व बुध्यस्व बुध्यस्वेति। क्रियासमभिहारे द्वे भवत इति वक्तव्यं. लुनीहि लुनीहीत्येवायं लुनाति। आभीक्ष्ण्ये द्वे भवत
इति वक्तव्यं. भुक्त्वा २ व्रजति. भोजं २ व्रजति. ॥

अनेन यथेच्छं देहीति विवक्षया अवधारणाभावं दर्शयति। चापल इति। प्रयोक्तृधर्मोयं तत्र घोरे सुबंतस्य तिङं तस्य च सर्वस्य वाक्यगतस्य परस्परस्य द्वि
र्वचनं। नचाचश्यमिति। नेदं शास्त्रीयं द्विर्वचनं किं तर्हि प्रत्यायनाय नैकस्य स्वतंत्रपदस्य प्रयोग इत्यर्थः। एवं च कृत्वाम्रेडितानुदात्तत्वाभावा
द्यथाप्राप्तः स्वरो भवति। क्रियासमभिहार इति। लोडंतस्यैवेदं द्विर्वचनं न यङः तस्य लोटः समुच्चये विधानात् क्रियासमभिहाराभिव्यक्तौ केवलस्य
सामर्थ्याभावात्। यङ् तु क्रियासमभिहारविषय एवेति तद्योतने स्वपं सामर्थ्यान्नापेक्षते द्विर्वचनं। आभीक्ष्ण्य इति। प्रकरणवशेन क्रियासमभिहारस्या
वृनयो विहितस्तदंतस्यैव द्विर्वचनमिति शंकमानं प्रत्यस्य वाक्यस्योपन्यासः॥ ॥

स्का·प·१

११

।नित्यइत्येवमिद्धमितितन्त्रोक्तमिति।नित्यवीप्सयोरित्यत्रहिल्कालमुलोलेनिश्च द्विर्वचनमाभीक्ष्ण्यइति। पूर्वेणतद्रापेक्षाणामेवपौनःपुन्यप्रकाश
नेशक्तिरित्युक्तं अनेनत्वाङ्कः। पुनःपुनः क्रियायाउत्पादनमाभीक्ष्ण्यंतथाहि भुक्त्वाभुक्त्वाभुक्त्वाव्रजतीत्युक्तेमत्यपिक्रियायाविच्छेदेपुनर्भुक्त्वेपु
नर्व्रजतीतिक्रियावृत्तिः प्रतीयतेनित्यत्वात्तुक्रियायाअविच्छेदः। यथाजीवतिजीवतीत्युक्तेजीवमेवायमितिप्रतीयतेनत्वसौजीवित्वाम्रियतेम्र
त्वाचजीवतीतिजीवनमेवत्वविच्छिन्नंप्रतीयते। तस्मादाभीक्ष्ण्यंनित्यमित्यन्यावेतावर्थाविति। अपरआह भुक्त्वाभुक्त्वाव्रजतीत्यादौक्त्वाणमु

नित्यइत्येवसिद्धमितितन्त्रोक्तंडाचिद्वेभवतइतिवक्तव्यं· पटपटाकरोति· पटपटायते· दमदमाकरोति· दम
दमायते· अमकानुकरणस्यडाजंतस्याद्विर्वचनमिष्यते· इहनभवति· द्वितीयाकरोति· तृतीयाकरोतिशं
बाकरोतीति· तदर्थंकेचिदबहुलमितिपठंति १० ॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

लंतस्यतिङः तस्यचद्विर्वचनेप्राप्तेआभीक्ष्ण्यसंशब्दनेनयोविहितस्तदंतस्ययथास्यात्तिङंतस्यमाभूदितिनियमार्थमिदमिति।डाचीति।विष
यसप्तमीयंतेनाव्यक्तानुकरणस्यडाचिविहितेलोपस्यपरत्वादित्यादेर्द्विर्वचनंततोऽव्यक्तानुकरणादितिडाचि टिलोपः नित्यमाम्रेडितेडाचीतिपररूप राम०
त्वं।अपरआह इदमेवाच्छब्दस्यपररूपविधानंलिंगं डाचीतिपरसप्तम्याश्रयितिलोपात्पूर्वंद्विर्वचनंभवतीत्यस्यार्थस्येति। तदसत्। पतदि ११
त्यादौटिलोपादुत्तरकालमप्यच्छब्दस्यसंभवात्। द्वितीयाकरोतीति।कृञोद्वितीयेत्यादिनाडाच्। तत्रहिडाचिद्विर्वचनंनैवकृतं।नवक्तव्यं।
आचार्यप्रवृत्तिर्ज्ञापयतिअव्यक्तानुकरणस्यद्विर्वचनंभवतीतियदयंनित्यमाम्रेडितेडाचीतिपररूपत्वंशास्ति १० ॥श्री॥ ॥

पूर्वप्रथमयोरिति। पूर्वप्रथमइत्येतयोर्द्विर्वचनं भवति कृ अर्थातिशयविवक्षायामनयोरर्थः तस्यातिशये विवक्षिते। आतिशायिकोपि दृश्यत इति। द्विर्व
चनेन बाधे प्राप्ते वचनं। अतिशयशब्दो नुशातिकादिषु द्रष्टव्यः किंचित्स्वार्थभेदादातिशायिकस्याबाध्यत्वमाहुः तथाहि। पूर्वतरं भुंक्ते किमात्मसाध्यक्रि
यांतरापेक्षं भोजनस्य पूर्वत्वमथ भोक्त्रंतरस्याभोजनक्रियापेक्षमिति संदेहो भवति। एवं पूर्वतरं पुष्यंतीत्युक्ते ऽयमर्थो गम्यते न तावदेष पुष्यती
ति। पूर्वं पुष्यतीत्यस्मात्तु अन्येभ्यः पुष्पितेभ्योतिशयेन पूर्वं पुष्यतीत्यर्थः प्रतीयते। उत्तरउत्तमयोरिति। उत्तरउत्तमयोस्तस्य द्वे भवतः समेनाय त्वादि

पूर्वप्रथमयोरर्थातिशयविवक्षायां द्वे भवत इति वक्तव्यं· पूर्वं २ पुष्यंति· प्रथमं २ पच्यंते· आतिशायिकोपि दृश्यते· पूर्वतरं पु
ष्यंति· प्रथमतरं पच्यंते इति। उत्तरउत्तमयोः समसंप्रधारणायां स्त्रीनिगदे भावे द्वे भवत इति वक्तव्यं· उभाविमावाढ्यौ कतरा २ अ
नयोराढ्यता· सर्व इमे आढ्या· कतमा २ एषामाढ्यता। उत्तरउत्तमाभ्यामन्यत्रापि हि दृश्यते· उभाविमावाढ्यौ· कीदृशी २ अनयो
राढ्यता। तथा स्त्रीनिगदाद्भावादन्यत्रापि हि दृश्यते· उभाविमावाढ्यौ कतरः कतरः अनयोर्विभव इति॥ ॥श्री॥ ॥श्रीः॥

नाधर्मेणासंप्रधारणायां विषयो स्त्रीनिगदे भाव इति। भावोभूतिः संपत्त्याढ्यता निगद्यत इति निगदः नीगदेति कर्मणि अप्रत्ययः शब्देन स्त्रीलिंगः शब्दो
भिधीयते स्त्रिया निगदः स्त्रीनिगदः कर्तरि षष्ठ्याः समासः स्त्रीलिंगशब्दाभिधेयायां विभूतौ वर्तमानस्येत्यर्थः। कतरा कतरा अनयोराढ्यतेति। किं
साधनसंपत्कृता उत भाग्यकृतेति प्रश्नार्थः॥ ॥श्री॥ ॥श्री॥ ॥ श्रीः॥ ॥श्रीः॥ ॥ श्रीः॥ ॥छ॥ ॥

कर्मव्यतिहार इति। क्रियाव्यतिहारो। तत्र द्विर्वचनं नित्यं समासवद्भावस्तु बहुलं। तत्रान्योन्यशब्दे समासवद्भावाभावान्सुलुक् समासांतोदात्तत्वं च न भवति
आम्रेडितानुदात्तत्वं भवति॥ इतरेतरशब्दे तु नित्यः समासवद्भाव इति सुलुक् समासस्वरो भवति॥ अन्योन्यमिति द्वितीयैकवचनांतस्य द्विर्वचनं। अन्यो
न्यस्येति षष्ठ्येकवचनांतस्य। अन्योन्यसंबंधिनः पुत्रादीनित्यर्थः॥ स्त्रीनपुंसकयोरिति। उत्तरपदस्याम्विभक्तेरांभावो यथानेकाल्त्वात्सर्वस्योत्त
रपदस्य स्यात्। तत्र सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव इति पूर्वोत्तरपदयोर्द्वयोरपि पुंवद्भावे प्रसक्ते आम्विधिः। अन्यशब्दस्य तु द्विर्वचने समासवद्भावाभावा

कर्मव्यतिहारे सर्वनाम्नो द्वे भवत इति च कर्मं समासवच्च बहुलं पदानां समासवत्त्वात् प्रथमैकवचनं पूर्वपदस्य· अन्योन्यमिमे
ब्राह्मणा भोजयंति· अन्योन्यस्य भोजयंति· इतरेतरं भोजयंति· इतरेतरस्य भोजयंति· स्त्रीनपुंसकयोरुत्तरपदस्य वा आम् वक्तव्यः
अन्योन्यामिमे ब्राह्मण्यौ भोजयतः अन्योन्यमिमे ब्राह्मण्यौ भोजयतः इतरेतरां भोजयतः इतरेतरं भोजयतः॥ अन्योन्यामिमे
ब्राह्मणकुले भोजयतः अन्योन्यं भोजयतः इतरेतरां भोजयतः इतरेतरं भोजयतः॥ ॥अकृच्छ्रे प्रियसुखयोरन्यतरस्यां॥
॥प्रियसुखे इत्येतयोरन्यतरस्यां द्वे भवतः अकृच्छ्रे द्योत्ये· कृच्छ्रं दुःखं तदभावो ऽकृच्छ्रं· प्रियप्रियेण ददाति· सुखसुखेन ददाति· प्रिये
ण ददाति· सुखेन ददाति· अक्लिष्टमानो ददातीत्यर्थः कृच्छ्रे तु किं प्रियः पुत्रः सुखो रथः॥ ॥यथास्वे यथायथं॥ ॥योयमात्मा
यद्यदात्मीयं तद्यथास्वं तस्मिन्यथायथमिति निपात्यते· यथाशब्दस्य द्विर्वचनं नपुंसकलिंगता च निपात्यते· ज्ञाताः सर्वे पदार्था यथा
यथं· यथास्वभावमित्यर्थः सर्वेषां तु यथायथं· यथात्मीयमित्यर्थः १२ ॥

इहाद्धलवचनात्त्वैर्णयोर्निवृत्तिः। नपुंसकेष्वद्वलत्वणरिष्यत इत्यस्य निवृत्तिः। वार्त्तिके तु कर्मधारयवदिति न संबध्यत इति सुब्लुगपि न भवति॥ ॥
अकृच्छ्रे प्रियसुखयोरन्यतरस्यां॥ ॥प्रियप्रियेणेति। तृतीयैकवचनांतस्य द्विर्वचने कर्मधारयवद्भावात्सुब्लुक् किं पुनस्तदेव वचनं। अत्यंतं दयितमपि
वस्तुनायासेन ददातीत्यर्थः॥ ॥यथास्वे यथायथं। यथास्व इति यथासादृश्य इति वीप्सायामव्ययीभावः स्वशब्द आत्मवचन आत्मीयवचनो वेति
दर्शयति। योयमात्मेति। जातिधनवचनस्य तु ग्रहणं न भवति द्विर्वचनस्य तत्रासमर्थत्वात् १२ ॥ ॥ ॥छ॥ ॥छ॥ ॥

गद्वंद्वं॥ ॥पूर्वपदस्येति। द्वि औ द्वि औ इति स्थिते कर्मधारयवद्भावस्तु लुकि कृते पूर्वपदावयवभूतस्यैकारस्याम्भावः उत्तरपदावयवस्य चात्वं निपा
त्यते चकारान्नपुंसकत्वं च विदेकवद्भावश्च निपात्यते। समासांतोदात्तत्वं तु कर्मधारयवद्भावाद्भवति। तत्र रहस्यं द्वंद्वशब्दवाच्यमिति। द्वाभ्यां निर्दिष्टेर रह
स्ये योगः। द्विधेत्यर्थः। द्वंद्वं मंत्रयते इति। द्वौ द्वौ भूत्वा मंत्रयंत इत्यर्थः। एवं हि तद्रहस्यं भवति। आचतुरमिति। आङ् मिर्विधौ चतुर्णां पुरुषाणां चतुः शब्दो द्व
न्द्वः आचतुर्थादित्यर्थः। मिथुनीयंतीति। मिथुनशब्देन मैथुनं तत्कर्म लक्ष्यते तदिच्छतीति क्यच्। प्रायेण मिथुनायंत इति सत्तं तं यद्यनेन तत्रोपमा
नार्थो मत्यः। मातापुत्रेणेत्यादिना मर्यादावचनं व्यनक्ति। तत्पुत्रेणापीति एतावद्द्वयमन्ना मायुः। द्वंद्वं व्युत्क्रांता इति। द्वौ यद्द्वौ भूत्वा पृथगवस्थिता
इत्यर्थः। स्वार्थे द्विर्वचनमेकवद्भावश्चेति। द्वंद्वं यज्ञपात्राणि प्रयुनक्तीत्यादयति स्थविरपि भूतानि अवाग्विलानि द्वंद्वं स्फ्यश्च कपालानि चेति द्वे द्वे इत्य

द्वंद्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु॥ ॥द्वंद्वमिति। द्विशब्दस्य द्विर्वचनं निपात्यते पूर्वपदस्याम्भावः अ १८
त्वं चोत्तरपदस्य। रहस्य। मर्यादावचन। व्युत्क्रमण। यज्ञपात्रप्रयोग। अभिव्यक्ति। इत्येतेष्वर्थेषु। तत्र रहस्यं द्वंद्वशब्दवाच्यं इतरे विषय
भूताः। द्वंद्वं मंत्रयते। मर्यादावचने। मर्यादा स्थित्यनतिक्रमः। आचतुरं हीमे पशवो द्वंद्वं मिथुनीयंति। मातापुत्रेण सह मिथुनं गच्छ
ति पौत्रेण प्रपौत्रेण तत्पुत्रेणापीति। व्युत्क्रमणे। द्वंद्वं व्युत्क्रांताः। व्युत्क्रमणं भेदः पृथगवस्थानं। द्विवर्गसंबंधेन पृथगवस्थिता द्व
द्वं व्युत्क्रांता इत्युच्यते। यज्ञपात्रप्रयोगे। द्वंद्वं न्यंचि पात्राणि प्रयुनक्ति धीरः। अभिव्यक्तौ द्वंद्वं नारदपर्वतौ। द्वंद्वं संकर्षणवासुदेवौ।
द्वावभिव्यक्तौ साहचर्येणेत्यर्थः। अन्यत्रापि द्वंद्वमित्येतद् दृश्यते तदर्थं योगविभागः कर्तव्यः। द्वंद्वं युद्धं वर्तते। द्वयोर्द्वयोर्वर्तत इत्यर्थः।
द्वंद्वानि सहते। चार्थे द्वंद्व इति॥ ॥पदस्य॥ ॥पदस्येत्ययमधिकारः प्रागपदांताधिकारात्। यदित ऊर्ध्वमनुक्रमिष्यामः पदस्य
सेवं तद्वेदितव्यं। वसु स्रतिसंयोगांतस्य लोपः पचन्। यजन्। पदस्येति किं

र्थः। अत्र वीप्सायां द्विर्वचनं अम्भावादि एकवद्भावश्च। द्वावभिव्यक्तौ साहचर्येणेत्यर्थ इति। अत्र स्वार्थे द्विर्वचनं एकवद्भावादिकं सर्वं निपात्यते। द्वंद्वयु
द्धमिति। अत्रापि वीप्सायां द्विर्वचनं। द्वंद्वानि सहंत इति। शीतमुष्णं चेत्येकं द्वंद्वं सुखदुःखे रागापरं क्षुत्तृष्णे चापरं। अत्रापि स्वार्थे द्विर्वचनमेकवद्भावा
दि तत्रैकशेषवशाद्बहुत्वं। चार्थे द्वंद्व इति। द्वे चार्थे निर्दिष्टे यदे समस्ते द्वंद्वः अत्रापि स्वार्थे द्विर्वचनादि पुंस्त्वं च॥ ॥पदस्य॥ ॥प्रागपदांताधिकारा
दिति। अपदांतस्य मूर्धन्य इत्यत्र तु प्रकरणेविरोधेन पदाधिकारान्नाधिक्रियते। पचंतौ यजंताविति। एवं राजानाविरत्यत्र न लोपो न भवति प्रशामादिस्वादौ
मो नो धातोरिति मत्वं न भवति। अनंतरे प्रयोगे षष्ठ्यर्थं त्विनादेः सुबंतस्य निर्देशः तस्य च पदस्यैव कार्यविधानात्ते माषु लंब्धं। नन्व समर्थपरिभाषोपस्था
ने ते प्रयोजनं चेतरेणाप्येतं वस्तुतः पदकार्यत्वादेव सिद्धेः। किं च समानवाक्ये निघातयुष्मदस्मदादेशा इति वक्ष्यते। कुलादीनि तु वयवस्य भत्वे पि सम

स्को·प·१

१३

षष्ठीस्थानेयोगेतिवचनात्सर्वेतिस्थानषष्ठीत्तं तत्त्वउदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्येत्यस्याप्ययमर्थोभवतिउदात्तस्वरितयोर्यणनतःपरो
योनुदात्तः तदंतस्य पदस्यस्वरितत्वमलोन्त्यस्यभवतीतितश्चात्रैवस्यात कुमार्यावितिकुमार्यैदस्यत्रनस्यात मकारोहयत्रपदस्यांतः हलस्वरप्राप्तौच
अंतेनमविद्यमानवद्भवति। एवमेकादेश उदात्तेनोदात्तः स्वत्रापि अपमर्थोभवति उदात्तानुदात्तयोर्य एकादेशस्तदंतस्य पदस्यालोन्त्यस्योदात्त
आदेशोभवतीतितनस्त्रैहैवस्याद्दूत्यावितित्र क्षानिस्तत्र नस्यात्तनकारोहयत्रपदस्यांत्यस्त्रस्वाशंसाहवस्समाणान्नायेक्षयेति। अयमभिप्रायः अ
धिकारोयंयदर्थः परिभाषाविपर्यासातेतस्त्वगुणानांच परार्थत्वादसंबंधः समत्वात्स्यादितिन्यायेननात्रस्थानेयोगपरिभाषोपतिष्ठतेयत्रत्वस्या
अधिकारोवस्समाणेषुवाक्येषुतेष्वेवोपस्थानंतत्रवविशेषणाविशेष्यभावेकामचारापुणेकादेशस्वरयोः पदस्येसनुदात्तंकापिविशेषणार्थेन

वक्ष्यमाणवाक्यायेक्षणायदस्येत्यधिकृतस्यषष्ठ्यर्थमवस्थादुक्ष्मा· क्वचित्स्थानषष्ठी क्वचिदवयवषष्ठीति॥ ॥पदात्॥ ॥प
दादित्ययमधिकारः प्राकुत्सनेचसुप्यगोत्रादाविवेतस्मात्· पदात् ऊर्ध्वमनुक्रमिष्यामः पदादित्येवंतद्वेदितव्यं वक्ष्यति आमंत्रित
स्यपदात्परस्यामंत्रितस्यानुदात्त आदेशोभवतीति· पचसिदेवदत्त· पदादितिकिं देवदत्तपचसि॥ ॥अनुदात्तंसर्वमपादादौ॥
॥अनुदात्तमितिचसर्वमितिच अपादादाविति च एतत्त्रयमधिकृतंवेदितव्यमापादपरिसमाप्तेः इतउत्तरंयद्वक्ष्यामः अनुदात्तंसर्व
मपादादावित्येवंतद्वेदितव्यं· वक्ष्यति आमंत्रितस्येति· पचसिदेवदत्त· अपादादाविति किं यज्ञेनियतंसरसंमृष्टोत्रनवश्रेष्ठ्य· बहूनच्च
नस्यवहत्रसो· ग्रामोवः स्वं· जनपदोनः स्वं· अपादादाविति किं· रुद्रोविश्वेश्वरो देवो युष्माकं कुलदेवता· सएवनाथो भगवानस्माकं
शत्रुमर्दनः। पादइत्यत्र अकपादः श्लोकपादश्चगृह्यते· १३

तुकार्यप्रतिपत्त्यर्थेति नयदाचपवरत्नुदात्तैकादेशयोः स्वरविधानादनंतस्यपिभवति। संयोगांतलोपादौतु संयोगादिनापदस्यविशेषणात्। स्थानष
ष्ठीतस्माद्वक्ष्यमाणानि वाक्यान्यपेक्ष्यपर्यालोच्यपदस्येतिषष्ठ्या अर्थाव्यवस्थाप्यः नत्वेतत्तत्रपर्यालोचनमेति। व्यवस्थामेवदर्शयति क्वचिदिति।
यथेयास्थानषष्ठ्येवस्यात्र लोपः प्रातिपदिकांतस्येत्यत्रांतग्रहणमनर्थकंस्यात् नर्हिपदांतस्य यथास्यात्पदावयवस्यमाभूदित्येवमर्थंस्यानमष्ठ्या
त्वलोन्त्यस्येत्यस्यसिद्धत्वादंतग्रहणमनर्थकं स्यात्तस्मादंतग्रहणात्क्वचिद्विशेषणषष्ठ्यपिविज्ञायते॥ ॥पदात्॥ ।प्राकुत्सनेवसुप्यगोत्रादाविते
तस्मादित्तिं।यदित्वअपदादित्येतदनुवर्तेतयस्वतिभ्रतीसत्रैवतिउं· लस्यनियातः स्यान्नत्तुपचतिप्रतीत्यत्र॥ ॥अनुदात्तं॥ ॥यज्ञेनियतमि
त्यादि। अत्रमृत्योरस्यपादादौनिधानाभावः। यदगदात्तुपेत्वं श्लोकः पादः अग्नेस्यपरः अग्नेभद्रंकरिष्यसीत्यादीनिवोदाहरणानि। रुद्रोविश्वे

रुद्रस्याहि। अत्र युष्माकमस्माकमित्यनयोरादेशाभावः। अकपादः श्लोकपादश्च गृह्यते इति विशेषानुवादानात् १३

राम॰ १३

अथ सर्वग्रहणं किमर्थं यावतानुदात्तं पदमेकवर्ज्जमिति वचनादेकस्मिन्पदे एकोदात्तः स्वरितो वा स्वं भवति। ये तु शुद्धाः त्र्याद्युमेव नस्य स्यादिषुषु
णपदिति न तेषामत्र प्रकरणे ऽन्यविदनुदात्तत्वं विधीयते। यदा तु तेषामामन्त्रितत्वं तदाद्युदात्तत्वमेवाष्टकं तर्हि प्रयोजनमनादेरप्युदात्तस्यानुदात्त
त्वं यथा स्यात्। अन्यथा पदादिष्वधिकारादादेः परस्येत्यादेरेव स्यात् ततश्च तिङ्ङतिङः इति इहैव स्यात् देवदत्तः पचतीति। अवहि शप्रिया
वनुदात्तो धातोः स्वरः। इह तु न स्यात् देवदत्तः करोतीति। विकरणस्वरेणामध्योदात्तमेतत्पदं सर्वग्रहणेनु सति परस्य सर्वमेव पदानुदात्तं भ
वतीत्यर्थः संगच्छते। लुङि प्रतिषेधात्सिद्धं यदयं न लुङिति प्रतिषेधं शास्ति तत् ज्ञापयति नात्रादेः परस्येत्येतदुपस्थितमिति। नहि लुङन्तं कि
चिदाद्युदात्तमस्ति। एवमपि ज्ञापके नायमर्थो ऽ आदिविधावपनीतेऽलोऽन्त्यस्येव स्यादभोकुरुतरस्याद्यो अत्र लसार्वधातुकस्य प्रत्ययस्व
रेणोदात्तत्वं विकरणस्य तु शेषनिघातः। न च विकरणस्वरः सतिशिष्टोऽपि सार्वधातुकस्वरं बाधते नाम। लसार्वधातुकानुदात्तत्वविधानसा
पनात्। एवं तर्हि लुङि प्रतिषेधात्सिद्धं यदयं गतस्वर्थे लोटा लुङा न वेदिति लुङं तस्य प्रतिषेधं शास्ति तत् ज्ञापयति नात्रानोऽन्त्यस्येति सेत्तव्या

सर्वग्रहणं सर्वमनघमानं विधीयमानं चानुदात्तं यथा स्यादिति ॥ ० ॥ श्री ॥ ॥

प्रिपतत्यति न हि लङन्तं किंचिदन्तोदात्तमस्ति। अदुपदेशाल्लसार्वधातुकं निहन्यते नैतदस्ति ज्ञापकमिदर्थमेतत्स्यात् भोस्वहति। एतच्चो
कादेशस्वरेणान्तोदात्तं। एवं तर्हि उक्तमेतत्सदस्येति किंचिद्विशेषणषष्ठ्यपि भवति निस्थाने षष्ठ्येवेति ततः किमनुदात्तविधौ विशेषणषष्ठ्याश्र
पिष्यते तत्सामानाधिकरण्यात्तिङि। तिषष्ठ्यर्थे प्रथमा तिङः तस्यादस्यावयवो ज्ञवदात्तो भवतीत्यर्थः। तत्र स्थानषष्ठ्यभावात् लोऽस्येति
न प्रवर्तते तस्मा आर्थः सर्वग्रहणेनेसत आह। सर्वग्रहणमित्यादि। असति सर्वग्रहणे पत्र विधेयोऽन्तरं नास्ति आमन्त्रितस्येत्यादौ तत्रैवानुदा
त्तत्वं विधीयेत न तत्रक्षेत द्विधा नार्थ मामन्त्रिता घनुयते विधेयोऽनारसङ्गावे तु न तस्यानुदात्तत्वं विधीयेत तत्र मे मे इत्यसंगात्। तथा हि सिद्धस्य वस्तुतो
धर्मान्तरं शमनेविधातुं नासिद्धस्यन स्वस्य निकुञ्जे चित्रकर्म तत्तश्च वा नाका दृष्ट एकेन वा सेन विधेया अपरेणातेषामनुदात्तत्वमिति वाक्यभेदः
विशिष्टविधाने प्यनेष्य नेकार्थविधानाद्विधियोगे खलक्षणो वाक्यभेदः स्यादेव। संभवस्येकवाक्यत्वे वाक्यभेदश्च नेष्यते। सति तु सर्वग्रहणेन
साम र्थ्याद्वाक्यभेदः सह्यत इत्याह॥ ॥

भेनेति। प्रयोजनांतरमाह युष्मदस्मदादेशाश्चेति। पदस्य सुबंतस्य यथा स्युरिति। अन्यथा केवलयोर्युष्मदस्मदोरेव स्युः षष्ठ्येकवचने ङस् सो
शिङ. सिङ. सोऽश्वेति एवं कादेशे यद्यपि दोषाभावस्तथापि वचनांतरेषु दोषप्रसंगः। सर्वग्रहणेनु मतियुष्मदस्मदोतद्वपकं पदं लक्षत इति
सर्वस्य पदस्य वांनावादयो भवंतीति। ननु पदस्येति वर्त्तते विभक्त्यंतं च पदं तत्रांतरेणापि सर्वग्रहणं विभक्त्यंतस्य भविष्यंत्यत आह यत्रापीति। भवे

तेन युष्मदस्मदादेशानामपि वाम्भेदेनानुदात्तत्वं विधीयते युष्मदस्मदादेशाश्च सर्वस्य सुबंतस्य यथा
स्युरिति. यत्रापि स्वादिसंभवति ग्रामो वां दीयते. ग्रामो नो दीयते॥ ॥आमंत्रितस्य॥ ॥आमंत्रितस्य पदस्य
यदा सर एष्याया दादौ वर्त्तमानस्य सर्वस्यानुदात्तो भवति. पचसि देवदत्त. आमंत्रिताद्युदात्तत्वे प्राप्ते वचनं।
१४ ॥श्रीरामचंद्राय नमः॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥श्री॥

देवं यत्र विभक्त्यंतं पदं यत्र तु विभक्तौ पदं तत्र युष्मदस्मदोरेव प्रसंग इत्यर्थः। ग्रामो वां दीयत इति चतुर्थी द्विवचने स्वादिष्विति सर्वं पदं भवति॥
॥आमंत्रितस्य॥ ॥सर्वमनुदात्तं भवतीति। आमंत्रितसंबंधिनः सर्वे चोनुदात्ता भवंतीत्यर्थः। एतच्चानुदात्तत्वस्य सर्वशब्दस्यान्वयमात्रं प्रद
शितं न त्वत्रास्योपयोगः कश्चित् १४ ॥श्रीरामनामसत्य॥ ॥

समानवाक्य इत्यादि। अर्थैकत्वादिकं लौकिकं वाक्यलक्षणं इह तु पारिभाषिकं वाक्यमाख्यातं साव्ययकारकविशेषणं वाक्यमिति। आख्यात
मित्येकत्वं विवक्षितं निमित्तनिमित्तिनोः समान एकस्मिन्वाक्ये आधारभूते सन्निघाताद्यो भवन्तीति वक्तव्यं। किमर्थमित्याह इहेति। भवती
ह विष्णुमित्रो देवदत्तागच्छेति। वाक्यद्वयमेतत्तिङ्द्वययोगात् । तत्र देवदत्तेत्यस्यामन्त्रितस्य निघातो न भवति। ननु च पदाद्विधिरयं तस्मात्समा
मर्थ्यादेवात्र न भविष्यति। अस्त्यत्र सामर्थ्यं विष्णुमित्रमविष्यानयन्नागच्छन्तं देवदत्तं प्रतीदमुच्यते तेन अश्वविष्णुमित्रस्येह भवनं देवदत्तस्यागमन
स्य हेतुत्वेनोच्यत इत्यस्त्यपेक्षा क्वचिदेतदुदाहरणं न युज्यते। अपरं इति। अस्ताति गम्यमानत्वादेतदनेकं वाक्यं अत्राप्यनेनेति सर्वनाम्नाप

समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः इह मा भूवन् · भवतीह विष्णुमित्रो देवदत्तागच्छ अयं दण्डो हराने
न · ओदनं पचतव भविष्यति · ओदनं पच मम भविष्यति · इह वयं ध्यास्यात · इह देवदत्त माता ते कथयति नेघा
स्त्रिष्ठ निकूले शालीनां त ओदनं दास्यामीति · आमन्त्रितान्तं तिङन्तं युष्मदस्मच्छब्दौ च पदस्मात्परादसमासेन न
तेषां सामर्थ्यमिति तदाश्रया निघातयुष्मदस्मदादेशा न स्युः समर्थः पदविधिरिति वचनात् ॥ ॥छ॥ ॥

रामरक्ष स्पष्टं उपस्कारणत्वादस्ति सामर्थ्यमिति तिङः तस्य निघातप्रसंगः। ओदनं पचेति।। च त्वकर्तृकत्वेन त्वत्स्वामिको मत्स्वामिकश्चौद
नो भविष्यतीत्येवं वाक्यस्य युष्मदस्मदर्थस्य चापेक्षात्वात्तत्सादेशप्रसंगः एवमतिप्रसंगपरिहारः प्रयोजनमित्युक्तं इदानीमसमासेऽपि परिहा
रोऽपि प्रयोजनमित्याह इह चेति। किं पुनः कारणमेषूदाहरणेषु निघातादयो न स्युरित्यत आह आमन्त्रितमित्यादि। इह स्थिता माते त्यन्वयो
न त्विह देवदत्तेनेति निघाः कूलमित्यन्वयो न तु नघास्तिष्ठतीति। शालीनामोदनमित्यन्वयो न शालीनां त इति न तच्चासामर्थ्यान्न स्युरित्यर्थः।।

॥२ ३॥ ॥३ ३॥ ॥

॥युष्मदस्मदोः षष्ठीद्विवचनांतयोरेवेति। तेन वचनांतरे नोदाहृतमिति भावः। स्थग्रहणमनर्थकं षष्ठ्यादिष्वादेशविधानादेव तावत्स्थसिद्धेरित्यत आह स्थग्रहणमिति। श्रूयमाणविभक्तिकयोरेवादेशा यथा स्युर्लुप्तविभक्तिकयोर्माभूवन्नित्यर्थः। श्रूयमाणा हि विभक्तिस्तत्स्थत्वं भवति न

॥युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ॥ ॥युष्मद् अस्मद् इत्येतयोः षष्ठीचतुर्थीद्वितीयास्थयोर्यथासंख्येन वान्नौ इत्येतावादेशौ भवतस्तौ चानुदात्तौ भवतः ग्रामो वां स्वं· जनपदो नौ स्वं· ग्रामो वां दीयते· जनपदो नौ दीयते· ग्रामो वां पश्यति· जनपदो नौ पश्यति· पदस्य पदात् अनुदात्तं सर्वमपादादाविति सर्वमिह संबध्यते· एकवचनांतबहुवचनांतयोरादेशांतरविधानाद्द्विवचनांतयोरेवादेशौ भवत इति विज्ञायते। षष्ठीचतुर्थीद्वितीयास्थयोरिति किं· ग्रामो युवाभ्यां कृतः स्थग्रहणं श्रूयमाणविभक्तिप्रतिपत्त्यर्थं· इह माभूत्· इति युष्मत्पुत्रः इति अस्मत्पुत्रः॥ ॥बहुवचनस्य वस्नसौ॥ ॥बहुवचनांतयोर्युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वस् नस् इत्येतावादेशौ भवतस्तौ चानुदात्तौ भवतः ग्रामो वः स्वं· जनपदो नः स्वं· ग्रामो वो दीयते· जनपदो नो दीयते· ग्रामो वः पश्यति· जनपदो नः पश्यति॥ ॥तेमयावेकवचनस्य॥ ॥युष्मदस्मदोरेकवचनांतयोः षष्ठीचतुर्थीस्थयोस्ते मे इत्येतावादेशौ भवतः तौ चानुदात्तौ भवतः ग्रामस्ते स्वं· ग्रामो मे स्वं· ग्रामस्ते दीयते· जनपदो मे दीयते· द्वितीयांतयोरादेशांतरविधानात् षष्ठीचतुर्थ्योरयं योगः॥ ॥त्वामौ द्वितीयायाः॥ ॥

पुनर्लुप्तायां प्रत्ययलक्षणेनापि कार्यं शास्त्रं वातिदिश्यते न तावत्स्थं। यदि वा निष्पत्तिरपसविहानावपि दृष्टः यथा समये तिष्ठत्युग्रीवे ति समयं मा विहासीरित्यर्थः। तेनायमर्थः षष्ठीचतुर्थीद्वितीयास्थ अविज्ञहतोर्युष्मदस्मदोरादेशा भवंतीति इति युष्मत्पुत्र इति। इति शब्दस्तयोः षष्ठ्यंतयोर्युष्मदस्मदोः प्रत्ययलक्षणेन वान्नावौ न भवतः १५

द्वितीयायाय देकवचनांतयोर्युष्मदस्मदोस्त्वामा इत्येतावादेशौ भवतः तौ चानुदात्तौ भवतः ग्रामस्त्वा पश्यति ग्रामो मा पश्यति १५ ॥
राम० १५

नत्वग्रा॥ ।।चः समुच्चये वा विकल्पे ह अहे सम्बुद्धौ खेदे च एवावधारणे। एभिर्युक्ते इति। एभिर्योगे सतीत्यर्थः। षष्ठ्या एभिर्युक्ते युष्मदस्मदोर्थे इत्यर्थः। युक्तग्रहणा
न च वा हा हैव युक्ते· च वा· ह· अह· एव· एभिर्युक्ते युष्मदस्मदोर्वान्नावादयो न भवंति· ग्रामस्तव च स्वं· ग्रामो मम च स्वं· ग्रामो युवयोश्च स्वं ग्राम आ
वयोश्च स्वं· ग्रामो युष्माकं च स्वं अस्माकं च स्वं· ग्रामस्तुभ्यं च दीयते· ग्रामो मह्यं च दीयते· युवाभ्यां च दीयते आवाभ्यां च दीयते· युष्मभ्यं दीयते अ
स्मभ्यं च दीयते· ग्रामस्त्वां च पश्यति ग्रामो मां च पश्यति· युवां च पश्यति आवां च पश्यति· युष्मांश्च पश्यति अस्मांश्च पश्यति। वा· ग्रामस्तव वा
स्वं ग्रामो मम वा स्वं· युवयोर्वा स्वं आवयोर्वा स्वं· युष्माकं वा स्वं· ग्रामस्तुभ्यं वा दीयते ग्रामो मह्यं वा दीयते· युवाभ्यां वा दीयते आवाभ्यां वा दी
यते युष्मभ्यं वा दीयते अस्मभ्यं वा दीयते· ग्रामस्त्वां वा पश्यति ग्रामो मां वा पश्यति नु युष्मांश्च पश्यति अस्मांश्च पश्यति। ग· ग्रामस्तव वा स्वं ग्रा
मो मम वा स्वं· युवयोर्वा स्वं आवयोर्वा स्वं· युष्माकं वा स्वं अस्माकं वा स्वं· ग्रामस्तुभ्यं वा दीयते ग्रामो मह्यं वा दीयते· युवाभ्यां ह दीयते आवाभ्यां ह
दीयते· युष्मभ्यं ह दीयते· ग्रामस्त्वां ह पश्यति ग्रामो मां ह पश्यति· युवां ह पश्यति आवां ह पश्यति· युष्मान् ह पश्यति अस्मान् ह पश्यति।
अहः ग्रामस्तवाहस्वं ग्रामो ममाहस्वं· युवयोरहस्वं आवयोरहस्वं· युष्माकमहस्वं अस्माकमहस्वं· ग्रामस्तुभ्यमेव दीयते ग्रामो मह्य
मेव दीयते· युवाभ्यामेव दीयते आवाभ्यामेव दीयते· युष्मभ्यमेव दीयते अस्मभ्यमेव पश्यति ग्रामो मामेव पश्यति· युवामेव पश्यति
आवामेव पश्यति· युष्मानेव पश्यति अस्मानेव पश्यति॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥ह्॥
श्रीरामचंद्राय नमः॥ ॥श्रीः॥ ॥

मनर्थकं त्वतीया निर्दिष्टा एवमसिद्धं यथा तुल्यार्थैरतुलोपमाभ्यामिसत्रेमत आह॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥श्रीः॥ ॥

का॰ प॰ १
१६

युक्तग्रहणमिति। यदा युष्मदस्मदर्थे गतान्यसमुच्चयादीश्चादयो योगतया निर्दिश्यन्ते तेषां योगः तत्रैवायं प्रतिषेधो यथा स्यात् युक्तेमा
भूदित्येवमर्थं युक्तग्रहणमित्यर्थः एतदेव युक्तग्रहणं ज्ञापकमत्र प्रकरणे युक्तयुक्तयुक्तस्यापि ग्रहणमिति। तेनोत्तरः प्रतिषेधो युक्तयुक्तेपि
भवति॥ ॥पश्यार्थैश्चानालोचने॥ ॥दर्शनं यस्य अस्मादेव निपातनाद्भावे शप्रत्ययः पाघ्राध्मेत्यत्र पश्यादेशः पश्यार्थे येषां तेय

॥युक्तग्रहणं साक्षाद्योगप्रतिपत्त्यर्थं युक्तयुक्ते तु प्रतिषेधो न भवति· ग्रामश्च ते स्वं नगरं च ते स्वं॥ ॥पश्यार्थैश्चाना
लोचने॥ ॥पश्यार्था दर्शनार्थाः॥ ॥दर्शनं ज्ञानं· आलोचनं चक्षुर्विज्ञानं· तैः पश्यार्थैरनालोचने वर्त्तमानैर्युक्तेवा
आवादयो न भवंति· ग्रामस्त्वा समीक्ष्यागतः ग्रामो मह्यं दीयमानं समीक्ष्यागतः अनालोचन इति किं ग्रामस्त्वा पश्यति
ग्रामो मा पश्यति· पश्यार्थैर्युक्तयुक्ते च प्रतिषेध इष्यते· तथा चोदाहृतं १६ ॥ ॥श्रीरामचंद्राय नमः॥ ॥श्रीः॥
॥श्रीकृष्णाय नमः॥ ॥छ॥ ॥

श्यार्थाः तदाह पश्यार्था दर्शनार्था इति। यदि तु पाघ्राध्माधेट्दृशः ३।१इति कर्त्तरि शप्रत्ययः स्यात्तदा तेो द्रष्टृभिरित्यर्थः स्यात् तथा चालोच
नयर्युदासोनर्थकः स्यान्न ह्यालोचनार्था द्रष्टारो भवंति। दर्शनं ज्ञानमिति। यद्यपि दृशिश्चक्षुर्विज्ञाने प्रसिद्धः तथापि तस्य पर्युदासात् ज्ञान
मात्रे दृशिरिह वर्त्तत इत्यर्थः ग्रामो जनसमुदायः समीक्ष्य मनसा निरूप्येत्यर्थः १६ ॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥ राम॰
१६

॥सपूर्वायाः प्रथमायाः॥ ॥विद्यमानपूर्वादिति। येन सहेति तुल्ययोग इत्यत्र तुल्ययोग इत्युपाधेः प्रायिकत्वाद्विद्यमानवचनस्यापि सहशब्दस्य
समासः वोपसर्जनस्येति सभावः। युष्मदस्मदोर्विभाषानन्वादेश इति। येयं युष्मदस्मदोर्विभाषा सानन्वादेशे भवति अन्वादेशे तु नित्यया देशविधि
रित्यर्थः। अपर आहेति पूर्वस्यैव वाक्यस्याख्यानान्तरं। पूर्वविभाषानुवादे न विषयो नियम्यत इत्युक्तं इदानीं विशिष्टे विषये विकल्प एव वि

सपूर्वायाः प्रथमाया विभाषा॥ ॥विद्यमानपूर्वात्प्रथमान्तात्पदादुत्तरयोर्युष्मदस्मदोर्विभाषा वान्नावादयो न भवन्ति। ग्रामे
कंबलस्ते स्वं· ग्रामे कंबलो मे स्वं· ग्रामे कंबलस्तव स्वं· ग्रामे कंबलस्तव स्वं· ग्रामे छात्रास्त्वा पश्यन्ति· ग्रामे छात्रा मां पश्यन्ति। सपूर्वा
याः इति किं कंबलस्ते स्वं कंबलो मे स्वं। प्रथमाया इति किं कंबलो ग्रामे ते स्वं कंबलो ग्रामे मे स्वं। युष्मदस्मदोर्विभाषा अनन्वादेशे
इति च वर्त्तते इह माभूत्· अथो ग्रामे कंबलस्ते स्वं अथो ग्रामे कंबलो मे स्वं। अपर आह· सर्व एव वान्नावादयोऽनन्वादेशविषये
विभाषा वक्तव्याः। कंबलस्ते स्वं· कंबलस्तव स्वं· न तर्हीदानीमिदं वक्तव्यं सपूर्वायाः प्रथमाया विभाषेति· वक्तव्यं च· किं प्रयो
जनं अन्वादेशार्थं अन्वादेशे विभाषा यथा स्यादिति· अथो ग्रामे कंबलस्ते स्वं अथो ग्रामे कंबलो मे स्वं· अथो ग्रामे कंबल
स्तव स्वं अथो ग्रामे कंबलो मम स्वं। तदयमत्र विभागः अनन्वादेश इति किं· अथो ते कंबलः स्वं अथो मे कंबलः स्वं॥ ॥

धीयते न केवलं सूत्रोक्ते विषये प्राप्ता एव विकल्प्यन्ते अपि तु सर्वे सर्वविषया इत्यर्थः। न तर्हीदानीमिति। वक्तव्येनैव सिद्धत्वादिति भावः।
अ·न्वादेशार्थमिति। ननु पूर्वमन्वादेशे सूत्रं नाश्रियत इत्युक्तमिदानीं तु तत्रैवाश्रियत इत्यसमञ्जसं तत्कोऽत्र निर्णय इत्याह तदयमत्र विभाग
इति। दितितत्रेत्यर्थः। वाक्योपमासेवा। पूर्वामात्मापरपात्मा एष्मया· वाक्यान्तर इत्यर्थः॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

१का०प०१ ॥तिङ्ङोगोत्रादीनि॥ ॥पचतिगोत्रमिति। पचिरत्र स्त्रीमात्रे। पश्यालोकपङ्क्तिरिति। भोजनार्थं गोत्रं ख्यापयतीत्यर्थः। एवं हि कुत्सा भव
२७ ति। पचति पचति गोत्रमिति। विवाहविषये पुनः पुनर्गोत्रं ख्यापयतीत्यर्थः। तत्र कुत्सा या आभावादाभीक्ष्ण्यग्रहणं। नित्यवीप्सयोरिति द्विर्वच
नं ब्रुवः शब्दः कुत्सितवचनः अत एवास्याभीक्ष्ण्येऽर्थे उदाहरणं न प्रदर्शितं। पचति प्रवचनमित्यादावात्मप्रशंसया कुत्सा। प्रवचनमध्यापनं
वा नामेति निपातस्त्वं मा चष्टे नामेत्येतदिति। पचति पापमिति। पापमिति क्रियाविशेषणं। खनति गोत्रं समेत्य कूपमिति। गोत्रं कुलं समुद्दि

तिङ्ङोगोत्रादीनि कुत्सनाभीक्ष्ण्ययोः॥ ॥तिङ्‌न्तात्पराणि गोत्रादीनि कुत्सने चाभीक्ष्ण्ये चार्थे अनुदात्तानि भवन्ति· पच
ति गोत्रं जल्पति गोत्रं। आभीक्ष्ण्ये· पचति २ गोत्रं· जल्पति २ गोत्रं। गोत्र· ब्रुवः प्रवचनः प्रहसन· प्रकथन· प्रत्ययनः
प्रपञ्चन· प्राय· न्याय· विचक्षण· अवक्षण· स्वाध्याय· भूयिष्ठ· वा नाम· नामेत्येतदभिहृत्यतेय स्तेऽभ्याधुदात्तत्वमेव
भवति· पचति नाम· पचति नाम· तिङ· इति किं· कुत्सितं गोत्रं· गोत्रादीनीति किं· पचति पापं। कुत्सनाभीक्ष्ण्ययोरिति
किं· खनति गोत्रं समेत्य कूपं। कुत्सनाभीक्ष्ण्यग्रहणं चेतद्गोत्रादीनां पाठविशेषणं द्रष्टव्यं· तेनान्यत्रापि गोत्रादिग्रहणे
कुत्सनाभीक्ष्ण्ययोरेव कार्यं भवति २७ ॥ ए०प्र०
भूत्वा कूपं खनतीत्यर्थः। किमिदं कुत्सनाभीक्ष्ण्यग्रहणं गोत्रादीनां पाठविशेषणं। एतयोरर्थयोर्गोत्रादीनि भवन्ति तानि च तिङः परा(ण्य)
नुदात्तानि भवन्तीति। आहोस्विदनुदात्तविशेषणं तिङः पराणि गोत्रादीनि अनुदात्तानि भवन्त्येतयोरर्थयोरिति। अस्मिन् विचारे निर्णयमा २७
ह कुत्सनाभीक्ष्ण्यग्रहणं चेति। पचनमिति पाठः संनिवेशविशेषः तस्य विशेषणं वेदितव्यं। अयं चार्थो योगविभागाल्लभ्यते। तिङो गोत्रा
दीनीत्येको योगोऽनुदात्तविधानार्थः कुत्सनाभीक्ष्ण्ययोरिति द्वितीयो गोत्रादीनीत्येव परिभाषेयं इह शास्त्रे गोत्रादीनि कुत्सनाभीक्ष्ण्यविष
याण्येव ग्राह्याणीति तेन न किं सिद्धं भवतीत्याह तेनेति। अन्यत्रापीति। चन चिदिव गोत्रादि तद्धितानीति थगतौ इत्यत्र कुत्स २७ नेच स्तुथगो

तिङ् तिङः॥ ॥भवति पचतीति। पचतीत्येतद्भवतिपाकक्रिया भवतीत्यर्थः। तत्र साध्यसाधनभावेन द्वयोः क्रिययोरन्वयात् अस्ति सामर्थ्यं यथोक्तंप
ध्यादिक्रिया भवति क्रियायाः कर्त्री भवंतीति। तत्र पाकस्य स्वसाधनानिष्पत्तिसाध्यस्यापि भवनं प्रतिसिद्धत्वं यथाह। तत्र यं प्रति साध्यत्वं मम सिद्धा तेप्र
ति क्रिया। सिद्धा तु यस्मिन् साध्यत्वं न तमेव ब्रुवतः प्रतीति। अस्त्येतत्। किं तर्हि तिङ्ग्रहणमनर्थकं समानवाक्याधिकारात् समानवाक्ये इति वर्त्तते न चै
कस्मिन्वाक्ये तिङंतद्वयमस्ति तदुक्तं पुरस्तात्। सूत्रकारेण तु समानवाक्याधिकारो न कृत इत्यतस्तिङ्ग्रहणमकारि॥ ॥न लुट्॥ ॥श्वः कर्त्तास्मि।

तिङ् तिङः॥ ॥तिङंतं पदमतिङंतात्पदात्परमनुदात्तं भवति· देवदत्तः पचति· यज्ञदत्तः पचति· तिङि· तिकिं नीलमुत्पलं· अति
ङ इति किं भवति पचति॥ ॥न लुट्॥ ॥लुडंतं तिङंतं नानुदात्तं भवति· श्वः कर्त्ता· श्वः कर्त्तारौ· श्वः कर्त्तारः। मासेन कर्त्ता· तासेः प
रस्य लसार्वधातुकस्यानुदात्तत्वे सति सर्वत्र तासिरेवोदात्तः यत्र तु टिलोपस्तत्रोदात्तनिवृत्तिस्वरो भवति॥ ॥निपातैर्यद्यदिहंतकु
विन्नेच्चेच्चण्कच्चिद्यत्रयुक्तं॥ ॥नेति वर्त्तते· यद्· यदि हंत· कुविन्· नेत्· चेत्· चण्· कच्चित्· यत्र· इत्येतैर्निपातैर्युक्तं तिङंतं
नानुदात्तं भवति· यत्करोति· यत्पचति· यदि· यदि करोति· यदि पचति· हंत करोति· हंत पचति। कुविन्· कुविल्करोति· कुवि
त्पचति· नेत्· नेत्· नेज्जिह्मायंत्यो नरकं पताम· चेत्· स चेद्भुंक्ते· स चेदधीते· चण्· गोद्विशिष्ठोयं चेदर्थे वर्त्तते· अयं च म
रिष्यति अयं चेन्मरिष्यतीत्यर्थः॥ ॥छ॥ ॥

अथात्र निघाते प्रतिषिद्धे कः स्वरः अप्रत्तस्याहतासेः पास्येति॥ ॥निपातैर्यद्यदिहंत॥ ॥यद्यदर्थे चहेत्तो व विचारे यदि चेद्वणः॥ हंत हर्षे
नुकंपायां वाक्यारंभविषादयोः। कच्चित्प्रश्ने नेन्निषेधे प्रशंसायां कुवित्स्मृतः। यत्राधारे निपातत्वं यदादीनां विशेषणं। समासे गुणभूतानामपि
गत्यंतरं नहि। नेव वाक्यसमासः सुबंतमयत्वे न लुप्यते। तत्र बद्धवाने च्चेदिति निपातसमाहारमधीयते ने दे वमा ऽ नजन्तत्र देवाः अस्य स्वेत्राभिग
च्छु तांति। चेदर्थे वर्त्तत इति। पमेव समुच्चयादिषु दृष्टश्चशब्दः स एव चेदर्थे वर्त्तते तदर्थवृत्तिनस्तु विच्छेदणकारः तथा च चादयो नुदात्ता इत्यस्य चे
दर्थोप्यनुदात्तः इंद्रश्च मृलयाति नः इंद्रश्चेदस्मान्मृडयेदित्यर्थः। त्वं च सोम नो वशः हे सोम त्वं चेदस्माकं जीवातुं वशः उश्याः कामयेथा इत्यर्थः॥

८अ०पा०१ समुच्चयादिषु यश्च शब्द इति। एष्वर्थेषु न भवतीत्यर्थः। उदाहरणेषु करोतिशब्दो विकरणस्वरेण मध्योदात्तः। भुंक्त इति उदात्तनिवृत्तिस्वरेणान्तोदात्तः।
१८ अधीत इति। अदिङ् इति लसार्वधातुकानुदात्तत्वप्रतिषेधादन्तोदात्तः। इणः शतरि ह्रस्वमिति। इणो यण् इति यणादेशः ननु च प्रतिपदोक्तत्वा
घघादिभिः साहचर्याच्च निपातस्यैव यत् शब्दस्य ग्रहणं भविष्यति एवं तर्हि न तज्ज्ञापयति सत्रप्रकरणे नेदमुभयं व्यवच्छापकमिति तेन यावद्यथा
भ्यामित्यत्र यत्तदेतेभ्यः परिमाणे वतुविति सूत्रादितस्य लाक्षणिकस्याप्यनिपातस्यापि यावच्छब्दस्य ग्रहणं भवति। यावन्तो दम्भो त्रमादे

समुच्चयादिषु यश्च शब्दस्तेन योगे विधिरयं न भवति। कश्चित्। कश्चिद्भुंक्ते। कश्चिदधीते। यत्र। यत्र भुंक्ते। यत्राधीते। निया
तोरिति किं। यत्कूजति शकटं। गच्छत्कूजति शकटमित्यर्थः। इणः शतरि रूपमेतत्। युक्तमिति किं। यत्र क्व च ते मनो दक्षं द
धस उत्तरं॥ ॥नह प्रत्यारंभे॥ ॥ नह इत्यनेन युक्तं तिङं तं प्रत्यारंभे विषयेनानुदात्तं भवति। चोदितस्यावधीरणे उपालि
म्भपूर्वः प्रतिषेधपूर्वकः प्रत्यारंभः क्रियते। नह भोक्ष्यसे। नह अध्येष्यसे। प्रत्यारंभ इति किं। नह वै तस्मिंल्लोके दक्षिणामि
च्छंति॥ ॥सत्यं प्रश्ने॥ ॥सत्यमित्यनेन युक्तं तिङं तं नानुदात्तं भवति यदि चेत्सत्यशब्दः प्रश्ने वर्तते। सत्यं भोक्ष्यसे। सत्यम
ध्येष्यसे। प्रश्न इति किं। सत्यं वक्ष्यामि नानृतं १८ ॥

गणाना इति यावतो ऽश्वान्प्रतिगृह्णीयादिति च। यत्र क्व चेति। अत्र यत्रेत्यस्यो चरमित्यनेन न साक्षात्संबंधः दधस इति दधधारणे ऽनुदात्तेत्। अहंता रा०म०
हं पृथिवीमिमां निदधानीहं तो नु किमायसइति छांदसत्वान्निघातः॥ ॥नह प्रत्यारंभे॥ ॥नहेति निपातसमुदायः प्रतिषेधे वर्त्तते। प्रत्यारं १८
भः पुनरारंभः तस्य विषयमाह चोदितस्येति। भुंक्ष्वाधीष्वेति चोदितस्यकर्त्तव्यतयोपसन्नस्य भोजनादेरवधीरणे ऽवज्ञाने तस्यावधीरयितुरुपा
लिम्भपतस्यैव भोजनादेः प्रतिषेधेन संबद्धः प्रत्यारंभः पुनरुपन्यासः क्रियते १८ ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

॥ ॥अंग॥ ॥प्रातिलोम्यंप्रतिकूलकारित्वंततोन्यदभिमतकारित्वंमप्रातिलोम्यंएवंवानुलोम्यइतिवक्तव्येअंगाशब्दस्तदाहरणेनुत्त्य
यांप्रत्युदाहरणेत्वमर्षे॥ ॥हिच॥ ।हिशब्दोवधारणेहेतौवाप्रत्युदाहरणेत्वमर्षे। ॥छंदस्यनेक॥ ॥अत्रहेतुहेतुमद्भावस्यघोतकोहि
स्यनेकमपितिङं तंहियुक्तंभवतितत्रपूर्वेणसर्वस्यनिघातस्यप्रतिषेधेप्राप्तेक्वचिदनेकस्यक्वचिदेकस्ययथास्यादितिवचनंतदाहकश्चि

॥अंगाप्रातिलोम्ये॥ ॥अंगइत्यनेनयुक्तंतिङंतंअप्रातिलोम्येगम्यमानेनानुदात्तंभवति· अंगकुरु· अंगपच· अप्राति
यावद्यथाभ्याम्। यावत्साकल्येऽवधारणेवा। यथायोग्यतादिषु। यावद्यथाभ्यामितित्वतीतिदर्शयितुंपरभूतयोरपिप्रयोगउ
दाहृतः। तेनैतदपिनचोदनीयमप्यद्धतान्तिसमितेवयथाशब्देयावच्छब्देचवर्तमानेसिद्धःप्रतिषेधइति। लोम्यइतिकिं·
अंगकूजवृषलइदानींज्ञास्यसिजाल्म· कूजनमनभिप्रेतमसौकुर्वंप्रातिलोमोभवति॥ ॥हिच॥ ॥हीत्यनेनयुक्तंतिङं· त
मप्रातिलोम्येनानुदात्तंभवति· सहिपच· सहिकुरु। अप्रातिलोम्यइत्येव· सहिकूजवृषलइदानींज्ञास्यसिजाल्म॥ ॥छंदस्य
नेकमपिसाकांक्षं॥ ॥हिचेतिवर्तते· छंदसिविषयेहिइत्यनेनयुक्तंतिङंतंसाकांक्षमनेकमपिनानुदात्तंभवतिएकमपिक
दाचिदेवंकदाचिदनेकमित्यर्थः। तत्रानेकंतावत्· अनृतंहिमत्तोवदतिपाप्मेनंनविपुनाति· तिङं· तदुभयमप्येतन्निहन्यते। ए
कंखल्वपि· अग्निर्हिपूर्वमुदजयत्· तमिंद्रोनूदजयत्· तिङं तदुभयमभिहिशब्दयुक्तमेतत्· तत्रैकमुदजयदित्याद्युदात्तं। अ
जाह्यग्नेरजनिष्टगर्भात्सावाअपश्यज्जनितारमग्रे· अजनिष्टेत्याद्युदात्तंअपश्यदित्यनुदात्तं॥ ॥यावद्यथाभ्यां॥ ॥या
वद्यथाइत्येताभ्यांयुक्तंतिङं· तंनानुदात्तंभवति· यावद्भुंक्ते· यावदधीते· यथाभुंक्ते· यथाधीते· यद्वेणवियोगोभवति· देव

इतितत्रच्छंदसिदृष्टानुविधानाद्यथाप्रयोगंव्यवस्थाअनृतंहीतिपाप्मामदउच्यतेयस्मादयंमत्तोनृतंवदतितस्मादनृतवदनदो
षेणाप्युज्यतइत्यर्थः। उदजयदित्याद्युदात्तमिति। अत्रोजयदित्याद्युदात्तमित्यर्थः। अजनिष्टगर्भामिति। अंतर्भावितण्यर्थत्वाज्जनेर
त्रसकर्मकत्वं॥ ॥यावद्यथाभ्याम्। यावत्साकल्येऽवधारणेवा। यथायोग्यतादिषु। यावद्यथाभ्यामितित्वतीतिदर्शयितुंपरभूतयोर
पिप्रयोगउदाहृतः। तेनैतदपिनचोदनीयमप्यद्धतान्तिसमितेवयथाशब्देयावच्छब्देचवर्तमानेसिद्धःप्रतिषेधइति॥ ॥

॥ छंदस्यनेकमपि· साकांक्षं· यावद्यथाभ्यां॥ ॥

८ का०पा० १

१९

पूजायां द्वौ प्रतिषेधौ अप्रकृतमर्थं गामयत इत्याह। किं तर्ह्यनुदात्तमिति। यावद्देवदत्त इति। ननु चोत्तरत्र नियमो विज्ञास्यते व्यवाये पदि भवति उपसर्गेणैवेति। एवं तर्हि उत्तरत्रास्य प्रयोजनं उपसर्गव्यपेतस्य यावद्यथाशब्दयोश्च मध्ये शब्दान्तरं मा भूत्। अथ तु व्यवाये यदि भवति उपसर्गेणैवेत्यस्मादेव नियमात्तत्राप्रसंगः। ननो नं तरग्रहणं शक्यमकर्तुं॥ ॥उपसर्ग॥ ॥यथायो मध्ये॥ अनन्तरमित्येवेति। तच्चानन्तर्यं सोपसर्गस्य न तिङः [illegible]

पूजायां नानन्तरं॥ ॥यावद्यथाभ्यां युक्तं अनन्तरं तिङं तं पूजायां विषये नानुदात्तं भवति। किं तर्ह्यनुदात्तमेव। यावत्पचति शोभनं। यावत्करोति चारु। यथा पचति शोभनं। यथा करोति चारु। पूजायामिति किं यावद्भुंक्ते यथा भुंक्ते अनन्तरमिति किं यावद्देवदत्तः पचति शोभनं यथा विष्णुमित्रः करोति चारु। पूर्वेणात्र निघातप्रतिषेधः॥ ॥उपसर्गव्यपेतं च॥ ॥यावद्यथाभ्यां युक्तं तिङं तमुपसर्गव्यपेतं पूजायां विषये नानुदात्तं भवति किं तर्ह्यनुदात्तमेव। पूर्वेणानन्तरमित्युक्तं उपसर्गव्यवधानार्थमिदं वचनं। यावत्प्रपचति शोभनं। यथा प्रकरोति चारु। अनन्तरमित्येव। यावद्देवदत्तः प्रपचति शोभनं। यथा विष्णुमित्रः प्रकरोति चारु॥ ॥तुपश्यपश्यताहैः पूजायां॥ ॥तु पश्य। पश्यत। अह। इत्येतैर्युक्तं तिङं तं नानुदात्तं भवति पूजायां विषये। तु। माणवकस्तु भुंक्ते शोभनं। पश्य। पश्य माणवको भुंक्ते। पश्यत। पश्यत माणवको भुंक्ते। अह। अह माणवको भुंक्ते। पूजायामिति किं पश्य मृगो धावति। पूजायामिति वर्तमाने पुनः पूजाग्रहणं निघातप्रतिषेधार्थं। तद्धि निघातस्य प्रतिषेधेन संबद्धं १९

तमात्रस्य॥ ॥तु पश्य॥ ॥तु प्रसत्तीति पूजाविषयात्। माणवकस्तु भुंक्त इति। आश्चर्ये तु शब्द इति भोजनस्य पूज्यता गम्यते। एवमन्यत्रापि। पश्य मृगो धावतीति। तत्र कथनमेतत्। ननु च पूजायां नानन्तरमित्यतः पूजायामित्यनुवर्तते एवं तत्किं पूजायामित्यनेन तत्राह पूजायामिति वर्तमान इति। तद्धीति। ततश्च तदनुवृत्त्या विहापि न लुङित्यादिके विषये प्रतिषेधस्य प्रतिषेधः स्यान्मा भूदेवं निघातस्यैव प्रतिषेधोपथा स्यादित्येवमर्थं पूजाग्रहणमित्यर्थः। किं च अनन्तरमित्येवं तदभूदिहत्वविशेषेणोच्यते १९ राम० १९

अहो च॥ ॥पृथग्योगकरणमुत्तरार्थमिति। उत्तरो योगः अहेत्येव यथा स्यात् अनुप्रभृतिभिर्योगे मा भूत्॥ ॥शेषे॥ ॥असूयावचनमेतदिति।
अनाश्चर्यभूतमेव वस्त्वसूयन् आश्चर्यवत्प्रतिपादयतीत्यर्थः। शेषवचनं किं। यावता योगविभागसामर्थ्यादेव पूर्वप्रकृतेषु केषुचिन्नानुवर्त्त-
त इति ज्ञातं तत्र चानुकृष्टत्वात् पूजायामित्येतन्निवर्त्तिष्यते अत आह पूजायामित्येवेति॥ ॥पुरा च॥ ॥पुराशब्दोऽत्र भविष्यदासत्तिं द्योतयती-
ति: भविष्यतो विद्योतनादेरध्ययनान्तरायभूतस्याचिरकालभावित्वं द्योतयतीति तेनात्र त्वरा गम्यत इति भावः। विद्योतनादावध्ययनं धर्मश-

अहो च॥ ॥अहो इत्यनेन युक्तं तिङन्तं नानुदात्तं भवति पूजायां विषये। अहो देवदत्तः पचति शोभनं। अहो विष्णुमित्रः
करोति चारु: पृथग्योगकरणमुत्तरार्थं॥ ॥शेषे विभाषा॥ ॥अहो इत्यनेन युक्तं तिङन्तं शेषे विभाषा नानुदात्तं भवति। कश्च शेषः
यदन्यत्पूजायाः। कटमहो करिष्यति। ग्राममहो गमिष्यति। असूयावचनमेतत्। पूजायामित्यस्य पूर्वत्र चानुकृष्टत्वादिह अनधिकारे
सिद्धे शेषवचनं विस्पष्टार्थं॥ ॥पुरा च परीप्सायां॥ ॥पुरा इत्यनेन युक्तं तिङन्तं परीप्सायामर्थे विभाषा नानुदात्तं भवति। परीप्सा त्वरा।
अधीष्व माणवक पुरा विद्योतते विद्युत्। पुरा स्तनयति स्तनयित्नुः पुराशब्दोऽत्र भविष्यदासत्तिं द्योतयति: परीप्सायामिति किं। नडेन
स्म पुराधीयते। ऊर्णया स्म पुराधीयते। अत्र हि भूतविप्रकर्षं पुराशब्दो द्योतयति॥ ॥नन्वित्यनुज्ञैषणायां॥ ॥नन्वित्यनेन युक्तं
तिङन्तं नानुदात्तं भवति अनुज्ञैषणायां अनुज्ञाया: एषणा। प्रार्थना अनुज्ञैषणा। ननु करोमि भोः ननु गच्छामि भोः अनुजा-
नीहि मां करणं प्रतीत्यर्थः अनुज्ञैषणायामिति किं अकार्षीः कटं देवदत्त। ननु करोमि भोः पृष्टप्रतिवचनमेतत् नानुज्ञैषणा॥ ॥

स्त्रे प्रतिषिद्धम् अतस्तदुपन्यासे न त्वरितमधीष्वेति गम्यत इत्यर्थः। उदाहरणे यावत्पुरानिपातयोरिति भविष्यदर्थे लट् अप्युदाहरणे लट् स्म इति अ-
त्र भूतविप्रकर्षमिति। भूतस्याध्ययनस्याचिरकालवृत्तत्वं द्योतयतीति तेन नात्र त्वरा गम्यत इति भावः॥ ॥नन्विति॥ ॥किंचित्कर्त्तुमुपमेनोद्यत-
स्यैव क्रियतामित्येवंरूपोऽभ्युपगमोऽनुज्ञा। स्पष्टार्थमुदाहरणं दर्शयति। करणं प्रतीति। उपलक्षणमेतत् करणगमने प्रतीत्यर्थः। उदाहर-
णे वर्त्तमाने लट् अप्युदाहरणे भूते न न्वोः पृष्टप्रतिवचने इत्यनेन अंगाप्रातिलोम्य इत्यादिवत् सिद्धे इति करणं एकनिपातोऽयमिति दर्शनार्थः।
अस्य बाहुयोरपि निपातयोर्ग्रहणं संभाव्येत। ॥छ॥ ॥

का० प० १
२०

किंक्रिया॥ ॥अप्रतिषिद्धमिति। अप्रतिषिद्धार्थमित्यर्थः। पूर्वं किंयुक्तमिति। न तत्समीपे किमः श्रूयमाणत्वात्। उत्तरं त्वकिंयुक्तमिति विषयए
दः श्रूयमाणत्वान्नयति। अपरे त्विसादिन समीपे श्रूयमाणत्वं किंशब्दे न संबंधे हेतुः किं तु संशयविषयत्वं तच्च द्वितीयस्याप्यस्ति अतस्तस्यापि
तेन योगः स्युभयत्र प्रतिषिध इत्यर्थः। येत्वाहुः पूर्वं किंयुक्तमिति तेमन्येनेऽप्यस्तु द्वयोः संशयविषयत्वं किंशब्दे न तु समीपे श्रुतक्रियाविषयए
व प्रश्नो द्योत्यते क्रियान्तरविषयस्तु प्रश्न आहोस्विदित्यनेन। किंक्रियाप्रश्न इति चोच्यते तस्मात्तस्यैव निघातप्रतिषेध इति॥ ॥लोपे॥ ॥

॥किंक्रियाप्रश्नेनुपसर्गमप्रतिषिद्धं॥ ॥किमित्येतद्यदा क्रियाप्रश्ने वर्त्तते तेन युक्तं तिङन्तं अनुपसर्गमप्रतिषिद्धं ना
नुदात्तं भवति। किं देवदत्तः पचति आहोस्विद्भुंक्ते। किं देवदत्तः शेते आहोस्विदधीते। अत्र केचिदाहुः पूर्वं किंयुक्तमिति न निह
न्यते उत्तरं तु न किंयुक्तमिति निहन्यत एवेति। अपरे पुनराहुः पदद्वयस्यैकस्यापि तत्समीपे किंशब्दः श्रूयते तथापि सं
शयविषयस्तेन योगः स्युभयत्र प्रतिषेधे न भवितव्यमिति। क्रियाग्रहणं किं साधनप्रश्ने मा भूत्। किं देवदत्त ओदनं पचति
आहोस्विच्छाकमिति। प्रश्न इति किं किमधीते देवदत्तः। क्षेपे किंशब्दोयं न तु प्रश्ने। अनुपसर्गमिति किं किं देवदत्तः प्रपचति
आहोस्वित्प्रकरोति। अप्रतिषिद्धमिति किं किं देवदत्तो न पचति आहोस्विन्न करोति २० ॥ ॥छ॥ ॥छ॥ ॥

प्रकृतत्वात्किम एव लोपो विज्ञायत इत्याह किमो लोप इति। ब्रूवास्येति। शास्त्रे क्वचिदपि किमो लोपस्याविहितत्वात्प्रश्नः। न शास्त्रीयस्ये स०म०
वादर्शनस्य लोपसंज्ञा किं तर्हि दर्शनमात्रस्येत्युक्तं प्रयत्नेति। न च पुल्प्रत इति अर्थप्रकरणादिना गम्यमानत्वात्। उदाहरणे आहोस्विच्छब्दः प्र २०
श्नान्तरप्रश्ने स च नान्तरेण पूर्वप्रश्नमित्यर्थो गम्यते तदाह विनैव किमेति। प्राप्तविभाषेयमिति। कथं पुनः प्राप्तिया विना किंशब्देन योगे एवं व्या
ख्यानत्राह किमर्थेनेति। पूर्ववदस्य उदाहरणानीति। तान्येव किंशब्दरहितानीत्यर्थः २०

॥एहि॥ ॥एहि मन्य इत्यनेनेति। समुदायाभिप्रायमेकवचनं। अन्यथा व्येति द्वे आख्यातपदे इति बहुवचनप्रसंगः। उदाहरणे प्रहासे च मन्यो
पपदे प्रहासादिना पुरुषव्यत्ययः। सुष्ठु मन्यसे इति भूतमर्थं दर्शयन् प्रहासाभावमाह अत एव पुरुषव्यत्ययोपि न कृतः। गत्यर्थे लोटा लृडिति
व सिद्ध इति। आङ्पूर्वाद्दृशो लोट् सिपो हिः। अन्यत्र मा भूदिति। कान्यत्र माभूत् हन्निकारेण पदमनुदाहृतं एहि मन्य इत्यादि तत्र। कथं

लोपे विभाषा॥ ॥किमो लोपे क्रियाप्रश्ने अनुपसर्गम् अप्रतिषिद्धं तिङं तं विभाषा नानुदात्तं भवति। कुत्वास लोपः य
त्र प्रयते वा यैनिच प्रयुज्यते किं शब्दः देवदत्तः पचति आहोस्वित्पठति। देवदत्तः पचति आहोस्वित्पठति। विनैव कि
मा प्रश्नो गम्यते। प्राप्तविभाषेयं किमर्थेन योगात्। पूर्वे वत्रानुदाहरणानि॥ ॥एहि मन्ये प्रहासे लृट्॥ ॥एहि म
न्ये इत्यनेन युक्तं तिङं तं लृडन्तं नानुदात्तं भवति प्रहासे। प्रकृष्टो हासः प्रहासः। एहि मन्ये ओदनं भोक्ष्यसे नहि भोक्ष्य
से भुक्तः सोऽतिथिभिः। एहि मन्ये रथेन यास्यसि नहि यास्यसि यातस्तेन पिता। प्रहास इति किं एहि मन्यसे ओदनं भोक्ष्ये सु
ष्ठु च मन्यसे साधु च मन्यसे। गत्यर्थलोटा लृडिति च सिद्धे सत्यारम्भो नियमार्थः एहि मन्ये युक्तं प्रहास एव यथा स्यात् अ
न्यत्र मा भूदिति। एहि मन्यसे ओदनं भोक्ष्य इति॥ ॥

पुनरेहिमन्य इत्यनेन योगे नियमः क्रियमाणः एहि मन्य इत्यनेन योगे निवृत्तिं करोतीत्यत आह उत्तमोपादानमतन्त्रमिति। अतन्त्रत्वे कार
णमाह प्रहास एव हीति। तंत्रत्वे नियमस्य व्यावर्त्यं न संभवेदित्यर्थः। भाष्ये तु प्रत्युदाहरणे उत्तम एव प्रयुक्तस्तत्रायमर्थः एहि रथेन त्वं यास्य
सीत्येवमहं मन्य इति॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥श्री०॥ ॥छ॥ ॥

॥जातु॥ ॥जात्वित्येतदपूर्वमितिः॥अथ निर्दिष्टं तद्विशेषणामपूर्वत्वं कस्मान्न विज्ञायते युक्तं चैतत्॥विशेषणेन संबंधः॥ पोपेक्षते निनिमित्ति निः॥निमित्तस्याप्रधानस्य न हि युक्तं विशेषणं॥ उच्यते॥ यदयमाह॥उताहो चानन्तर्यमित्यत्रानन्तरग्रहणं करोति ततो ज्ञायते निमित्तस्यैवेदं विशेष णमिति॥अन्यथा तत्राप्यपूर्वमित्यनुवृत्तेरेवकेवलमिदं तस्मानन्तर्यं लभ्यत इति किं तेनानुवृत्तेनाप्रकृतस्यार्थेति त्स्यात॥शेषे विभाषा कस्य शेषः सांतरशेष इति अंतरेणाप्यनंतरग्रहणं प्रकृतः शेषः कथमपूर्वमितिप्रकृतं सपूर्वः शेष इति॥ ॥किंवृत्तं च॥ ॥वृत्तमिसाधि

॥जात्वपूर्वं॥ ॥जात्वित्येतद्विद्यमानपूर्वं तेन युक्तं तिङंतं नानुदात्तं भवति· जातु भोक्ष्यसे· जातु करिष्यसि· अपूर्वमि ति किं कदा जातु करिष्यसि॥ ॥किंवृत्तं च चिदुत्तरं॥ ॥किमो वृत्तं किंवृत्तं वृत्तग्रहणेन तद्विभक्त्यंतं प्रतीयात् उतर उतमौ च प्रत्ययौ तत्किंवृत्तं च चिदुत्तरमविद्यमानपूर्वं यत्तेन युक्तं तिङंतं नानुदात्तं भवति· कश्चिद्भुंक्ते कंचिद्भोजयति· किंचिदधी ते· केनचित्करोति· कस्मैचिद्ददाति· कतरश्चिद्भुंक्ते· चिदुत्तरमिति किं कोभुंक्ते· अपूर्वमित्येव· देवदत्तः किंचित्पचति ॥ ॥आहो उताहो चानंतरं॥ ॥आहो उताहो इत्येताभ्यामपूर्वमनंतरं तिङंतं नानुदात्तं भवति· आहो भुंक्ते· आ हो धीते· उताहो भुंक्ते· उताहो अधीते· अनंतरमिति किं शेषे विभाषां वक्ष्यति· अपूर्वमित्येव· देवदत्त आहो भुंक्ते· देवद त्त उताहो भुंक्ते॥ ॥शेषे विभाषा॥ ॥आहो उताहो इत्येताभ्यां युक्तं तिङंतं शेषे विभाषा नानुदात्तं भवति· कश्च शेषः यदन्यदनंतरात्· आहो देवदत्तः पचति· आहो देवदत्तः पचति· आहो देवदत्तः पचति· उताहो देवदत्तः पचति· उताहो

करणोक्तः किमो वृत्तं किंवृत्तमिति अधिकरणवाचिनश्चेति कर्तरि षष्ठी अधिकरणवाचिना चेति प्रतिषेधे प्राप्ते अस्मादेव निपात नात्समासः॥ यदि पुनः किंशब्दो वर्तते तेन तत्स्वर्वं गृह्येत किमीयः कैमायनिः किंतरामित्यादेर्ग्रहणप्रसंग इति मत्वा परिसंख्येयं वृत्तग्रह णेनेति चिदुत्तरमित्येतत्किं वृत्तस्य विशेषणं न तिङं तस्यापूर्वो निकात्सामान्यापेक्षा ग्राहकात्॥ ॥आहो॥ ॥अपूर्वमित्येवेति॥अ नन्तरयोगाहो ग्रहणे उत शब्दस्य व्यवधानाहो शब्दस्य॥ ॥शेषे॥ ॥कश्च शेष इति॥बहूनां प्रकृतत्वात्प्रश्नः॥ परस्परानंतरादिति॥प्रतिषेधस्य

निमित्तभूत आहो उताहो ग्रहणं तावदनुवर्तते उताहो ग्रहणा दृव मित्यस्यानुवर्त्तनेन तत्र पारिशेष्यादनंतरापेक्षएव शेष इतिः॥
वः २१

॥ गत्यर्थलोटा ॥ ॥ गमिनासमानार्थो गत्यर्थ इति अर्थप्रदर्शनमेतत् गतिरर्थो येषामिति तु विग्रहः गत्यर्थलोटायुक्तमिति योगः पुनरर्थद्वारको निमित्तनि
त्तिभावः लोडन्तवाक्यं हि निमित्तं लृडन्तवाक्यस्य। न चेत्कारकं सर्वमन्यद्भवतीति सर्वं चेत्कारकमसमन्नं दृष्टा निघातप्रतिषेधो न भवतीत्यर्थः। अत्र लोडन्ते
च लडन्ते च यावल्लिङ्गं न कारकं गृह्येत परिज्ञानार्थं वाक्यविवेकतः। तदाहरणादिप्राप्नोति वह ब्राह्मण ग्रामं लौकिकं पिबेतां सावमोक्ष्यत इति सर्वं विद्यते तत्त्वे
व न भवति नं यथा हन्तानुपमत्तयोः प्रत्युदाहरणयोः। न चात्र विद्यते सर्वमभेदात्कर्त्रा लिकर्मणः। अथायमर्थः स्यात्सर्वस्मिन्कारके अन्यस्मिन्नि
घातप्रतिषेधः न तु कश्चिद् विभिन्न इति इहापि न स्यात् आगच्छ देवदत्त ग्राममोदनं भोक्ष्यस इति विद्यते ह्यत्र कर्म तस्माद्व्याख्येयमेतत् तत्राह यत्रैवेति।

गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत् ॥ ॥ गमिना समानार्था गत्यर्थाः गत्यर्थानां धातूनां लोटा तेन गत्यर्थलोटा युक्तं लृडन्तं नेति
ङं। तेनानुदात्तं भवति न चेत्कारकं सर्वान्यद्भवति। यत्रैव कारके कर्त्तरि कर्मणि वा लोड् दृश्यते तत्रैव लृडपि भवतीत्यर्थः। कर्तृकर्मणी
एवात्र निर्दिष्टं न वाच्ये कारकग्रहणेन गृह्येते न करणादि कारकान्तरं। आगच्छ देवदत्त ग्रामं द्रक्ष्यस्येनं। आगच्छ देवदत्त ग्राममोदनं
भोक्ष्यसे। उह्यन्तां देवदत्तेन शालयस्तेनैव भोक्ष्यन्ते। उह्यन्तां देवदत्तेन शालयो यज्ञदत्तेन भोक्ष्यन्ते। गत्यर्थग्रहणं किं पच देवदत्त
ओदनं भोक्ष्यस एनं। लोटेति किं ॥ ॥

एवकारेणावाच्यव्यतिरिक्तस्य निरासः ननु सर्वस्यान्यत्वं विवक्षितं तत्स्पष्टीकृतं। कर्तृकर्मणी एवेति। एतच्च प्रत्यासत्तेर्लभ्यते। प्रत्यासन्नं हि
तत्र स्याद्यत्रैवाभिधीयते। उदाहरणेषु प्रथमतृतीययोः सर्वमनन्यत्। इह स्याद्वितीयस्य तु निघातप्रसङ्गश्चिन्त्यो नानावाक्यत्वात्। द्वितीयच
तुर्थयोर्वाच्यमात्रं। वहेर्गुणीभूतगमनाभिप्रायं गत्यर्थत्वं प्रापणार्थत्वात्। तथा च नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव वचेति भेदेन ग्रहणं
कृतं। ननु च शक्तिः कारकं सा च प्रतिक्रियं भिद्यते तत्कथमिहाभिन्नं कारकं शक्तिशक्तिमतोर्भेदस्याविवक्षितत्वाददोषः ॥ ॥ छ ॥ ॥

॥ छ छ ॥ ॥ छ छ ॥ ॥ छ छ ॥ ॥

आगच्छेरितिलिङ्·यन्नलोट्पश्यतीतिलङर्यन्नलट्। प्रत्युदाहरणयोः सर्वमन्यत्। कारकशब्देनाभिन्नत्रैकारकमक्तिरेकाश्रीयतेतेनकर्तृत्वाभेदेपि
व्यक्तिभेदात्कारकभेदः। त्वंचाहंचदत्तश्चागच्छत। आक्षिपमाणेसर्वग्रहणेयत्रवाक्यंनभिद्यतेतत्रैवभवति यत्रहचभिद्यतेवाक्यंएकत्रेकमपरत्रद्वयमि
तिनिघातप्रतिषेधोनस्यात् क्रियमाणेतुसर्वग्रहणेपश्यामिघ्नन्तिनयादृश्यतिलुङंतवाचयेहीति। ॥लोट्च॥ ॥शाधानि। शासेर्लोट्मिप्रमिपो
आगच्छेर्देवदत्तानामंरूत्स्यसेनं· लृटिति किं आगच्छदेवदत्तग्रामंपश्यस्येनं· नचेत्कारकंसर्वान्यदितिकिं· आगच्छदेवदत्तग्रामंपितातो
ओदनंभोक्ष्यते· उद्यन्तांदेवदत्तेनशालयः सक्तवस्तेनपास्यंते· सर्वग्रहणंकिं आगच्छेर्देवदत्तग्रामंत्वंचाहंचद्रक्ष्यावएनमित्यत्रापि
निघातप्रतिषेधोयथास्यात्· लृङंतवाचयेहिसर्वान्यस्मिन्कारकेनभावेतर्ग्यंदृहतुलोङंतस्ययत्कारकंतत्राप्सत्वल्लङंतेनोक्तस्
॥ ॥लोट्च॥ ॥लोडंतंतिङंतंयमर्थलोटापुक्तंनानुदात्तंभवतिनचेत्कारकंसर्वान्यद्भवतिलोडंतयोरेकंकारकंपदिभवतीत्य
र्थः। आगच्छदेवदत्तग्रामंपश्य· आगच्छदेवदत्तग्रामंशाधि· आयम्यतांदेवदत्तेनग्रामोदृश्यतांयज्ञदत्तेन·। सर्वग्रहणाद्वि
हभवत्येव आगच्छदेवदत्तग्रामत्वंचाहंचपश्यावएनं· पृथग्योगकरणमुत्तरार्थं॥ ॥विभाषितंसोपसर्गमनुत्तमं॥ ॥लोडंतंसो
पसर्गमुत्तमवर्जितंयमर्थलोटापुक्तंतिङं·तंविभाषितंनानुदात्तंभवतिनचेत्कारकंसर्वग्रहणाद्विहभवत्येव आगच्छदेवदत्तग्राम
त्वंचाहंचपश्यावएनं· पृथग्योगकरणमुत्तरार्थं॥ ॥विभाषितंसोपसर्गमनुत्तमं॥ ॥लोडंतंसोपसर्गमुत्तमवर्जितंयमर्थलो
टापुक्तंतिङं·तंविभाषितंनानुदात्तंभवतिनचेत्कारकंसर्वान्यद्भवति· आगच्छदेवदत्तग्रामंप्रविश आगच्छदेवदत्तग्रामंप्रशाधि· आ
गच्छदेवदत्तग्रामंप्रविश आगच्छदेवदत्तग्रामंप्रशाधि· सोपसर्गमितिकिं आगच्छदेवदत्तग्रामंपश्य· अनुत्तममितिकिं आगच्छदेवदत्तग्रा
मंप्रविशानि॥ ॥हंतच॥ ॥हंतेत्यनेनपुक्तंलोडंतंसोपसर्गमुत्तमवर्जितंतिङं·तंविभाषितंनानुदात्तंभवति· हंतप्रविशहंतप्रविशह
हिः। शासाहाविति शादेशः तस्यासिद्धत्वान्नसलक्षणंधित्वं। प्रशाधीतिप्रायेणानुपाठः मनपुक्तः सोपसर्गत्वेनोनरस्त्रविषयत्वात्। पृथग्योगक
रणमुत्तरार्थमिति। तत्रैवविकल्पोलोटएवयथास्यान्नलटोमाभूदिति॥ ॥हंतच॥ ॥प्रभुनजावहाइति। भुजेर्लोट्भुजोऽनवदृत्स्यात्मनेपदंगहिः
टेरेत्वं आडुत्तमस्यपिच्चएतऐअन्तरा जेत्वात्लुसार्वधातुकमनुदात्तंविकरणास्वरः २२

नप्रशाधि हंत प्रशाधि· सोपसर्गमित्येव· हंत कुरु· निपातैर्यद्यदि
हंतेति नित्यमत्र निघातप्रतिषेधो भवति· अनुत्तममित्येव· हंत प्रभु
ञ्जावहै २२ ॥

आम॥ ॥अंतरपतीत्यंतरं व्यवधायकं एकमंतरं यस्य तदेकांतरं उदाहरणे निघाते प्रतिषिद्धे पाक्षिकमाद्युदात्तत्वं दूराद्धूते चेति प्लुतः। भवच्छब्द
स्य विभाषा भवद्भगवदघवतामिति रुत्वं अवर्णपूर्वस्य च ओकारः। भोभगोअघोअपूर्वस्य योशि इति यत्वं तस्य हलि सर्वेषामिति लोपः। ननु चामंत्रितं एवमविद्यमा
नवदिति भोशब्दस्याविद्यमानत्वादेकांतरता नोपपद्यते अत आह भोइत्येतदिति। तदुभयमनेन न क्षिप्यत इति। कथं पुनरप्रकृतायाः आमंत्रिताद्वि
तायाश्चैकश्रुतेः प्रतिषेधः उमो विज्ञातुं उच्यते तेन यत्र विपक्षवचनं अधर्मान्तराद्विवत् अंतिकविरुद्धमनंतिकं दूरमित्यर्थः। तत्रैकश्रुतिरुच्यते
ततश्च पचसि देवदत्त्रे इत्यादावंतिके सावकाशमामंत्रितनिघातं बाधित्वा एकश्रुतिः प्राप्नोति सानावकाशामिति सिद्धांते तन्नोपवादे प्रतिषिद्धे उत्सर्गभूतो
निघातः प्राप्नोति सोपि प्रतिषिध्यते एकश्रुतिमात्रप्रतिषेधे हि तत्रैवायं ब्रूयात् नाम एकांतरमिति एवं ह्यामंत्रितमनंतिक इति न वक्तव्यं भवति सो

आम एकांतरमामंत्रितमनंतिके॥ ॥आमन्तु त्तरमेकपदांतरितमामंत्रितांतमनंतिके नानुदात्तं भवति· आं पचसि देवदत्त ३
आं भो देवदत्त ३ भोः इत्यामंत्रितांतमपि नामंत्रिते समानाधिकरणे सामान्यवचनमिति नाविद्यमानवद्भवति· आम इति किं शाके पचसि
देवदत्त ३ एकांतरमिति किं आं प्रपचसि देवदत्त ३ आमंत्रितमिति किं आं पचति देवदत्तः। अनंतिक इति किं आं पचसि देवदत्त· आ
म एकांतरमामंत्रितं यत्तस्य एकश्रुतेरनुदात्तस्य च प्रतिषेध इष्यते तदुभयमप्यनेन न क्षिप्यत इति केचिदाहुः प्लुतोदात्तः पुनरसि
द्धत्वान्न प्रतिषिध्यते॥ ॥छ॥ ॥छ॥ ॥

यमेवं सिद्धे यन्निघातप्रकरणे इदं ब्रवीति तेन ज्ञानीमो निघातोपि प्रतिषिध्यत इति केवलस्य निघातस्यैकश्रुत्या बाधितस्य प्रतिषेधोनर्थकः
ति सामर्थ्यादुभयोः प्रतिषेधः। ननु चैकश्रुतिरपि देवदत्ता आगच्छेत्यादौ सावकाशा सा कथमां भो देवदत्तेत्यादौ निघातस्य बाधिका अप्युन
परत्वादेकश्रुतेर्निघात एव बाधक इति तस्यैवात्र प्रसंग इति प्रतिषेधोपि तस्यैव स्यात् तस्य च प्रतिषेधे चैकश्रुतिः स्यादेव अत आहुः परत्वमात्रनि
बंधनत्वादंतरंगो निघातः पूर्वं प्रवर्त्तते ततो दूरात्संबोधनमधिकं निमित्तमपेक्षमाणा एकश्रुतिरिति सैवानंतरं प्राप्नोति तां तावद्बाधते पूर्वोक्तेन मा
पेन निघातमपीति सष्टुक्तं तदुभयमनेन क्षिप्यत इति। यथैव तर्हि एकश्रुतिर्बाध्यते तथैव प्लुतोदात्तोपि बाध्येत अत आह प्लुतोदात्तः पुनरिति॥ ॥

एका·प०१
२३

अपरेषामिति। तेमयंतेसादृश्येऽत्रनत्र नविपक्षे अन्यथा ह्रस्वेवन्नूपादिनि। प्राप्तिरेवनास्तीति। अनूरत्वात्कथंतर्हि लुतउदाह्रियते अत आह तु
तोयीति॥ ॥यद्धि॥ ॥जाय्यतेस्वारोहावेहीति। इहेलोटिवस शपु अग्रतुक्रमस्यपिच्चलोटोलड्‌· इतिलड्‌· आगमास्तितः। ऽ. तइतिसतिसलोपः। आऽ
पूर्वादिरोलोट्सिपोहिः एहीत्यनेनपरभूतेनयुक्तेस्यरोहावेस्यस्यलो ऽद्वेतिप्राप्तोनिघातप्रतिषेधोनियमेननिवर्त्यतेतेनस्वः शब्दाश्रयोनिघातोभवति।
ननुपरमपिछंदसीतिवचनात्स्वः शब्दस्यपूर्वांगवद्भावाज्जायेस्वारित्यामंत्रितंतत्रश्चामंत्रितंपूर्वमविद्यमानवदित्यविद्यमानत्वात्तन्निघातोनप्राप्नोति।

अपरेषांदर्शनमनंतिकरत्यनेनयन्नदर्शनमस्तिकथंतस्यरिष्यते वेनास्मिन्नेकश्रुतेः प्राप्तिरेवनास्ति· छुनोपिनोदाहर्त्तमिरति॥
॥यद्धितुपरंछंदसि॥ ॥आमंत्रितमित्येतदस्वरितत्वान्नानुवर्त्ततेमिति· तिवर्त्तत एवयत्पांहिपरंचतिङ्‌. तंछंदसिविषयेनानुदा
त्तंभवति· यत्परंतावत्· गवांगोत्रमुदसृजोयदंगिरः हिपरं इंद्रवोवामुशंतिहि· तुपरं· आत्मोमस्यामितिते· नियातेर्यघादिहंतेतिहि
चेतितुपश्यपश्यताहैरितिवनिघातप्रतिषेधेसिद्धेवनेनियमार्थमिदं एतैरेवपरैर्योगेप्रतिषेधोभवतिनान्यैरितितेनइहनभवतिजा
येस्वोरोहावेहि· एहीत्यनेनान्यथलोटायुक्तस्यरोहावेस्यस्यलोडंतस्यनिघातोभवत्येव २३ ॥ ॥श्री४॥ ॥श्री४॥ ॥

प्रतिषिध्यतेऽत्रांगवद्भावः अन्यपानांप्रतिषेधइति। नैवमत्रांगवद्भावः प्राप्नोतिउक्तंहितवषष्ठ्यामंत्रितकारकवचनंतन्निमित्तग्रहणंचेति। नहिस्वः
शब्दः षष्ठ्यंतमामंत्रितकारकंतन्निमित्तंवा। स्वरेवांगवद्भावेऽप्यविद्यमानवत्वोस्वः शब्दस्यरोरीतिलोपोनभवतिउत्वंचभवतिछांदसत्वात्। अथे
दानींरोहावेत्यनेनयुक्तस्यएहीत्यस्यलोडंतेतिनिघातप्रतिषेधः कस्मान्नभवतिनरुहिहेर्गत्यर्थः गत्यर्थाकर्मकेत्यत्रएतग्रहणात्। यदिनगत्य
र्थः आरोहंतिहस्तिनंमनुष्याः नानारोहयतिहस्तीमनुष्यानगतिबुद्धिप्रत्यवसानार्थेतिकर्मसंज्ञानप्राप्नोतितस्माद्युपरिगमनरूपव्यापारो राम०
रुहेरर्थः गत्यर्थाकर्मकेत्यत्रचरुहिग्रहणंप्रपंचार्थंएहात्यस्यतुनिघातप्रतिषेधोनभवतिविभाषितंसोपसर्गमनुत्तममितिवचनात् २३ ॥ २३

चना॥ ॥इहापीति। नकेवलं तिङो गोत्रादीनीत्यत्रैवेत्यपिशब्दार्थः तत्र हेतुस्तत्रैव प्रतिपादितः। शुक्लीकरोति चनेति। आगतेरिति प्रतिषेधाभावादत्र
निघातप्रतिषेधो भवत्येव। यत्काष्ठमिति। शुक्लीशब्दस्य निघातो न भवति॥ ॥चादिषु च॥ ॥न च ह शब्दं तदिति। प्रत्यासत्तेः। चादयो ह्यत्र त्रयो येषां ग्रह
णं ते विप्रकृष्टाः समुच्चयो विकल्पश्चानेकस्य धर्मः सूत्रस्य तत्रैव स्पष्टतः स्वादिति वेत्यपि यो पन्यासः तत्स्य निघातप्रसंगः। नानावाक्यत्वात् स्वादिति हेत्वादे

चनचिदिव गोत्रादितद्धिताम्रेडितेष्वगतेः॥ ॥चन· चित· इव· गोत्रादि· तद्धित· आम्रेडित इत्येतेषु परतः आगतेस्तिङन्तं तिङ् तं नानुदा
त्तं भवति· चन· देवदत्त· पचति चित· इव· देवदत्त· पचतीव· गोत्रादि· देवदत्तः पचति गोत्रं देवदत्तः पचति ब्रुवं देवदत्तः पचति प्रवचनं·
इहापि गोत्रादयः कुत्सनानीत्याप्यपीवग्रह्यते· तद्धित· देवदत्त· पचतिकल्पं· देवदत्तः पचतिरूपं· अनुदात्तत्वात् तद्धितस्वरो हात्र ग्रहणं अन्यत्र
तिङ् स्वरेणात्तद्धितस्वरो बाध्यते· पचति ब्रुवं· देवदत्तः पचति प्रवचनं· इहापि गोत्रादय इत्यपः। आम्रेडितः देवदत्तः पचति पचति· आगतेरिति
किं देवदत्तः पचति चन· अत्रागतिग्रहणो नमगतिरपि तिङि· सत्र चोपसर्गग्रहणं दृष्टं तं। इह मा भूत· शुक्लीकरोति चनं· लक्ष्यीकरोति चित·
यत्काष्ठं शुक्लीकरोति· यत्काष्ठं कृष्णीकरोति॥ ॥चादिषु च॥ ॥चादिषु परतस्तिङ् तमगतेः परं नानुदात्तं भवति· चादयो न च वा ह
हेव युक्तास्मिन्नत्रैव निर्दिष्टास्त एव गृह्यते· च· देवद पचति च खादति च· वा· पचति वा खादति वा· ह· देवदत्तः पचति ह खाद
ति ह· अह· देवदत्तः पचत्यह खादत्यह· एव· देवदत्तः पचत्येव खादत्येव। आगतेरित्येव· देवदत्तः प्रपचति च प्रखादति च· प्रथम
तिह· अह· देवदत्तः पचत्यह ... परं तु निहन्यते॥ ॥चवायोगे प्रथमा॥ ॥आगतेरिति पूर्वसूत्रे चानु
स्यात्रतिङ् तस्य चवायोगे प्रथमेति निघातः प्रतिषिध्यत इव· परं तु निहन्यते॥
कृष्टमित्यत्र नानुवर्त्तते· चवाशब्दाभ्यां योगे प्रथमा तिङ् विभक्तिर्नानुदात्ता भवति· गर्दभांश्च कालयति वीणां च वादयति· वा· गर्दभा
न्वा कालयति वीणां वा वादयति। योगग्रहणं पूर्वाभ्यामपि योगे निघातप्रतिषेधो यथा स्यादिति· प्रथमाग्रहणं द्वितीयादेस्तिङ् तस्य
माभूत इति। चवायोगो हि समुच्चये विकल्पे वा प्रतिभवति सचानेकस्य धर्मः॥ ॥

स्तु प्रक्रमाभेदायोपन्यासः। परस्तु निहन्यत एवेति। प्रशब्दात्समानवाक्यगतात्परत्वात्। चवायोगे प्रथमा। आगतेरिति पूर्वसूत्रे इत्यादि अत एव
पूर्वसूत्रे प्रत्युदाहरणावसरे उक्तं प्रथमस्यात्र तिङ् तस्य चवायोगे प्रथमेति निघातः प्रतिषिध्यत एवेति। प्रथमेति सूत्रा लिंगस्य निर्वाहमाह। प्रथमा ति
ङ् विभक्तिरिति। प्रत्ययग्रहणाभावे तस्य द्वितीयादेः संभवमाह चवायोगो हीति॥ ॥श्रीः॥ ॥श्रीः॥ ॥७॥ ॥ ॥ ॥ ॥

का॰ प॰ १

२५

हेति॥ ॥आचारभेद आचारो लंघनं। उदाहरणे उपाध्याये पदातौ गच्छति शिष्यस्य रथेन गमनं प्रतिषिद्धम् आचारभेदः॥ ॥अहेति विनियोगे॥ ॥नाना
प्रयोजनत्वम् अनेकप्रयोजनः नियोगः प्रेषणं। प्लुतश्चेति। स पुनः क्रियायां क्रियाहेतुकः विनियोगे प्रेषहेतुकः॥ ॥चाहलोप एवे॥ ॥उदाहरणे च

हेति क्षियायां॥ ॥हइत्यनेन युक्ता प्रथमा तिङ्विभक्तिर्नानुदात्ता भवति क्षियायां गम्यमानायां। क्षियाधर्मव्यतिक्रमः आचारभे
दः। स्वयं ह रथेन याति ३ उपाध्यायं पदातिं गमयति। स्वयं ह ओदनं भुङ्क्ते ३ उपाध्यायं सक्तून् पाययति। प्रथमस्य तिङः तस्य निघातः प्र
तिषिध्यते क्षियाशीःप्रैषेषु तिङाकाङ्क्षमिति च प्लुतो भवति॥ ॥अहेति विनियोगे च॥ ॥अहइत्यनेन युक्ता प्रथमा तिङ्विभक्तिर्नानु
दात्ता भवति विनियोगे गम्यमाने चकारात् क्षियायां च। नानाप्रयोजनो नियोगो विनियोगः। त्वम् अह ग्रामं गच्छ त्वम् अहारण्यं गच्छ। क्षि
यायां। स्वयम् अह रथेन याति ३ उपाध्यायं पदातिं गमयति। स्वयम् अह ओदनं भुङ्क्ते उपाध्यायं सक्तून् पाययति। पूर्ववन्निघातप्र
तिषेधः प्लुतश्च॥ ॥चाहलोप एवेत्यवधारणम्॥ ॥चलोपे अहलोपे च प्रथमा तिङ्विभक्तिर्नानुदात्ता भवति एवेत्येतच्चेद
वधारणार्थं प्रयुज्यते। क्व चाहलोपः यत्र गम्यते चार्थो न च प्रयुज्यते चशब्दः समुच्चयार्थः अहशब्दः केवलार्थ इति। समानक
र्तृके चलोपः नानाकर्तृके अहलोपः। चलोपे। देवदत्त एवारण्यं गच्छतु। देवदत्त एव ग्रामं गच्छतु। ग्रामं चारण्यं च गच्छत्वित्यर्थः।
अहलोपे। देवदत्त एव ग्रामं गच्छतु। यज्ञदत्त एवारण्यं गच्छतु। ग्रामम् अह गच्छतु अरण्यम् अह गच्छतु ग्रामं केवलम् अरण्यं केवलम
रण्यं केवलमित्यर्थः अवधारण इति किं देवदत्त क्वेव भोक्ष्यसे। देवदत्त क्वेवाध्येष्यसे। अनवकॢप्तावयमेवशब्दः एवे चानियो
ग इति परस्य पत्वं २५ ॥ ॥

लोपं दर्शयति ग्रामं चेति। एवम् अहलोपेपि द्रष्टव्यं। न च प्रथमे ग्रामकर्मकस्यारण्यकर्मकस्य च देवदत्त एव कर्तेति समानकर्तृकत्वांछिती राम॰
पे तु विपर्ययान्नानाकर्तृकता द्रष्टव्या। अनवकॢप्तिरसंभावनं यो हि देवदत्तस्य भोजनं क्वचिदपि न संभावयति स एवं प्रयुङ्क्ते क्वेव भोक्ष्यस २५
इति। एवे चानियोग इति पूर्वसूत्रलंघचित्तुहत्रावेचेतत्सद्युते २५ ॥

चादि॥ ॥पूर्वयोगः एवशब्दप्रयोगेनिरार्थ्यः॥ ॥तेन॥ ॥वैस्फुटार्थेऽत्र भूमायांचवावप्रसिद्धोस्फुटार्थेव॥ ॥एक॥ ॥समस्तुल्योर्थोयथो
क्तौ समर्थैरिशिकं धादिषुदृष्टो नासरूपात्वं निपातनात्कृतलोपः परस्परेणचसमानार्थत्वं नतिङ् तेनासंभवात्। तिङ्‌तेनसंगतार्थोस्यामित्ययंत्वर्थो
नभवतिचवायोगेप्रथमेसतोयोगग्रहणानुवृत्तेरेवास्यार्थस्यसिद्धत्वात्। जिन्वतीति। जिविः प्रीणनार्थः। इदित्वान्नुम्। लोट्इतिप्रसिद्धश्चाकशी

चादिलोपेविभाषा॥ ॥चाद्योनचवाहाहैवयुक्त इतिसूत्रेयेनिर्दिष्टास्तएवगृह्यंतेतेषांलोपेप्रथमातिङ्‌ विभक्तिर्विभाषयाना
नुदात्ताभवति· चलोपे· शुक्लाव्रीहयोभवंति· श्वेतागाआज्याय दुहंति· शुक्लाव्रीहयोभवंतिश्वेतागाआज्यायदुहंति· भवंतीसेत
त्पक्षेननिहन्यते· वालोपेव्रीहिभिर्यजेतयवैर्यजेत। एवंशेषेष्वपि यथादर्शनमुदाहार्यं॥ ॥वेवावेतिवछंदसि॥ वैवावइत्येताभ्यां
युक्ताप्रथमातिङ्‌ भाषायामनुदात्ताभवतिछंदसिविषये· अहर्वैदेवानामासीत्· रात्रिरसुराणामासीत्· बृहस्पतिर्वैदेवानांपु
रोहितआसीत्· शंडामर्कौवै असुराणामास्तां। वाच· अयंवावहस्तआसीत्· तेनत्वासीत्॥ ॥एकान्याभ्यांसमर्थाभ्यां॥ ॥
एकअन्यइत्येताभ्यांसमर्थाभ्यांयुक्ताप्रथमातिङ्‌ भाषायानानुदात्ताभवतिछंदसिविषये· प्रजामेकाजिन्वति· ऊर्जमेकारक्षति·
जिन्वतीसेतत्पक्षेननिहन्यते· तयोरन्य· पिप्पलंस्वाद्वत्त्यनश्नन्नन्योअभिचाकशीति· अश्नीसेतत्पक्षेननिहन्यते समर्थाभ्या
मितिकिं· एकोदेवानुपातिष्ठत्· एकइतिसंख्यापदमेतनन्यार्थेनवर्त्तते· एकशब्दस्यान्यवस्यार्थंसमर्थग्रहणं॥ ॥छ॥

तीति। काशिनासमानार्थः काशिः प्रकृत्यंतरमस्तीत्युक्तंतस्येतद्यङ्‌लुङ्‌ किरूपं। एकशब्दस्यान्यवस्यार्थंचेति। अतस्तस्यैवप्रत्युदाहरणंदर्शितंना
न्यस्येतिभावः॥ ॥छ॥ ॥छ॥ ॥

१ का० प० १
२५

अभिचारित्वात्तस्येति। एकशब्दो ह्यन्यार्थमभिचरति। नानार्थोऽप्ययमिति हि एको गोत्र इत्यत्र दर्शितं तत्रासति समर्थग्रहणे अन्यशब्देनाभि-
न्नार्थस्यापि ग्रहणप्रसङ्गः। न च सामर्थ्यमत्र प्रकरणेऽव्यवस्थापकमिति निपातैर्यद्यदिहन्तेत्यत्रावोचाम॥ ॥यद्वृत्तान्नित्यम्॥ ॥किं
वृत्तं च चिदुत्तरमित्यत्र किंवृत्तशब्दस्य दर्शिता व्युत्पत्तिरिहानुगन्तव्या। एतत्त्वाश्रीयत इति। तदा अयपलोप इत्यत्र पदीयं यादृपतिरिस्या

अभिचारित्वात्तस्य॥ ॥यद्वृत्तान्नित्यम्॥ ॥प्रथमाश्छन्दसीति निघातं तेति ङ्ग्रानप्रतिषेध एवानुवर्त्तते। यदोवृ
त्तं यद्वृत्तं यत्र यदेपदं वर्त्तते तत्सर्वं यद्वृत्तं गृह्यते। इह हि तत्र ग्रहणं न तद्विभक्त्यन्तं प्रतीयात् उतरउतमौ च प्रत्ययाविते
तत्त्वाश्रीयते। तस्माद्यद्वृत्तादुत्तरं तिङ्‌न्तं नित्यं नानुदात्तं भवति। यो भुङ्क्ते। यं भोजयति। येन भुङ्क्ते यस्मै ददा
ति। यत्कामास्ते जुहुमः। यद्यद्यापुर्वीति। यद्यङ्ग वायुः पवते। पंचमीनिर्द्देशेऽप्यत्र व्यवहिते कार्यमिष्यते। यथा का
मे वेतिवक्तव्यम्। यत्र यजंति २५ ॥ ॥ श्रीराम०॥ ॥ श्री४॥ ॥ श्री४॥ ॥ श्रीः॥ ॥७॥

दित्यः परस्य न स्यात्। नुदहवइति। प्रत्ययस्वरेणान्तोदात्त मेतत्। अभ्यस्तानामादिः मीङ्मीमदुभ इति चोभयत्रापि चेति वर्त्तते। रामं०
यद्यदि। तिपरं चलीति किं नविषदेवयोऽश्वेति दिर्दास्रादेशः। कथं पुनः पंचमीनिर्द्देशे मति यत्कामास्ते यद्यङ्गापुरिपादो व्यवधाने भवतीत्य २५
त आह पंचमीनिर्द्देशेऽप्यत्रेति। एतच्चोत्तरसूत्रे ज्ञापयिष्यते। यथाकामप्यरति। यथाकाम्यं यथेच्छं प्रवृत्तिर्द्देशकालानपेक्षा तत्र गम्यमा
नेऽघातनिघातप्रतिषेधः। यत्र क्व च तत्र यजने २५

प्रजनात्॥ ॥काष्ठादिभ्य इति वार्त्तिकदृष्टं सूत्रावयवत्वेन पठितं तस्मात् दृत्तुरोधेन पूजनादित्येकवचनं बहुवचनस्थाने इति मावबोधे पूजने
भ्यः काष्ठादिभ्य इति। उत्तरपदमिति। उत्तरसूत्रे इति ग्रहणात् दस्य च सूत्रस्य समासविषयत्वात् अनुवर्तत इति द्रष्टव्यं। काष्ठादयश्चैते ऽद्भुतपर्यायाः
पूजनवचनाश्च भवन्ति। तत्र येषां हि त्रिविधपर्वाद्भुतपर्यायत्वं अमातापुत्रादीनां तेषां समपदेन विग्रहः। काष्ठाध्यापक इति क्रियाविशेषणं
काष्ठशब्दो द्वितीयान्तः समस्यते। क्रियोगलक्षणा तु षष्ठी क्रियाविशेषणाद्भुन भवति धात्वर्थप्रतियत्कर्मत्वेनैव षष्ठी कर्त्री साहचर्यात् तयोर्हि
धात्वर्थप्रतिकर्त्री तत्र षष्ठी तत्साहचर्यात्कर्माप्येतादृशमेव गृह्यते। विशेषणं तु धात्वर्थेन समानाधिकरणत्वात् तत्प्रतिकर्म सर्वव्यापि

॥पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः॥ ॥पूजनेभ्यः काष्ठादिभ्य उत्तरं पदं पूजितमनुदात्तं भवति। काष्ठ। काष्ठाध्यापकः
काष्ठाभिरूपकः। दारुण। दारुणाध्यापकः। अमातापुत्र। अमातापुत्राध्यापकः। अनुज्ञात। अनुज्ञाताध्यापकः। भृश। भृ
शाध्यापकः। घोर। घोराध्यापकः। परम। परमाध्यापकः। सु। स्वध्यापकः। अति। अत्यध्यापकः। कल्याण। कल्याणाध्या
पकः। मयूरव्यंसकादित्वात्समासः। समासे चैतदनुदात्तत्वं समासान्तोदात्तत्वापवाद इष्यते। दारुणमध्यापक इत्यादिषु
न भवति॥ ॥श्रीः॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

शेषणान्न षष्ठी भवति। अत एवमलोप इति वक्ष्यते। षष्ठ्यां सत्यां समकारभावादनुपपन्नमेतत्स्यात्। कथं पुनः कर्तृप्रधानेक्तदन्ते गुण
भूतायाः क्रियायाविशेषणेन संबंधः। साधनसंबंधवदुपपद्यते तद्यथा ग्रामं गन्तरि स्यादेरुगुणभूतायामपि क्रियायाः साधनेन संबंधः
तथा विशेषणेनापि तन्नोपपन्नः। काष्ठाभिरूपक इति। आभिरूप्यं काष्ठेन विशेष्यत इति नपुंसकप्रथमान्तस्य समासः। एवं सर्वत्र प्रवृत्ति
निमित्तमात्रेण काष्ठादीनामन्वयाद् भवाविभिः सामानाधिकरण्याभावान्मयूरव्यंसकादित्वमाश्रितं समासे चैतदित्यादि। चकारोव
धारणे यदि समास एवैतदिष्यते कथं वार्त्तिककारेणोक्तं पूजितस्यानुदात्तत्वे काष्ठादिग्रहणमलोपश्चेति। न हि समासे तेषामं सोमकारः सं
भवति विभक्तेर्लस्यादित्यत आह॥ ॥छ॥ ॥छ॥ ॥

का॰ प॰ १
२६

मल्लोपश्चेत्यनेनापीति। कथं पुनरयं विषयो नाख्यायते अत आह पञ्चेति। समासे हि विभक्तेरभावान्मकारेण श्रूयते अयमेव लोप इति किं
पुनः कारणमेवं काशकुशावलंबनेन वार्त्तिकं आख्यायते अत आह समास इति अन्येनाप्युक्तः पदिति समास एवैतदभिमतं भविष्यत्यस्याम
दृश्येवावश्यं तल्लोपवचनानुवाकविषयमेवैतद्ग्रहणमध्यापकदृश्यादिकं तु रूपं पदीक्ष्य नेविकल्पेन मलोपो वक्तव्य इति। पूजनादित्येव पूजित
पादग्रहे सिद्धे इति। पूजनस्य पूजितापेक्षत्वादिति भावः। अनंतरपूजितप्रतिपत्त्यर्थमिति। पूजनात्पूजितमिति सूत्रे समासगतमानंतर्यं वि

मल्लोपश्चेत्यनेनापि अयमेव विषय आख्यायते। यत्र विभक्तेरभावान्मकारेण श्रूयते तत्रानुदात्तत्वमिति। असमासे हि मल्लोपो नैवोच्यते दारुणं
पचति दारुणमध्यापक इति। पूजनादित्येव पूजितपदग्रहे सिद्धे पूजितग्रहणमनंतरपूजितप्रतिपत्त्यर्थं। एतेनैतद्वचनं ज्ञापकं ग्रहणं प्रकरणे
पंचमीनिर्देशेऽपि नानंतर्यमाश्रीयत इति। तथा च यद्वृत्तान्नित्यमित्यत्रोदाहृतं। अनुदात्त इति वर्त्तमाने पुनरनुदात्तग्रहणं प्रतिषेधनि
वृत्त्यर्थं॥ सगतिरपि तिङ् ३०॥ ॥सगतिरप्यगतिरपि तिङ् पूजनेभ्यः काष्ठादिभ्यः परः प्रजिनोऽनुदात्तो भवति। यत्काष्ठं पचति। यत्का
ष्ठं प्रपचति। यद्दारुणं पचति यद्दारुणं प्रपचति। तिङ् इति निघातस्य निपातैर्यद्यदिहंतेति प्रतिषेधः प्राप्ते पुनर्विधानं। सगतिग्रहणं त्वगतिरपि
निहन्यते। गतिग्रहणेन चात्रोपसर्गग्रहणमिष्यते। इह च न भवति। यत्काष्ठं शुक्लीकरोति। यत्काष्ठं कृष्णीकरोति २६ २६ ॥

दोषणं विज्ञायत इति भावः। कथं पुनः पंचमीनिर्देशेऽव्यवहितस्य प्रसंग इत्याह एतदेवेति। ज्ञापनस्य प्रयोजनमाह तथा चेति अनुदात्त इति वर्त्तमा
न इत्यादि। प्रवृत्तं तस्यानुदात्तग्रहणं नलुडित्यादिना प्रतिषेधनसंबंधमतस्तद् नुवृत्तो प्रतिषेधोऽप्यनुवर्त्तेत तत्र पद्यस्य योगस्य समासविषयत्वा
न्नादृशो विषयो न संभवति। यत्रामंत्रितादेर्निघातः प्रतिषिध्येत तथापि कुत्सनेन सुप्यगोत्रादौ विस्पष्टादीनुदात्तश्च प्रतिषेध एव स्यात्तस्मान्निवृत्त्यर्थं
पुनरनुदात्ताग्रहणं॥ ॥सगति॥ ॥यत्काष्ठं पचतीति। यो न पिमल्लोपश्चेत्यनेन वावपि मल्लोपमा कृणोपि तिङं तेपरतो नैव लोपमिच्छतीति। सग
तिग्रहणादगतिरपि निहन्यत इति। कथं तुल्ययोगे अत्र सहशब्दः तत्र द्वयोरपि कार्ययोगो भवति तद्यथा सपुत्रो भोज्यतामित्युक्ते पुत्रोऽपि भोज्यते अपि यत्र ह
णं यत्र गतिर्न प्रयुज्यते तत्र केवलस्यापि तिङं तस्य यथा स्यात् गतिप्रयोगे तु द्वयोः सहैव भवति अग्रहणात्सर्वो योगः सुबंतविषय एव विज्ञायते २६

रामः
२६

।कुत्सने च॥ ॥ पचति क्लिश्नातीति। कथमत्र समानवाक्यत्वं सामर्थ्यं चेति चिंत्यं। कर्तुः कुत्सने मा भूत् पचति पूतीति। कर्तृत्वमत्र कुत्स्य
तेऽस्येदमयुक्तमिति क्रियायाः शोभनेनैव तत्र कर्तृत्वस्य विशेषणे पूतित्वं न कर्त्रा समानाधिकरण्यमिति दारुणमभिरूपकमित्यादिवत् नपुं
सकत्वं। एवं च द्विवचनबहुवचनेऽप्येकवचनमेव भवति पचतः पूति पचन्ति पूति। प्रायेण तु पुल्लिंगं पठ्यते। ननु क्रियाप्रधानेऽस्मिन्नाख्याते सा
धनं कथं। विशेषणेन संबंधमप्रधानं प्रपद्यते उच्यते। एकार्थीभावमापन्नं तदेतदुपसर्जनं। विशेषणेन संबंधस्य नैवोपपद्यते। प

कुत्सने च सुप्यगोत्रादौ॥ ॥ सुबादिनिघ्नतं कुत्सने च सुबंते गोत्रादिवर्जिते परतः सगतिरगतिरपि
तिङ् अनुदात्तो भवति। पचति पूति। प्रपचति पूतिः। पचति मिथ्या। प्रपचति मिथ्या। कुत्सन इति किं पचति शोभ
नं। प्रपचति शोभनं। सुपीति किं पचति क्लिश्नाति। अगोत्रादाविति किं पचति गोत्रं। पचति ब्रुवं। पचति प्रवचनं।
क्रियाकुत्सन इति वक्तव्यं कर्तुः कुत्सने मा भूत्। पचति पूतिर्देवदत्तः। प्रपचति पूतिः॥ ॥ श्री॥ ॥

था न हि भवति अरुस्य राजपुरुष इति। यस्य तु नैकार्थीभावस्तदप्रधानमपि विशेषणेन युज्यते यथा अरुस्य राज्ञः पुरुष इति। एवं सा
धनं क्रियां प्रति गुणभूतमप्येकार्थीभावाभावाद्विशेषणेन युज्यते। तथा साधनप्रधाने कृदंते तु क्रिया गुणभूतापि विशेषणेन युज्य
ते दारुणमध्यापक इति। यद्येवं तर्हि साधनस्य विशेषणेन योग एवं क्रियांतरेणापि प्राप्नोति पचति पठति पचति पश्यति पाचकः पठ
ति पाचकः पश्यतीति वत्। किं कुर्मः। न तावदेवं दृश्यते न तदेवं प्रतिपन्नव्यं। आर्यस्त्रीतरसंबंधं यस्तु न सहते यथा। स्नात्वा कं तु संस्कारात्
र्यसेवानुमन्यते। तथा क्रियापि विशेषणेन संबंधं कर्तुः स्वस्यानुमन्यते। स्वानुरक्तं तु कर्मीणं न क्रियांतरगामिनमिति॥ ॥ ॥

इतिस्वेति। तिच्छेतः इतिशब्दस्याद्युदात्त[?]गवेसेत्तिप्रबाकुलकास्त्रतोपिभवतिबाकुलकादेवगुणाभावः तस्यनिघातनिमित्तस्योदात्तत्वंयथा
स्यादितिचित्वमुपसंख्यायते। विभाषितमिति। बह्वर्थमिति। तं विभाषानिहन्यतेयदाचनिहन्यतेतदाऽप्रतिंतेनोदात्तः क्रियाकुत्सनइत्यादियदुक्तंतत्र
प्रमाणत्वेनभाष्यपठितामार्योपठति। सुपिकुत्सनइतिमलोपइष्टोतिङीतिचोक्तार्थमितिभाष्येतावदयमर्थः मलोपश्चेतिवार्तिककारेणोक्तोमलत्तो
पस्तिङितेइष्टःदाहरणपचतीति। एवंमलोपश्चेतिवाक्यमुक्तार्थमाचार्यैरिति। वृत्तोतुश्लोकांतर्गततत्वारंपचारःपदितोनत्वत्रास्योपयोगःकश्चित्

इतिश्चानुबंधोभवतीतिवक्तव्यंतेनायमंतोदात्तोभवति। विभाषितंचापिबह्वर्थमनुदात्तंभवतीतिवक्तव्यंपचंतिइति
प्रपचंतिइति। सुपिकुत्सनेक्रियायामलोपइष्टः तिङीतिचोक्तार्थं। इतिश्चानुबंधो विभाषितंचापिबह्वर्थे॥ ॥
गतिर्गतौ॥ ॥गतिर्गतौपरतःअनुदात्तोभवति· अभ्युद्धरति· समुदानयति· अभिसंपर्याहरति। गतिरिति किं देवद
त्तःप्रपचति २७ श्रीरामनामसत्या॥ ॥श्रीरामायसदासहार्दं॥ ॥श्रीरामनाम॥ ॥ ॥श्री॥

समासेचेतदनुदात्तत्वमिष्यतइत्युक्तत्वात्॥ ॥गति॥ ॥अभ्युद्धरतीति। सर्वोपसर्गसाधारणीहरणक्रियाप्रतीयतेनामुद्धिशिनष्टि
उद्धरतीतिउदेवोर्ध्वताविशिष्यगम्यतेतामभिविशिनष्टि अभ्युद्धरतीति। तत्रअन्योन्यापेक्षयानास्तिगतित्वंयद्यपिद्वयोः क्रियांप्रतिगतित्वात्तु
निहतोभिगेतिर्गतौ। समुदानयतीत्यत्रसमुदोर्द्वयोरपिनिघातः। अभिसंपर्याहरतीत्यत्रत्रयाणां २७ श्रीराम॥ श्रीरामचंद्रायनमः॥ रामे
२७

गताविति किमिति। क्रियां प्रति गतिर्भवति क्रिया च धातुवाच्या धातुश्च द्विविधः सगतिरगतिश्च प्रत्ययाश्चापि धातोर्द्वये भवन्ति कृतस्तिङश्च तत्र कृ
दन्ते सगतावगतौ च कृत्स्वरः थाथादिस्वरेण तिङ्स्वरेषु कृत्सु शेषनिघातेन गतिर्निहन्यत एव। तिङन्ते यदि केवले उदात्तवति भवति तावदुत्तरसूत्रेण भवत्येव
निघातः अनुदात्ते तु नियमार्थमयमारम्भो भविष्यतीति तिङन्ते यदि भवति उदात्तवत्येव भवतीति तत्र सगतिरेव तिङ् विशिष्यते इति प्रश्नः। आ मन्द्रैरिति।
ननु च क्रियायोगो गतिर्भवति न चात्र उः क्रियायोगोस्ति मन्द्रशब्दस्य क्रियावाचित्वाभावात् तत्र आह याहीत्येतमनीति। तेन प्राग्धातोरिति प्रयोगनियमान
संहितानियमः ननु च व्यवहितप्रयोगेपि नित्यमस्येवेति भावः। ननु याः क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञे भवतस्तेन तश्च याहीत्येतं प्रति गति

गताविति किं। आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः। याहीत्येतं प्रति क्रियायोगादाङित्येष गतिः तस्य
गतावित्येतस्मिन्नसति गतिस्तिङीत्येतदनाश्रित्य परनिमित्तकमनुदात्तत्वं स्यादेव॥ ॥श्री॥ ॥७॥

तेपि मन्द्रप्रत्ययगतित्वादत्राप्रसङ्गः इहापि तर्हि न प्राप्नोति अभ्युद्धरतीति उद्धं प्रत्ययगतित्वान्माभूदुद्धं प्रति गतिः समुदायं प्रति गतिर्गतिर्भवति
उदात्तविशिष्टा हि क्रिया अभिनाविशेष्यते आ मन्द्रैरित्यत्रापि मन्द्रादिकरणापेक्षं कर्तृकं यागमसाधनविशेष्यत इति समुदायं क्रियाविशेषवाचिनं प्र
त्याङ्गतित्वान्निघातः प्राप्नोति। न प्राप्नोति। एवं धातुरुपसर्गेणापुनरनेयश्चात्साधनेन आणानेहि मन्द्रादेः साधनत्वं मन्द्रैर्हरिभिर्याही
ति न तु यानेतत तश्च न समुदायं प्रत्याङो गतित्वमिति नात्रस्येवात्र प्रसङ्गस्तत्राह तत्स्येति। न हि परनिमित्तानुपादानेय क्रियायुक्ताः प्रादयस्तं प्रती
तिगम्यते तत तश्च वस्तुतो गतित्वाश्रयो निघातः स्यादिति मन्यते। यदि तु पदस्येत्यधिकारात्समर्थपरिभाषोपस्थानाद्घेन गतेः सामर्थ्यं तं प्रति ग
तेरिति विज्ञायेत तदा शङ्कां गताविति व्यवच्छेदः। यदाह गतेरनुदात्तत्वे गतिग्रहणानर्थक्यं तिङ्त्ववधारणाच्छेदोर्थमिति चेन्नागतित्वादिति॥ ०॥

॥इतिङि॥ ॥उदाहरणेनिघातेर्यद्घटीतिनिघातप्रतिषेधात्तिङ्. नमुदात्तवत्।तिङ्ग्रहणंकिमर्थंतिङंतेयथास्यात्मंडूशब्देमाभूत
स्मामंद्रैरिंद्रहरिभिर्याहिमंद्रूशब्दोरकुप्रत्ययांतोन्तोदात्तः।नतुचयत्क्रियायुक्ताइतिवचनाद्गतिशब्दःपित्रादिवत्संबंधिशब्दस्तत्संबंधि
नमाक्षिपतीतिक्रियावाचिन्येवोदात्तवतिभविष्यतिकुर्दन्तेचातिप्रसंगाभावःएवंसत्यपिवोकत्तस्मान्नार्थस्तिङ्ग्रहणेनेत्याशंक्या

तिङिचोदात्तवति॥ ॥तिङंतेउदात्तवतिपरस्मः गतिरनुदात्तोभवति· यत्प्रपचतिपर्यकरोति· तिङ्ग्रह
णमुदात्तवतः परिमाणार्थं।अन्यथाहियंप्रतिगाति· तत्रोदात्तवतीतिधातावेवोदात्तवतिस्यात्· यत्प्रपच
तीति· प्रत्ययेउदात्तवतिनप्राप्नोतियत्प्रकरोतीति।यत्क्रियायुक्तास्तंप्रतिगत्युपसर्गसंज्ञेभवतइतिधातुमे
वप्रतिगतिसंज्ञा· २८ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥छ॥

रामः
२८

इतिङ्ग्रहणमितिपरिमाणमियत्तायरिमाणार्थत्वमेवस्पष्टयतिअन्यथाहीति।अक्रियमाणेतिङ्ग्रहणेधातुरेवक्रियागाचित्वाद्ग
तिसंज्ञानिमित्तमितितत्रैवोदात्तवतिनिघातःस्यान्नतुप्रत्यये।तिङ्ग्रहणात्तुप्रकृतिभागंप्रतिगतेःप्रत्ययोदात्तत्वेनाप्युदात्तवति
तिङंतमात्रेभवति।धातुमेवप्रतिगतिसंज्ञेति।यस्यक्रियायत्क्रियेतिषष्ठीसमासःअन्वयव्यतिरेकाभ्यांयस्यवाच्याक्रियातंप्रतीत्यर्थः।
धातोरेववाच्येतितमेवप्रतिगतित्वं २८

आमंत्रेन हि न प्राप्नोतीति। नन्वक्रियमाणेऽपि तिङ्ग्रहणे नैवामंत्रे प्राप्नोति पदात् हि निङं तेपि प्रत्ययोदात्तत्वेनोदात्तवति न स्यादिति। स्थितं त
दाकारान्तो आमंत्रे तत्र लिङ् मुच्यते आमंत्रेन हीति। एवं तर्हि यमत्रार्थः। पदिति तिङ्ग्रहणापत्त्याघ मकरोती माद्रौ भवति तत हि तिष्ठामंत्रे भावात् प्रा
प्नोति तस्माद्या क्रियाय त्किंचिती कर्मधारयस्य आश्रयणीयः एवं हि क्रियालक्षणामर्थं प्रतिगतित्वे तत्रार्थे कार्यस्यासंभवात् द्वाविति कार्यं विज्ञाय
मानं क्रियाप्रधानेस्सर्वत्र सिध्यतीति। अनंतरं चोपपद विशेषे अवस्थाय पितुमाह। अत्र केचिदिति। अत्रपक्षे गतिकारकोपपदानामित्यस्याय म
र्थः गत्यादीनामविशेषेण समासो भवति कृद्भिस्तु प्राक्सुबुत्पत्तेरिति। अत्र यत्पूर्वपदप्रकृतिस्वर इति। गतिकारकोपपदात्कृदित्यत्रापप्र

आमंत्रितं हि न प्राप्नोति प्रपचतितरामिति। अत्र केचिदामंत्रेन गतिसमासः एवमपि सति शिष्टत्वादाम एव स्वरे सति गते
रनुदात्तत्वं पदमेकवर्जमित्येवानुदात्तत्वं सिद्धं। येषां गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेरित्येनेन वच
नेन कृदंतेनैव प्राक्सुबुत्पत्तेः समासो भवति नाम्नेनेति दर्शनं तेषामेवंविधे विषये समासेनैव भवितव्यमिति पृथक्स्वर
प्रयोजनो मत्यां अनेन गति निघातेन भवितव्यमिति प्रयोजनमस्ति। तदर्थं यत्नः कर्तव्यः उदात्तवतीति किं प्रपचतिप्रकरो
ति॥ ॥ आमंत्रितं पूर्वमविद्यमानवत्॥ ॥ आमंत्रितान्तं पूर्वमविद्यमानकं द्रवति तस्मिन्सति यत्कार्यं तन्न भवति।
असति यत्कार्यं तद्भवति। कानि पुनरविद्यमानवत्त्वे प्रयोजनानि। ॥

पचति देवदत्त इत्यत्र कृद्ग्रहणं स्थितं न प्रसाख्यातमिति पूर्वपदप्रकृतिस्वरस्यैवात्र प्रसंग इति मन्यते। अक्रियमाणेऽपि तिङ्ग्रहण इति। य
था वाक्रियमाणे तिङ्ग्रहणे उदात्तवत्त्वे सति निघातः। सिध्यति तथानंतरमेवोक्तं। अथ तर्हि यत्नस्येति। यथायं पक्षः संभवति पश्चात्र यत्ने दोष
स्तत्सर्वं गतिकारकोपपदात्कृदित्यत्रोक्तं। येषां तिस्याद्गत्यादीनां कृदंते नैव तत्रापि प्राक्सुबुत्पत्तेरित्यर्थः। तदर्थं यत्नः कर्तव्य इति। त
त्रायं यत्नः तिङ्ग्रहणं न करिष्यते या क्रिया पाक्षिकेति वाश्रयिष्यत इति॥ ॥ आमंत्रितं॥ ॥ किमिदमविद्यमानवदित्याह तस्मिन्सतीत्या
दि। तत्र तस्मिन्सति यत्कार्यं तन्न भवतीत्यत्रोदाहरणमाह। ॥ ॥

१का०प०२
२९

आमंत्रितं निघातेति। असति यत्कार्यं तद्भवतीत्यत्रोदाहरणमाह एज्जायामित्यादि। आमंत्रिताद्युदात्तत्वे कर्तव्ये इति। असतीत्यर्थस्य प्रहणे। आमंत्रि
तमविद्यमानवदिति असमानेऽस्मिन्नस्याद्युदात्तत्वे पिन्नास्तिके कर्तव्ये अविद्यमानस्यात्। क इदानीं तस्यावकाशः। यत्राविद्यमानवत्प्रतिषिध्यते विकल्प्य
ते वा। तथा अयादाहाविसर्जनिकाराणामादरिस्थावकाशः। उभयोः अपमुहवाम्युच्छन्स्वाल्यत्राविद्यमानवद्भावामावादेवभवति। इदं तु आदृषभं वय
त्वादेशो भवति। एवं तु इदं पिवतुल्यं सुतो मदाय इदं पिवहय श्रुतस्य इह अग्ने षाहि शग्निभिः वायो याहि शिवाभिः इत्यादौ निङ्। ब्रातः प्रासी

आमंत्रितं निङ् निघातयुष्मदस्मदादेशाभावाः। देवदत्त यजदत्त स्या मंत्रितस्य पदात्परस्येति निघातो न भवति। पाष्ठिकं त्वा
मंत्रिताद्युदात्तत्वं भवति। देवदत्त पचसीत्यत्र तिङः तिङ इति निघातो न भवति। देवदत्त नव ग्रामः त्वं देवदत्त मग्रामः स्वमित्येवमादि
षु युष्मदस्मदादेशा न भवंति। एज्जायामनन्तरप्रश्नाति विषयः प्रयोजनं। यावद्देवदत्त पचसी त्यत्रापि एज्जायानानन्तरमित्येष प्रति
षेधो भवति। जात्वप्रर्वमित्येतद्देवदत्त जातु पचसीत्यशपि भवति। आहो उताहोवानन्तरमित्यनन्तराहो देवदत्तः पचसि उताहो देवद
त्त पचसीत्यत्रापि न भवति। आम एकांतरमामंत्रितमनन्तिक इति आं भो यच्च मिदेवदत्त इत्यत्रापि भवति। आमंत्रितमिति किं देव
दत्तः पचति। पूर्वमिति किं देवदत्त त्वयेत दामंत्रिताद्युदात्तत्वे कर्तव्ये नाविद्यमानवद्भवति। एवं त्वं च पराणेक्षं भवतीति परस्येव कार्यं
कर्तव्यमसुत्रिमित्तेऽन्यनिमित्तत्वात् अविद्यमानवद्भवतीति नतु यत्कार्यं देवदत्त पचसीत्यत्रापि आमंत्रिताद्युदात्तत्वं भवत्येव २९ ॥

ति। कर्तुमोपचयलः। उक्तं हि युष्मदादायादपरिसमाप्तेर्याहाहाविसर्जनिकारे इति यदामंत्रितं एवमविद्यमानवद्देवदत्त पचसीत्यत्र पच
सीत्यस्य पक्षे देवदत्तशब्दस्य पूर्वत्वमस्तीत्य विद्यमानवत्त्वे सति आमंत्रिताद्युदात्तत्वं न स्यादित्यत आह पूर्वत्वं चेति। पूर्वशब्दस्य संबंधिशब्दत्वा
द्यप्रतिष्ठ एवं त्वं तत्कार्ये प्रियेवाविद्यमानवत्त्वे च स्वकार्यं प्रतितेन नायदोषः इत्यर्थः। कार्यशब्देनैतद्दर्शयति अविद्यमानवत्कार्यं मत्रो ति
ति दिश्यते न तत्र पूर्वशब्दस्य संबंधिशब्दत्वेन परस्य कार्ये कर्तव्ये इत्येतावदाश्रीयते न तु परं प्रत्यविद्यमानवत्पूर्वेण प्रति विद्यमानं चेत्यर्थ इति २९ प्रमी
२९

पदितथास्यादिमंमेगंगेयमुनेसरस्वतीत्यत्रगंगेशब्दस्ययमुनेशब्दंप्रत्येवाविद्यमानवत्त्वंनमेशब्दंप्रतीतिव्यवधानाद्यमुनेशब्दस्यनिघातेप्रतिमेशब्दोनिमित्तंतस्मा
त्स्यथोपदर्शितेत्वर्थेयरस्यकार्यंकर्त्तव्यंदृश्यतावत।तत्कार्येस्वनिमित्तमन्यन्निमित्तंचेतिविशेषाभावान्मेशब्दापेक्षेपिनिघातेगंगेशब्दस्याविद्यमानवत्त्वंसिद्ध
मितिचेदतत्त्वनिमित्तेन्यन्निमित्तेचेतिसूचितंतदेवमुक्तंकंठेदर्शयति इहेत्यादि।गंगेशब्दोविद्यमानत्वात्स्वाययनिमित्तंनभवतीत्येतावतानतुमेशब्दस्यनिमित्तभावंप्रति
बध्नाति।सत्यर्थः।परंप्रत्यविद्यमानवद्भवतीत्याश्रीयमाणेहितथास्यात।वत्करणमंतरेणापिगौणत्वेनापित्वादावतिदेशोदृश्यतेतत्किमत्रवत्करणेन।स्यादेतत।पू
र्वमामंत्रितमविद्यमानमित्युच्यमानेकुतश्चिदपिपूर्वमामंत्रितंनप्रयोक्तव्यंपरमेवतुप्रयोक्तव्यमित्यर्थः स्यादितितत्रयद्ययमर्थोभिप्रेतःस्याद्राजरत्नादि

इहमंमेगंगेयमुनेइतिगंगेशब्दःपूर्वमामंत्रितंततःपरस्ययमुनेशब्दस्यानुदात्तकर्त्तव्यस्यमविद्यमानवत्वान्ननिमित्तंभवति
मेशब्दस्यचनिमित्तभावंनप्रतिबध्नाति॥ ॥ ॥श्री४॥ ॥ ॥श्री४॥ ॥

परमामंत्रितंचेत्स्येवब्रूयात।नत्वयादृग्दात्रिंपत्रानुवर्त्तनेयद्येवंतथाप्यामएकांतरमित्यस्मानंतरंचेतिवक्तव्यंस्यात्परमामंत्रितंभवतिनपूर्वमित्यर्थः।त
देवमंतरेणापिवतिमतिदेशासिद्धः।इदंतर्हिप्रयोजनंस्वाश्रयमपिपथास्यात।आंभोदेवदत्ताइस्यत्रामएकांतरमामंत्रितमनंतिकइत्येकांतरत्वाययथास्यात।
एकवचनांतंपुत्ररस्त्रस्यविषयः बहुवचनांतेतुविभाषितंविशेषवचनेबहुवचनमितिपक्षेनिघातप्रसंगः।यद्यप्यातिदेशिककार्यविरुद्धंस्वाश्रयम
तिदेशेपिसत्यपिवत्करणेभवति।इहतुवत्करणाद्याभावाद्विरुद्धमपिकचित्प्राप्यते।अविद्यमानवत्त्वविरोधिनीह्येकांतरतामासाद्यनात्राअतिप्रसंगोनोद्भाव
नीयः॥ ॥ ॥श्रीः॥ ॥श्री४॥ ॥

प०का०अ०१ ॥नामंत्रिते॥ ॥द्वौ नञौ प्रकृतमर्थं गमयतः इत्याह। किं तर्हि विद्यमानवदेवेति। माणवक जटिलकाध्यापकेति। अत्र जटिलकशब्दो माणवकशब्दापेक्षया
३० विशेषवचनोध्यापकशब्दापेक्षया तु सामान्यवचन इति द्वयोरप्यविद्यमानत्वं न भवति। पूर्वस्येत्यादिना प्रतिषेधस्य फलं दर्शयति। देवदत्त यज्ञदत्तेति। सा
मान्यवचनं विशेषवचनापेक्षमिति विवक्षत्युत्तरसूत्रे। ततश्चपथ्यापत्तदत्तशब्दः समानाधिकरणो न भवति एवं पूर्वामंत्रितगतार्थविशेषाकारकवचनोपि न भवती
ति देवदत्तशब्दोपि सामान्यवचनो न भवति तस्माद्बुद्धिं गतिकत्वात् विकल्पमेव। एवं युक्तमिति। नेत्रिरीयके आम्नायेन सह समानमी प्रकृत्यर्थ इति। इतिसारस्व

नामंत्रिते समानाधिकरणे सामान्यवचनं॥ ॥आमंत्रितांते समानाधिकरणे परतः आमंत्रितांतं पूर्वं सामान्यवचनं नाविद्यमानव
द्भवति। किं तर्हि विद्यमानवदेव। अग्ने गृहपते। माणवक जटिलकाध्यापक। पूर्वस्य विद्यमानत्वात्परमनुदात्तमेव भवति। आमंत्रित
इति किं देवदत्त यजसि। समानाधिकरण इति किं। देवदत्त पंडित यज्ञदत्त। विशेषणं पंडितशब्दो न पूर्वेण समानाधिकरणः सामान्यव
चनमिति किं पर्यायेषु माभूत्। हे अघ्न्ये दे वि सरस्वति इडे काम्ये विहव्ये। एते पर्यायशब्दाः एवं युक्तमेतानि ते अघ्न्ये नामानीति॥ ॥
विभाषितं विशेषवचने बहुवचनं॥ ॥पूर्वेणाविद्यमानवत्वे प्रतिषिद्धे विकल्प उच्यते। विशेषवचने समानाधिकरणे आमंत्रितांते
परतः आमंत्रितांतं बहुवचनांतं पूर्वं विभाषितमविद्यमानवद्भवति। देवाः शरण्याः ब्राह्मणा वैयाकरणाः २ सामान्यवचनाधिका
राद्देव विशेषवचन इति सिद्धे विशेषवचनग्रहणं विस्पष्टार्थं। बहुवचनमिति किं। माणवक जटिलकाध्यापक। नित्यमेतद्विद्यमान
वदेव भवति॥ ॥इति वामनकाशिकायां वृत्तौ अष्टमस्याध्यायस्य प्रथमः पादः ३०

ति प्रिये प्रेयसि महि विश्रुति एतानि ते अघ्न्ये नामानीति। वृत्तौ त्वमथापाठः शाखांतरे द्रष्टव्यः॥ ॥विभाषितं॥ ॥बहुवचनमिति वार्त्तिके द पम०
र्शनात्तिद्धं। शाखात्वेन प्राप्तिः शरणं तत्र साधनः शरण्याः शरणशब्दो हि शरणे पि दृश्यते शरणं भवेत मतिकारणिकं भव भक्तिगम्यमधिगम्य ज ३०
नाः इति। शार्मण्या इति पाठे शर्मणि साधवः शार्मण्याः। सामान्यवचनाधिकाराद्देवेति। सामान्यस्य विशेषापेक्षत्वाद्यं प्रति सामान्यवचनमिसेत तस्य
तिंस्मिन्विशेषवचन एव भवतीति॥ ॥इति हरदत्तमिश्रविरचितायां पदमंजर्यामष्टमस्याध्यायस्य प्रथमः पादः ३० ॥ ॥ ॥

॥ ॥पूर्वत्रासिद्धं॥ ॥पूर्वत्रासिद्धमित्ययमधिकार इति। यदि तु स्वतन्त्रो विधिः स्यात् ततो वक्ष्यमाणस्य त्रिपाद्यौ लक्षणस्य समुदायस्य पूर्वत्र सपादसप्ता-
ध्यायी लक्षणे समुदाये ऽसिद्धत्वमुक्तं स्यात् न तु त्रिपाद्यां पूर्वत्रयस्यासिद्धत्वमापादितं स्यात् ततश्च गुडलिण्मानो धुङ्मानित्यत्र डत्वढत्वयोरसिद्धत्वाभा-
ता स्स्यद् इति मुत्वयोर्बलः प्रसङ्गः। तस्मान्न विधिः। अथ परिभाषा स्यात् तस्मिन्पूर्वत्रेवाष्टाध्याय्यां पूर्वं प्रति परस्यासिद्धत्वात्तेन नेस्त स्पत्यादाविनादि। मुक्ते च षु
सहादित्वस्यासिद्धत्वाड्डकारो न निमित्तं इनादयो न स्युः तस्मादधिकारः। एवं सति यदनेन संख्यादित्वं भवति तद्दर्शयति तत्रेति। तत्राधिकारे सतीत्यर्थः। अधि-
कारे हि त्रिपाद्यां गतानामविशेषेण सपादसप्ताध्यायीगतानामसिद्धत्वं त्रिपाद्यां च पूर्वत्र परस्यासिद्धत्वं भवतीति विधेन तेनेतावत्सपादपि तु शक्यं त्रिपाद्यां
पूर्वत्र परस्यासिद्धता नापादयितुं परिभाषायां चानेनावतिर्यथा स्वस्तिसर्वत्रेव प्रसङ्गात्तस्मादधिकारत्वादेतावत्संपद्यते एतावदेव च संपद्यत इत्यर्थः। तेन वम

॥ ॥पूर्वत्रासिद्धं॥ ॥पूर्वत्रासिद्धमित्ययमधिकार आध्यायपरिसमाप्तेः। यदित ऊर्ध्वमनुक्रमिष्यामः पूर्वत्रासिद्धमित्येवं त-
द्वेदितव्यं। तत्र येयं सपादसप्ताध्याय्यनुक्रान्ता एतस्यामयं पादोनाध्यायः ऽसिद्धो भवति। इत उत्तरं चोत्तरोत्तरो योगः पूर्वत्र पूर्वत्रासिद्धो भवति।

अभिमितव्यं येयं सपादसप्ताध्यायीत्यनेन विधिहेतोरप्रवृत्तिर्दर्शिता। इत उत्तरमित्यादिना त्वधिकारहेतोस्तत्तच्छेषमिति वक्तव्यं प्रयोजनं चाधिकारस्येति
। निष्प्रयोजनत्वादधिकारो ऽयमित्युक्तत्वात्। किं हि नाम अधिकार एवास्मिन्नसिध्यति यदर्थो विधिराश्रीयेत। सपादानामध्यायानां समाहारः सपादसप्ताध्यायी सपादा चा-
सौ सप्ताध्यायी चेति कर्मधारयः। सपादेति टाबन्तपाठे त्वसमासः। उत्तरस्त्वरो योग इति पाठः। वीप्सायां द्विर्वचनेन सुलुको ऽसंभवात्। तत्राध्यायग्रहणेन योग-
ग्रहणेन च शास्त्रासिद्धमाश्रीयत इति दर्शयति। एतच्च पूर्वत्रेति वचनाल्लभ्यते शास्त्रस्य हि मुख्यं पूर्वत्वं संनिवेशविशेषयोगित्वात् कार्यस्य तु शास्त्रद्वा-
रकौपचारिकं न हि मुख्ये सति गौणस्य ग्रहणं युक्तं कथं पुनरुच्चारितं शास्त्रमसिद्धमित्युच्यते न हि वचनशतेनापि सिद्धमसिद्धं भवति अत आह। ॥

सिद्धकार्यं न करोतीत्यर्थ इति। वचनात् निर्देशस्याश्रीयत इत्यर्थः। शास्त्रस्यासिद्धत्वमाश्रीयतेन कार्यस्येति दर्शितं तत्र प्रयोजनमाह तदेतदिति
विदिदं शास्त्रविषयमसिद्धवचनं तदेतदित्यर्थः। आदेशो लक्षणं निमित्तं यस्य कार्यस्य तस्य प्रतिषेधार्थं उत्स. अतेआदेशो न निवर्त्तत इत्युत्सर्गः
स्थानीमलक्षणं निमित्तं यस्य तस्याभावः प्रवृत्तिर्यथा स्यादित्येवमर्थं चासिद्धवचनं। कार्यासिद्धत्वे तु त्सर्गलक्षणस्याभावो न सिध्यति। तत्रा
देशलक्षणप्रतिषेधस्योदाहरणमाह अमुष्मा उद्धरेत्यादि। आयावोः कृतयोर्लोपः शाकल्यस्येति लोपः। मलोपस्यासिद्धत्वादिति। शास्त्र

सिद्धकार्यं न करोतीत्यर्थः तदेतदसिद्धवचनमादेशलक्षणप्रतिषेधार्थमुत्सर्गलक्षणभावार्थं च· अमुष्मा उद्धरेत्यत्रा
नयश्च सोमादित्य उत्पत्त्य लोपस्यासिद्धत्वादाकुणाश्रयकः सवर्णे दीर्घ इति च न भवति· अमुष्मै अमुष्मात्· अमुष्मि
न्निति उत्वस्यासिद्धत्वात् स्मायादयो भवंति· ॥ १ ॥ श्री॥ ॥ श्री॥ ॥ श्री॥ ॥ श्री॥ ॥ छ॥ ॥

द्वारकं मलोपस्यासिद्धत्वं। परादिहि पूर्वशास्त्रसंनिधौ परशास्त्रमसिद्धं तद्दानत्वानिपादितं कार्यं सुतरामसिद्धं भवति। उत्सर्गलक्षणभावस्योदाह
रणमाह अमुष्मा इति। अत्रामस्यासिद्धत्वे परत्वाद् इमो से दाँदुदो मइत्युत्वे मत्वे सत्यनन्तर इति स्मायादयो न स्युः असिद्धत्वे तु पूर्वं स्मायादयः पश्चा
दुत्वमिति सिद्धमिष्टं। उत्वस्येति। उत्वशास्त्रस्येत्यर्थः॥ १ ॥

शुष्किकेत्यादिश्लोकः। अत्र निदर्शनमिति प्रत्येकमभिसंबध्यते निदर्शनमुदाहरणमित्यर्थः। मतोर्वत्वे कर्त्तव्ये फलांजशोत इति जश्त्वे
सिद्धे सति गुडलिहमानिति निदर्शनं निकोपधायाः इति पुंवद्भावो न भवतीति। कोपधप्रतिषेधे तद्धितवुग्रहणमिति सेत इत्याग्रिसेदंप्रयोजनमु
क्तं। क्षामिमानिति। क्षायो मः इति निष्ठानकारस्य मत्वं ततो· तदस्यास्तीति इनि जंताद् तदनिठनयितीनं ताद्भामतुप्। वहेर्हिस्यादि वह प्रापणे निष्ठा।
संप्रसारणं होढः झषस्तथोर्धोधः ष्टुत्वं टोटेलोपः ढ्रलोपे पूर्वस्य दीर्घोणः जटइति स्थिने णिचि टिलोपः लुङ् च्लेश्चङ् हृतेरसेतद्धिरूप्य

शुष्किका शुष्कजंघा च क्षामिमानौ जटस्तथा॥ मतोर्वत्वे फलांजशत्वे गुडलिहमान्निदर्शनं। शुष्किकेत्यत्र शुषः कः इत्यस्य
सिद्धत्वात् दुर्द्दीवामानः स्थाने यकपूर्वाया इत्येत्वं न भवति· ओजडदिति तस्य इत्येतन्न भवति· शुष्कजंघा इति न कोपधाया
इति पुंवद्भावप्रतिषेधो न भवति· क्षामिमानिति क्षामस्यापत्यं क्षामिः क्षामो वास्यास्तीति क्षामी क्षामिः क्षामी वा यस्यास्ती
ति क्षामिमान्· क्षायो मः इत्यस्यासिद्धत्वात् मादुपधायाश्चेति वत्वं न भवति· ओजडदिति वहे निष्ठायां मूढस्तमाचष्टे इति णि
च्· तदंताल्लुङि· चङीति द्विर्वचने कर्त्तव्ये टत्वधत्वष्टुत्वढलोपानामसिद्धत्वात् णौ चव्यपदिष्टलोपस्तस्य स्थानिवद्भावात् हतर
ति द्विरुच्यते· अनल्लोपइति चप्रतिषेधात्सचादित्वं नास्तीति न ओजडदिति भवति· ओजिढदित्येतच्चुक्तित्वं तस्य उरिशह
स्यपवति। गुडलिहमानिति· गुडलिहोस्यसंतीति मतुप· तत्रटत्वजश्त्वयोरसिद्धत्वात् झयइति वत्वं न भवति॥ ॥ ॥

तेः इति अजादेर्द्वितीयस्येति वचनात्। ततो हलादिः शेषः कुहोश्चुरिति चुत्वं हकारस्य झकारः तस्याभ्यासे चर्चेति जश्त्वं जकारः तस्य
अभ्यासे चर्चेति जश्त्वं जकारः। अथात्र सन्वद्भावो कुतो नीतीलं कस्मान्न भवतीति तत्राह अनग्लोपे इति वचनादिति। कथं पुनरौजिढदिति भव
तीत्यत आह ओजिढदित्येतत्सिद्धमिति। पूर्वत्रासिद्धीयमद्विर्वचने इत्येतत्स्विह न प्रवर्त्तते अनित्यत्वात्। अनित्यत्वं चोभो साभ्यासस्येति व
चनाद्विज्ञायते अन्यथा निनेरिति णत्वे कृते तस्यासिद्धत्वात्सहणकारेण द्विर्वचने सति सिद्धं स्यात्। आणिणिषतीति। गुडलिहमा
निति। गुडलिरीति क्विप् तदंतान्मतुप् ढत्वजश्त्वयोः कृतयोर्यरोनुनासिकेत्वे तद्धिते भाषायां नित्यवचनमिति णकारः॥ ॥

१का०प०१

३२

षष्ठीनिर्देशा इति। संयोगांतस्य लोपः इत्येवमादयः पंचमीनिर्देशाद्ध्रस्वादंगादित्यादयः सप्तमीनिर्देशाद्झलो झलीत्येवमादयस्ते ॥
षामसिद्धत्वं न भवतीति यदि स्यात्तर्हि संयोगांतस्य लोपस्तत्र षष्ठीस्थाने योगे स्येतस्याभावात् छेत्ष्यस्य लोपः स्यात् प्रकृत्यो सर्वस्य प
ह्रस्वलोपप्रसंगः ह्रस्वादंगादित्यत्राप्यनियमेन दिकृशहाध्माहारास्तुर्वस्य च परस्य च प्रसंगः झलो झलीत्यत्राप्युपश्लेषिके ॥
ऽधिकरणे सप्तमीविज्ञाने पूर्वपरयोरविशेषेण प्रसंगः सत्सप्तमीविज्ञाने तु अवहितस्यापि प्रसंगः कथं पुनः एकाः सु परिभा
षा सुवचनाः तेषामसिद्धत्वं न भवति तत्राह कार्यकालं हीति ॥। संज्ञापरिभाषमिति समाहारद्वंद्वः अयमभिप्रायः संज्ञाः प ४
येत्र षष्ठीनिर्देशाः सप्तमीनिर्देशाः पंचमीनिर्देशाश्च तेषां षष्ठीस्थाने योगा तस्मिन्निति निर्दिष्टे पूर्वस्य तस्मादि
त्युत्तरस्येति च कर्तव्ये नासिद्धत्वं भवति कार्यकालं हि संज्ञापरिभाषमिति पूर्वत्रमासीं परिभाषाणां नास्तीति
। विप्रतिषेधे परमित्येषा तु परिभाषा येन पूर्वेण लक्षणेन सह परस्य द्वैते परलक्षणेन तत्र नित्यस्यासिद्धत्वान्न
प्रवर्तते। तथा च सति विस्फोर्यमवगोर्यमिति गुणः पोरुहलि चेति दीर्घत्वेन बाध्यते। अपवादस्य तु परस्याप्यु
त्सर्गे कर्तव्ये वचनप्रामाण्यादसिद्धत्वं न भवति तेन दोषाद्दोषु मित्यत्र बलत्वस्यासिद्धत्वाद्धृ इति भवति १ ॥
यो ऽत्यंतं परिभाषाश्च तद्विधाः। तस्मात्तत्रैव तास्तत्स्माः कार्यं विधातिहेतवः। अनेकस्य प्रधानस्य शेषभूता भवंत्विति। एताः
केवलमाचार्यः पृथग्देशादुपादिशत्। विधिवाक्ये तु संगत्य तत्र तत्र स्थितैरपि। बोधयंत्यः स्वकार्याणि नेकप्रदीपवत् इमा इति। य
दि कार्यकालं संज्ञापरिभाषं विप्रतिषेधे परमित्येषापि परिभाषात्रोपतिष्ठेत तत्र विस्फोर्यमवगोर्यमित्यत्र गुणं बाधित्वा हलि रा०म०
चेति दीर्घत्वं स्यादित्यत आह विप्रतिषेधे परमित्येषा त्विति। एषा तु एवं न यत्र वर्त्तत इति संबंधः मध्येऽहेतुर्यनेति विप्रतिषेधोऽहि ३२
तस्यानिमित्तकः श्वविप्रतिषेधः द्वयोस्तुल्यबलयोरेकस्मिन्विषये तं वा हं चेति प्रसंगे प्रसंगः न चायमत्र संभवति न स्याम
सिद्धस्याभावात् प्रवर्त्तितस्य सर्वथा सुपयेवमपवादोऽपि परः पूर्वमुत्सर्गं न बाधेत तत्राह अपवादस्येति। यद्यपवादस्यासिद्धत्वात्तु

नलोपः॥ ॥अत्रस्सूत्रेउत्तरसूत्रेचकार्यपादानात्कार्यकार्यस्यासिद्धत्वमुच्यते।कृतीत्येतच्चसंभवव्यभिचाराभ्यांतुग्विधिनैव
संबध्यते।विधिशब्दोभावसाधनः कर्मसाधनश्चतत्रभावसाधनानांत्रयाणांकर्मसाधनस्यैवैकस्यैकशेषः भिन्नार्थानामपिस
रूपाणामेकशेषवचनात्विधिश्चविधिश्चविधिश्चविधयः नतोवहुवचनांतेनविधिशब्देनसुबादीनांद्वंद्वस्यषष्ठीसमासः स
र्वत्रचशेषलक्षणाषष्ठीतत्रसुब्विधौशेषएवशेषः इतरेषुतुकर्मशेषत्वेन।विवक्षितंतदिदमुक्तंविधिशब्दोयमित्यादि।संबंधसा
मान्यषष्ठ्यतेनेति।संबंधसामान्यमुक्तेनयथाषष्ठ्यांतदंतेनेत्यर्थः सामान्यशब्देनस्थानेयोगत्वव्यवछेदः कथंपुनः षष्ठीस्थानेयोगे
नलोपः सुप्स्वरसंज्ञातुग्विधिषुकृति॥ ॥नलोपः सर्वत्रासिद्धोभवतिसुब्विधौस्वरविधौसंज्ञाविधौतुग्विधौचकृति·
विधिशब्दोयंप्रत्येकमभिसंबध्यमानः स्वरसंज्ञातुकांविधेयत्वात्रैः कर्मषष्ठीपुक्तेर्भावसाधनो·भिसंबध्यते· सुपातुसं
बंधसामान्यवचनषष्ठ्यंतेनकर्मसाधनः।तेनसुपः स्थानेयोविधिः सुपिचपरभूतेसर्वोसौसुब्विधिरितिसर्वत्रासिद्धत्वंभव
ति· सुब्विधौतावत· राजभिस्तत्तभिरित्यत्रनलोपस्यासिद्धत्वादतोभिसऐसितिनभवति।राजभ्यांतक्षभ्यांराजसुतक्षसु
इतिसुपिचेतिबहुवचनेझल्येदितिदीर्घत्वैत्वेनभवतः।स्वरविधौ· राजवतीत्यत्रनलोपस्यासिद्धत्वादंतोवत्याइतिस्वरो
नभवति· ॥ ॥श्री॥ ॥
तिभाषायांसत्यांसामान्यवचनतालभ्यते।उच्यतेनात्रसुपः स्थानेकिंचिद्विधीयतेकिंनर्ह्यनुवादोयंसुपोयोविधिस्तत्रेतिअतु
वादेचपरिभाषानप्रवर्त्तते।उदीचामातः स्थानेइतिस्थानग्रहणाल्लिंगात्संबंधसामान्यवचनषष्ठ्यंतेनेतिपदुक्तंतत्रप्रजयोजन
मादसुपांस्थानइत्यादि।सर्वोसौसुब्विधिरिति।सर्वस्यसुपःसंबंधित्वात्सुवर्थमेवचेदंविधिग्रहणंकृतं।स्वरादिषुतुनार्थस्तेनः यथानसु
नइत्यत्रवाभावेकर्त्रर्थेइत्यर्थोभवतितथास्वरादिषुकर्त्तर्मेषुविधिस्यर्थोभविष्यतिद्वाभ्यांस्वरस्यानुप्रत्येकंसंबंधोदुर्निवारइतिभावसाधनत्व
मप्यंगीकृतं।सुब्विधिस्वरसंज्ञातुग्विधिनुक्तमानेतुनकिंचियलसाध्यं।राजवतीति।मतुवंतादुगितश्चेतिङीप्।राजशब्दः कनिन्प्रत्य
यांतत्वादाद्युदात्तः॥ ॥

पंचार्मेति। रिक्तसंख्येसंज्ञायामिति समासः। अत्र नलोपे कृते पूर्वपदमवर्णान्तं जातमिति स्वरः प्राप्नोः सिद्धत्वान्न भवति समासान्तोदा त्त त्वमेव भवति। पंचदंडीति समाहारद्विगुः नलोपस्यासिद्धत्वात्ष्णान्ता षडितिषट्संज्ञाभवतीति। एतत्प्रयोजनं तत्रोक्तमेतत्प्रहणमोपदे शिकप्रतिपत्त्यर्थमिति तत् नाप्नोति सोक्तं द्रष्टं। न षट्स्वस्रादिभ्य इति टाप्प्रतिषेधो भवतीति। अत्र दिनान्तत्वात् पूर्वं ङीप्प्राप्तो निषिध्यते तनो जस्शसोर्लुकि नलोपे चाकारान्तलक्षणष्टाप् सोपि निषिध्यते स्त्रियां यदुक्तं तत्र भवतीति सामान्येन निषेधविधानात्। न देतत्प्रयो जनं कथं भवतीति पार्त्तिकत्वं प्रयोजनस्य दर्शयितुं प्रश्नः। केषांचिद्दर्शनमनारभ्य कार्यविशेषमादौ तावत्संज्ञाक्रियते तनोपस्यादृष्टा

पंचार्मादृष्टार्मेत्यत्र नलोपस्यासिद्धत्वादृमेर्वावर्णे च इति पूर्वपदाघुड्राज्ञत्वं न भवति॰ पंचदंडिइत्यत्र नलोपस्यासि द्धत्वाद्दिगन्ते द्विगाविति पूर्वपदप्रकृतिस्वरो न भवति। संज्ञाविधौ॰ पंचप्रा ह्णएणदशाप्राह्णएपः इत्यत्र नलोपस्यासिद्धत्वात् ष्णा न्ता षडिति षट्संज्ञा भवति॰ ततश्च न षट्स्वस्रादिभ्य इति टापः प्रतिषेधो भवति। न देतत्कथं प्रयोजनं भवति यदि प्रतिकार्यसं ज्ञाप्रवृत्तिरिति तद्दर्शनं॰ यादि जश्शसोर्लुगर्थो षट्संज्ञाप्रवृत्तात् यास्त्री प्रत्ययस्य प्रतिषेधो न क्रियते इति पुनः स्यात्प्रवर्त्तेपि तव्या। तुग्विधौ वृत्रहभ्यां वृत्रहभिरित्यत्र नलोपस्यासिद्धत्वाद्ध्रस्वस्य पिति कृति तुगिति न भवति ३ ॥ ॥ ॥

णं पत्कार्यप्राप्तं तत्क्रियते लोकवत्। तद्यथा लोके दशम्यामुत्थितायां पुत्रस्य नाम दधातीति सकृत्कृतया संज्ञया सर्वाणि कार्याणि क्रि यंते न तु प्रतिकार्यं नामकुर्वंतिलदृष्टिरिति। अयं च पयो दृशं संज्ञापरिभाषमिति पक्षः। कार्यकालपक्षे तु तेन तेन विधिना सैकवाक्यतामा पन्ने न संज्ञासूत्रेण संज्ञा प्रणीयत इति प्रतिकार्यं संज्ञाप्रवृत्तिः। तत्राद्ये दर्शने जस्शसोर्लुगर्थायां संज्ञातायेव टाप्प्रतिषेधस्यापि सिद्ध त्वान्नेदं प्रयोजनं। द्वितीये तु पक्षे भवति प्रयोजनमित्याह यदि प्रतिकार्यमिति। कथं तदा प्रयोजनमित्याह यावहीति। जस्शसोर्लुगर्थेति। उपलक्षणमेतत् ङीप्प्रतिषेधार्थेत्यपि द्रष्टव्यं। स्त्रीप्रत्ययस्येति। टापश्चेत्यर्थः। अथ प्रथमे पक्षे नकर्त्तव्यं संज्ञाग्रहणं कर्त्तव्यमिह हिंदरिगु मो गुप्तदंडिनाविति नलोपे कृते दंडिशब्दस्य विसंज्ञा प्राप्नोतीति तस्य तस्यैव स्वर्वनिपातः स्यात् नलोपस्यासिद्धत्वाद्विसंज्ञाया अभावाद

राम॰ ३३

अत्र केचिदिच्छन्ति। सुपः संनिपातेन नलोपः स यदि तुकं प्रवर्त्तयेत तत्संनिपातं विहन्यात्। कथं पुनः संनिपातस्य विघातः। यावता पूर्वं तिस्तु कृतनञ्
हणेन गृह्यते। ततः। ह्रस्वमात्रमकृतस्तु गिरा श्रितो दमुक्तं। बहिरंगलक्षणत्वेन नेति बहिर्भूतविभक्त्यपेक्षेण लोपेऽन्तर्भूतविलये हेतुः स सिद्धो भव
तीत्यर्थः। परिभाषाद्वयस्याप्यनित्यत्वं ज्ञापयितुमिति। तत्र संनिपातपरिभाषाया अनित्यत्वाद्ध्रस्वापेक्षाद्दीर्घो सुपि चेति दीर्घत्वं भवति बहिरंगपरि
भाषायास्त्वनित्यत्वादेवाद्युदस्य तत्र विभक्त्याश्रयं यदा घत्वं बहिरंगमपि प्राप्तियरिकाश्रयेणापि नासिद्धं भवति। हे त्रह छत्रमिति नात्र संनिपात
लक्षणेन लोपः नापि नलोपस्य बहिरंगत्वं तुको विधिकारणे सत्वात्। राज्ञीयतीति। क्यचि चेतीत्वं। राजायते इति घेतन्तामपि नेति शेषः। अकृत्सा

अत्र केचित्संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति तु कं प्रति नलोपस्यानिमित्तत्वाद्बहिरंगलक्षणेन वा। सिद्धत्वात्तुग्वि
धिग्रहणमनर्थकमिति प्रतिपन्नाः। तत्तु क्रियते परिभाषाद्वयस्यानित्यत्वं ज्ञापयितुं। कृतीति किं। इत्रह छत्रं वृत्रह छायेति छे
चेति तुग्भवत्येव। सिद्धे सत्यारम्भो नियमार्थः। एतेष्वेव नलोपोऽसिद्धो भवति नान्यत्रेति तेन राज्ञीयति राजायते राजाश्व इतीत्वं दीर्घत्व
मेकादेशश्च सिद्धो भवति॥ ॥ न मु ने॥ ॥ मुभावो नाभावे कर्त्तव्ये नासिद्धो भवति किं तर्हि सिद्ध एव। अमुना। मुभावस्यासिद्धत्वा
द्घिलक्षणो नाभावो न स्यात्। कृते तु नाभावे मुभावस्यासिद्धत्वात्सुपि चेति दीर्घत्वं प्राप्नोति तत्सन्निपातलक्षणो विधिरनिमित्तं त
द्विघातस्येति न भवति॥ ॥७॥ ॥

र्धधातुकयोरिति दीर्घः राजाश्व इति अकः सवर्णे दीर्घः॥ ॥ न मु ने॥ ॥ मुइत्यविभक्तिको निर्देशः। विलक्षणो नाभावो न स्यादिति। यद्येतन्नार
भ्येतेति शेषः अनेन सूत्रारम्भस्य प्रयोजनमुक्तं। कृते तु नाभावे इत्यादि। यद्यत्र दीर्घत्वं स्यात्तदा भाममानो मुकारः सवर्णो न रहन्नातीति यथार्थः। अस्या
सिद्धत्वे दीर्घस्य स्थानिनो दीर्घत्वं कारो भवति तथा चाप्याकारस्य रूकारः स्यात्। ततश्च ह्रस्वसंनिपातकृतो नाभावस्तं विहन्यादिति भावः। अ
त्र चोदयन्ति। मुभावस्यासिद्धत्वात्किल दीर्घप्रसंगश्चोद्यते ततो मुभावमपश्य दीर्घशास्त्रं घिलक्षणं नाभावमपि न पश्यतीति ह ता दृश ह्रस्व
नीयं ह्येतद्दीर्घशास्त्रं प्रति तत्तश्च यज्जातेरभावात्कथमत्र दीर्घप्रसंग इति। अत्राहुः। प्रयोगेतावन्नाभावः श्रूयते शास्त्रमपि तस्यासिद्धकाण्डे पठि
तं केवलं तत्तन्निर्द्दिष्टान्भूतं मुभावमेव दीर्घशास्त्रं न पश्यतीति तस्माद्द्राघीन्नाभावं तावत्पश्यतीति ततश्च दीर्घत्वं प्रवर्त्तयेदिति॥ ॥ ॥

अथवेति। यथा कश्चित्कुशलमतिः किं ज्ञानी यो धावति किं वर्णो धावतीत्येकेनानेकेन वा पृष्टस्तं त्रेणाप्रतिवक्ति श्वेतो धावतीति तथात्रापि योगा
द्वयमेतत्। तत्रैकं नेकर्त्तर्यै सुत्वस्या सिद्धत्वं निषेधति अपरं नेपरेतोयस्मामंत्र। तदिदमुक्तमुभयार्थमिति। तंत्रेणेति। साधारणं भवे त्रंत्रं यथा तु
ल्यकत्रयोर्भुंजानयोः प्रदीपः इह तु साधारणप्रयत्नस्तंत्रं। इदानीमेकस्मिन्नेव योगे यथोभयं साध्यते तथा दर्शयति अथवेति। अर्थात्संगृ

अथवा योगद्वयमिदमुभयार्थं तंत्रेणोच्चारितं द्रष्टव्यं। अथवा नेपरतोयस्मामंत्रोतितस्मिन्कर्त्तर्यैमुभा
वेः सिद्धो न भवतीत्येष एवमस्यार्थः नेतु कर्त्तर्यैमुभावस्ययत्सिद्धत्वं तदर्थात्संगृहीतं तेनात्र मुभावस्य
सिद्धत्वान्नाभावश्च भवति दीर्घत्वं च न भवति ४ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥छ॥

हीतमिति। वृद्धकुमारीवाक्यवत्। तद्यथा वृद्धकुमारीन्द्रेणोक्ता वरं वृणीष्वेति सा वरमवृणीत पुत्रा मे बहुक्षीरघृतमोदनं कांस्यपात्र्यां भुंजीरन्निति। पतिरेव तावदस्या
स्यान्न भवति कुतः पुत्राः कुतो गावः कुतो धान्यं। अनेनैव खल्वेकेन वाक्येन पतिः पुत्रा गावो धान्यमिति सर्वं वृतं भवति तद्वदत्रापि नेपरतोयस्मां कार्ये
तत्र कर्त्तर्यैमुभावस्यासिद्धत्वस्य प्रतिषेधं ब्रुवता नाभावेपि कर्त्तर्यैमेपीत्यस्यासिद्धत्वं प्रतिषिद्धं भवति ४ ॥ ॥श्री॥ ॥श्री॥ ॥ ॥ राम०
३४

एकादेशस्वर इति। एकादेशस्वरे च त्वादिदर्शनानि उदात्तानुदात्तयोरेकादेशः आन्तर्यतः स्वरितोऽभिनिर्वृत्तस्तस्य स्थाने एकादेश उदात्तेनोदात्त इत्यनेनोदात्तगुणक आदेशः क्रियत इत्येकं दर्शनं। तथैवाभिनिर्वृत्ते एकादेशस्वरे स्वरितगुणमात्रस्योदात्तमात्रं विधीयत इति द्वितीयं दर्शनं। तृतीयं तु दर्शनमेकादेश उदात्तेनोदात्त इति परिभाषा एकादेशविधिमुपतिष्ठते तत्र यथा यो भवति आनुलोमभवति उदात्तानुदात्तयो(स्)स्थाने गुण उदात्त इति एवं सत्येकादेशो विधीयमान एवोदात्तो भवति। चतुर्थं दर्शनं उदात्तानुदात्तयोरेकादेशः स्वरितगुणः प्राप्त उदात्तो भवति। तत्र येन नाप्राप्ति न्यायेन स्वरितत्वापवाद उदात्तविधिः संपद्यते तत्र परिभाषायाम् इमिद्धमुदात्तत्वमपादिषु इतरेषु त्रिषु हेतुः असिद्धत्वे प्राप्ते सिद्धत्वमुच्यते आन्तर्यतो यादेश उदात्तो यथा स्यादिति। अन्यथा स्वरितः स्यात्। कुमार्यौ इदमिति। कुमारशब्दः प्रातिपदिकस्वरेणान्तोदात्तः

एकादेशः स्वरोऽन्तरंगः सिद्धो वक्तव्यः किं प्रयोजनं। आयायावेकादेशश्चात् तस्यैकानुदात्तस्य सर्वानुदात्तार्थम् आप॰ वृत्त इदं स्व। स्त्र इदमिसत्र प्रातिपदिकान्तस्य सम्येकवचनयोरुदात्तानुदात्तयोर्य एकादेशः स एकादेश उदात्तेनोदात्त इत्युदात्तस्तस्य सिद्धत्वं वक्तव्यं आन्तर्यत अयादेश उदात्तो यथा स्यादिति। आप॰ कुमार्या इदं॰ कथमिदमुदाहरणं यद्युदात्तयणो हल्पूर्वादित्युदात्तत्वे कृते विभक्तेरादश्चैकादेशस्वरोदात्तो वक्तव्यः अथ वृक्त एकादेशो उदात्तयणो हल्पूर्वादिति स्वरस्तदानैतस्य प्रयोजनं भवति। आव॰ वृक्षावितीदं स्वश्चावितीदं। एकादेशस्वर॰॥

तस्मादयमिप्रथमद इति ङीप् यस्येति चेति लोपः अनुदात्तस्य च यत्रोदात्तलोप इति ङीप उदात्तत्वं चतुर्थ्येकवचनं कुमारी ए इति स्थिते आ एनद्याः इत्याट् यणादेशः उदात्तयणो हल्पूर्वादित्यादावुदात्तत्वं आटश्चेति वृद्धिरेकादेशः सन् आन्तर्यतः स्वरितः प्रसक्त एकादेश उदात्तेनोदात्त इत्यनेनोदात्तः क्रियते तत्सिद्धत्वं वक्तव्यं अयादेश उदात्तो यथा स्यात्। यदीत्यादि। पूर्वमुदात्तत्वं क्रियते पश्चादेकादेशः यथानन्तरं दर्शितं तदाभवतीदं प्रयोजनमित्यर्थः। अथ त्वित्यादि। कुमारी ए इति स्थिते वृद्धिश्च प्राप्नोति उदात्तयणो हल्पूर्वादिति आटः स्वरश्च द्वावप्यनित्यौ स्वरः शब्दान्तरप्राप्तेरनित्यः सति हि प्रागाकारस्य प्राप्नोति कृतायां तु वृद्धावैकारस्य वृद्धिरपि प्रागनुदात्तयोः आटस्तु स्वरे कृते उदात्तानुदात्तयोः स्वरभिन्नस्य च प्राप्नुवन्विधिरनित्यो भवति उभयोरनित्ययोः परत्वात्स्वरे प्राप्ते वर्णाश्रयत्वेनान्तरंगत्वाद्वृद्धिः स्वरस्तु विभक्तेरुच्यमानः पदाश्रयो बहिरंगः॥

गांगोनृपइति। गांगापाद्रदिमिमणप्रत्ययस्वरेणोदात्तः ततोङिः सुप्त्वादनुदात्तः तयोरेकादेशउदात्तः अयोनुगतमनूपमितिपादिसः अमयपूर्वे पदप्रकृतिस्वरेणामे अन्तोदात्तप्रधानकनीपसीतुअपदांतोदात्तत्वं शेषनिघातः। नस्मासिद्धत्वादिसादि। एकादेशस्यासिद्धत्वे एङः पदांतादती त्यपमेकादेशउदात्तेनसह भवतिततश्च स्वरितोवानुदात्तेपदादाविति पक्षेस्वरितः पक्षेउदात्तोभवति। पदित्वासिद्धत्वंस्यात्तदासावेकारउदात्ता नुदात्तस्थानिकत्वादांतर्यतः स्वरितः स्यात्तथाचसतितस्यएङः पदांतादती त्यपमेकादेशउदात्तेनन भवतिकिंतर्हिस्वरितेनेतिपक्षेस्वरितो नस्यात् अपितुस्वरितानुदात्तयोः स्थानेभवत्रांतर्यतोनिसमेवस्वरितः स्यात् समउदात्तेनेस्मतइतिपाठः सएकादेशउदात्तेनसहेसतोहेतोरिस र्थः। शतस्वरइति। शत्रा अयोनघञादीघोः स्वरः शतस्वरः शतुरनुमइसत्रांतोदात्ताइत्तरपदादितोंतोदात्तोदेसनुवर्तते। तुदती वदती। तुदितु

गांगोनृपइति॰ गांगेशद्देपएकारः सस्कादेशउदात्तेनोदात्तइस्युदात्तस्तस्यासिद्धत्वानुनरेङः पदांतादतीतिएकादेशःस उदात्तेनेस्यतः स्वरितोवानुदात्तेपदादाविसेतद्भवति। शतृस्वरः तुदतीनुदती॰ अदुपदेशाल्लसार्वधातुकानुदात्तत्वेए कादेशात्तदुत्तस्यसिद्धत्वाच्छतुरनुमोनघञादी अंतोदात्तादितिपस्वरोभवतिअनुमइतिप्रतिषेधोज्ञापकः एकादेश स्वरः शतृस्वरेसिद्धइति॰ नदिसनुमंशत्रंतंकिंचिदेकादेशस्वरमंतरेणान्तोदात्तमस्ति ५ ॥ ॥श्री४॥ ॥ ॥

दिप्यांल्लदशआदेशः तुदादिभ्यःशः प्रत्ययस्वरेणोदात्तः। अनुमइतिप्रतिषेधोज्ञापकइति। तेननेजदर्थमसिद्धत्वंवक्तव्यमितिभावः कथमेतत ज्ञापकमित्याहनहीति। अनुमइतिप्रतिषेधस्येतत्प्रयोजनं तुदतीयत्राच्छीनद्योर्नुमितिपक्षानुमतदामाभूदिति। असिद्धेचैकादेशस्वरेतोदा त्तत्वाभावादेवनभविष्यतिकिमनुमइतिप्रतिषेधेनप्रतिषेधात्तुसिद्धत्वमनुमीयते। ननुचयच्चलसार्वधातुकानुदात्तत्वस्यनिमित्तं नास्तित दर्थः प्रतिषेधः स्यात् यांतीवांतीत्यत्रहिधातुप्रत्यययोरुदात्तयोरांतर्यतएकादेशउदात्तः सचशतृस्वरेसिद्धः। अत्रापिप्रत्ययस्वरेसतितदनंत रमेवधातोः शेषनिघातोभवतिततश्चात्रापिनांतरेणैकादेशस्वरमंतोदात्तत्वंभवति। एकंवर्जयित्वायदिशिष्टस्यपदस्यानुदात्तत्वंतदेकानुपात्तमाभा ष्येत्वेकानतुदात्तमितिपाठः तत्राप्यनुदात्तंपदमेकवर्जमित्यमेवस्वरोविवक्षितः तत्रह्येकमेवानुदात्तंअमत्सर्वमनुदात्तमित्युच्यतेनथावत त्रोक्तंसिद्धत्वेकानतुदात्तत्वादिति ५

तुदंतीमिविकरणउदात्तः त्वसार्वधातुकमनुदात्तंतयोरेकादेशःअनेनेनिएकादेशस्वरेणसिद्धेनावर्ज्यमानतेतिअनुदात्तंपदमेकवर्जं
मितस्यार्थोलसतेपदित्वंसिद्धत्वंस्यात्ततोमत्सांवर्ज्यमानतायांद्वयोरुदात्तयोः श्रवणंस्यात्। ननुचोदात्तस्यासिद्धत्वेपियोसावुदात्तानुदा
त्तयोरेकादेशस्यान्तर्यतः स्वरितोभिनिर्वृत्तस्तदाश्रयावर्ज्यमानताभविष्यति।सत्यंसिद्धातियदास्वरितस्योदात्तोभवतीतिपत्तः मदात्तुस्वरिता
पवादउदात्तोविधीयतेतदातस्यासिद्धत्वात्स्यानिनश्चस्वरितंतरंतएभावात्केनवर्ज्यमानतास्यात्तंस्मात्सिद्धत्वमुच्यते।वचकार्यकालपक्षे

एकानुदात्तः तुदंतितुदंतिएकादेशस्वरस्यसिद्धत्वादनुदात्तंपदमेकवर्जमितिअनेनवर्ज्यमानताभवति।सर्वानुदा
त्तः ब्राह्मणास्तुदंति· ब्राह्मणालिखंति· एकादेशस्वरस्यसिद्धत्वात्तस्मिन्कृतेतिङः तिङः इतिनिघातोभवति।अंत
रंगाद्इतिवचनाद्बहिरंगस्यासिद्धत्वमेवापचतीतिप्रपचतीति।संयोगांतस्यलोपोयोरोहत्वेसिद्धोषक्तव्यः किंप्रयोज
नंहरिवोमेदिनंत्वा· ॥ ॥ श्रीः॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥ ॥

अयेणपरिभाषांतरंवर्ज्यमानपरिभाषया।अपित्रिपाद्यांप्रवृत्तिः शास्त्राभ्युपगंतुमतिप्रसंगात्उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्य
उदात्तादनुदात्तस्यस्वरितःस्तत्रापिशेषनिघातप्रसंगात्(यथातुयांती।तत्रप्रागेवैकादेशाच्छेषनिघातोभवतितथात्रापीस्यप्रयोजनमि
त्याहुः ब्राह्मणास्तुदंतीति।अत्रापिस्वरितत्वापवादउदात्तत्वमितिदर्शनेसिद्धत्वमुच्यते अस्योदात्तस्यानुदात्तत्वाभावादुदात्तः प्रयोगे
श्रूयेत।बाहिरंगस्यासिद्धत्वमेवभवतीति।असिद्धंबहिरंगमंतरंगेइत्यनेनापचतीतीति।इतिशेषोनिघातत्वाद्राधुदात्तः अत्रवाह्य
पदापेक्षत्वादेकादेशस्यबहिरंगत्वात्तत्स्वरेपिबहिरंगत्तस्यासिद्धत्वात्तेनवर्ज्यमानतानभवति।प्रयवतीत्यत्रापितिङ·वोदात्तवतीतिगतिनि
घातोनभवति उभयत्रापिपूर्वप्रसंतवद्भावात्प्रसंगः॥ ॥

हीवइति। पदाच्छंदसीवनिपातितिवनिष्प्रत्ययः क्विपतेवनउपसंख्यानमितितस्यचफलंतदानार्थः सिद्धवचनेनाऽलावीदितिा लुङ्ः च्लेः सि
चूइट्‌ अस्तिसिचोऽपृक्तइतीट्‌ सिचिवृद्धिः नतुवइटईटीस्वत्र इटइतिषष्ठीविज्ञाय्यमेनयंवमीसस्येत्यनुवर्त्ततेतत्रेडादेऽसस्यलोपोविधीयमा
नइत्तोभविष्यतीतिसिद्धमलावीदिति। सत्संरूपंसिद्धंस्वरेतुदोषः स्यात्‌ यदिलोपेनेकारोनिवर्त्ततेअनुदात्तस्येर्इदः अवर्णप्रसज्येतउ

हविइतिमतुबंतमेतत्‌· तत्रछंदसारइतिवत्वेकृतेसंयोगांतस्यलोपेचकृतेकृत्वंमतुवसोरुसंबुद्धौछंदसीतितस्यसंयो
गांतलोपस्यासिद्धत्वाद्धशिचेत्युत्वंनप्राप्नोति। सिज्लोपएकादेशेसिद्धोवक्तव्यः अलावीत्‌· इटईटीतिज्लोपस्यासिद्धत्वा
त्सवर्णदीर्घत्वंनप्राप्नोति। निष्ठादेशः षत्वस्वरप्रत्ययविधीड्विधिषुसिद्धोवक्तव्यः वृक्णः वृक्णवान्‌· निष्ठादेशस्यासिद्धत्वा
त्झलीतिषत्वंनभवति। कुत्वंतुप्रत्ययसिद्धएवेतितद्भवति· स्वरप्रत्ययविधीड्विधिषुक्षीवशब्दउदाह्रियते· तत्रहिनिपातन
मनेकधासमाश्रितंयदाक्षीबेर्निष्ठायामिटिकृतेइडहलोपोनिपात्यतेतदाक्षीबइतिसंज्ञायामिछेच्छब्दलोपस्यासिद्धत्वान्नि
ष्ठावत्वघन्ननादिस्वरोनप्राप्नोति। क्षीवेरातरतिक्षीविकइतिघन्लक्षणाहन्नप्राप्नोति· यदातुतकारलोपोनिपात्यते
तस्यासिद्धत्वादिडागमः प्राप्नोति ६ ॥
तत्रनिहत्तिस्वरेलोपस्यासिद्धत्वात्पदान्तमकारमात्रस्यलोपेसवर्णदीर्घत्वंतदासिचक्षिकरणादिडुदात्तइत्येकादेशस्वरोभवति। वृक्णइति।
ओदितश्चेतिनिष्ठानत्वंषत्वस्वरप्रत्ययेड्विधिषिस्यभावस्यदर्शयतिकुत्वंतुप्रतीति। क्षीवशब्दएवोदाह्रियतइतिकथमेकमेवत्रिषुविधिषूदा
हरणमित्यतआहतत्रहीति। तत्रकचित्प्रत्यक्षेकिंचित्प्रयोजनंप्रसुदाहरणमित्याहयदेति। संज्ञायामितिवचनंसंज्ञायामुपमानमित्यतः संज्ञाया
मित्यनुवृत्तेः। एषस्वरइति। आद्युदात्तत्वं। क्षीविकइति। नौघचष्टन्‌ ६ ॥

प्लुतस्य इ इति विकारः प्लुतविकारः। अस्मा३ इ यदा३ उ इति। अग्निमत्तुशाह्न्योः संबुद्धिगुणो कृते एचोऽप्रगृह्यस्येत्यादिना पूर्वस्यार्धस्याकारः प्लुतः उत्तरस्येति दुतौ। नित्यस्तु तुक् प्राप्नोतीति यदा तां दीर्घ इति दीर्घलक्षणो विकल्पः स्यात्। छ इति किं अस्मा३ त्र प्लुतविकारस्यासिद्धत्वमेव यथा स्यात् खलपुत्र्यां छत्रं कुलं तत्र संबुद्धाविह किं चित्रयो३ इति मायेन गुणो खलपा३ उ इति स्थिते ह्रस्वस्यापि तिकृतोति तुक् भवति द्विविधानात्रासिद्धत्वं बहिरंगलक्षणं पूर्वं

प्लुतविकारस्तुग्विधौ छे सिद्धो वक्तव्यः। अग्ना३ इ छत्रं पटा३ उ छत्रं। प्लुतविकारस्यासिद्धत्वाच्छे चेति ह्रस्वलक्षणो नित्यस्तुक् प्राप्नोति। श्चुत्वं धुटि सिद्धं वक्तव्यं। श्चुतिर् क्षरणे इत्ययं धातुः षकारादिः पठ्यते ततो मधुश्चुदिति भवति। षकारादेः पुनरेतस्मिन् संयोगान्तलोपेन पकारस्य ककारयोर्लुप्तयोः शकारस्य षत्वे मधुड् इति। श्चुत्वस्यासिद्धत्वात् डः सि धुट् इति धुट् प्राप्नोति। अटतीसहरतीति लिट् क्विबन्तावेतौ। किमर्थं पुनरयं सकारादिः पठ्यते। मधुश्चुतमाचष्टे इति णिच्। मधुश्चपतिः मधुश्च्यते। पुनः क्विपि कृते संयोगादिलोपः संयोगान्तलोपः चकारस्य कुत्वं स्यात्। अभ्यासजश्त्वचर्त्वमेत्वतुकोः सिद्धं वक्तव्यं। बभणतुः बभणुः अभ्यासादेशस्यासिद्धत्वात् नादेशादेरित्येत्वं प्राप्नोति। चिच्छित्सति। उचिच्छिषतीति अभ्यासादेशस्यासिद्धत्वाच्छे चेति तुक् प्राप्नोति। द्विर्वचने परसवर्णः सिद्धो वक्तव्यः। सय्यंता सव्वँत्सरः तल्लोकमिति परसवर्णस्यासिद्धत्वादचो रहाभ्यामिति द्विर्वचनं न स्यात्॥ ॥

त्वासिद्धमिति च। किमर्थं पुनरिति। सकारस्य क्वचिदपि श्रवणाभावात् अभ्यासः। उचिच्छिषतीति। उच्छी विवासे वक्तमन्ह इट् अजादेर्द्वितीयस्येति छिस् शब्दस्य द्विर्वचनं शर्पूर्वाः खय इति खयः शेषः अभ्यासे चर्चेति चकारः। सय्यन्तेत्यादौ मोनुस्वारः अनुस्वारस्य ययि परसवर्णः॥ ॥७॥ ॥

पदाधिकारश्चेदितिपदितुललादिविधिषु पदस्येत्यपेक्ष्यते तदा ललादीनां द्विर्वचनप्रसंगमकृतत्वं अनपेक्षायां तु बहिरंगं द्विर्वचनमंतरंगेषु ललादि
षु सिद्धमिति पूर्वत्रासिद्धमित्येतन्न प्रवर्त्तत इति। ललादिषु कृतेषु द्विर्वचनमिति सिद्धमिष्टं गलोगल इति। अचि विभाषेति लत्वं। द्रोग्धेति वा द्रुहेति वा
घत्वं। तदभावे ढो ढः। तुन्न इति नुदविदेति या निष्ठानत्वं। अभिन इति भिदेर्लङ्। सिपि अभिहल्ङ्याब्भ्य इति लोपः। सिपिधातोरुर्वा इति वा रुत्वं अडा

पदाधिकारश्चेल्लत्वघत्वढत्वनत्वरुत्वषत्वणत्वानुनासिकछत्वानि सिद्धानि वक्तव्यानि। लत्वं गरोगरः गलोगलः घत्वं द्रोग्धा
द्रोग्धा द्रोढा द्रोढा। नत्वं। नुन्नो नुन्नः नुन्नो नुन्नः। रुत्वं अभिनोऽभिनः अभिनदभिनत्। षत्वं मातुः ष्वसा मातुः ष्वसा मातुः स्वसा
मातुः स्वसा। णत्वं द्रोग्धा द्रोग्धा द्रोढा द्रोढा। नत्वं नुन्नो नुन्नः नुन्नो नुन्नः। रुत्वं अभिनोऽभिनः अभिनदभिनत्। षत्वं मातुः ष्वसा
मातुः ष्वसा। मातुः स्वसा मातुः स्वसा। णत्वं माषवापाणि माषवापाणि। माषवापाणि माषवापानि। अनुनासिकत्वं। वाङ्नयनं वा
ङ्नयनं। वाग्नयनं वाग्नयनं। छत्वं वाक्छयनं वाक्छयनं। वाक्शयनं वाक्शयनं। ललादीनामसिद्धत्वात् कृते द्विर्वचने समतिज परि
ष्ठान्निष्ठाहितविकल्पः प्राप्नोति गरो गलः गलो गरः इत्येवं रूपमपि द्विः क्रियते स्यात्। नदेतत् सर्वं न मु न इति योगविभागेन साध्येत। न
इत्येतावदिष्टविषये सर्वत्र पूर्वत्रासिद्धस्य प्रतिषेधार्थं। ततो मु न इति तत्र नेत्यनुवर्त्तते ८ ॥ ॥श्री॥ ॥८॥ ॥

मः मातुः ष्वसेति मातुः पितुर्भ्यामन्यतरस्यामिति षत्वं। माषवापाणीति प्रातिपदिकान्तस्येति वा णत्वं। वाङ्नयनमिति यरोऽनुनासिकेऽनुनासिको
वेति वा ङकारादेशः। वाक्छयनमिति शश्छोऽटीति वा छत्वं। ललादीनामित्यादिना सिद्धत्वे ललादीनां यो दोषस्तं दर्शयति। अनिष्टो विकल्पः स्यादि
ति। पूर्वोत्तरयोः पदयोरेकत्र प्रवृत्तिरपरत्राप्रवृत्तिरित्येवं निष्ठो विकल्पः। एतत्सर्वमित्यादि योगविभागार्थमेव च प्रतिषेधाश्रयणमन्यथा [illegible]
र्थममुनेति निपातनमाश्रयणीयं स्यात् ततो मुन इति द्वितीयो योगः किमर्थमिदं पूर्वयोगस्यासर्वविषयत्वख्यापनार्थं तेनातिप्रसंगो नोद्भावनीयः॥ ८॥

उदात्ते॥ ॥उदात्तस्वरितयोरित्यनुवादेऽपि स्थानषष्ठ्येषा आम्नानात् तेन उदात्तस्वरितयोः समीपवर्तिनो यणः ततः परस्यानुदात्तस्य स्वरितत्वं न भवति सपाताभ्यां याताः इति। ननु परस्य सम्प्रत्येकवचनस्य स्वरितत्वमिति किं नेत्याह उदात्तयणा इत्यनेनेति· तोपमस्मिन् सूत्रेऽपि विभागस्तेनेत्यर्थः॥ उदात्तयणो हल्पूर्वादिति सुदात्तत्वं तु न भवति नोङ्धात्वोरिति प्रतिषेधात्। आशाशब्द आशाशब्द आशाया अदिगाख्यायेति अन्तोदात्तत्वादनुदात्तादिः

उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य॥ ॥उदात्तयणः स्वरितयणश्च परस्यानुदात्तस्य स्वरित आदेशो भवति· उदात्तयणः कुमार्यौ कुमार्यः। उदात्तनिवृत्तिस्वरेणायमीकार उदात्तस्तस्य स्थाने यणादेश उदात्तयणा भवति तस्मात्परस्यानुदात्तस्य स्वरित आदेशो भवति। स्वरितयणः सकलभ्याशा खलप्ष्याशा। सकलू: खलपूरिति ह्रस्वरेण तोदात्तो तयोर्ऽचि सुपीति यणादेशः स उदात्तयणः· ततः परस्य सम्प्रत्येकवचनस्य स्वरितत्वं उदात्तत्वं उदात्तयणा इत्यनेन तस्य योपरा स्वरितयणस्तस्मात् स्वरितयणः· परस्याशाशब्दस्याकारस्य अनुदात्तस्य स्वरितो भवति। ननु च सम्प्रत्येकवचनस्य यदुदात्तयणा इति स्वरितत्वं तदसिद्धत्वं यणादेशे तत्कथमयं स्वरितयण भवति। आश्रयात् सिद्धत्वं भविष्यति· यथैव मुदात्तादनुदात्तस्य स्वरित इत्यस्याप्याश्रयात् सिद्धत्वं प्राप्नोतीति तत्तश्च॥ ॥श्री॥ ॥

॥श्री॥ ॥श्री॥ ॥

तत्कथमयं स्वरितयण् भवतीति। न कथंचित्। न ह्ययं स्वरितमपनीय तत्स्थाने भवति न हि पूर्वं शास्त्रं स्थानि बुध्वा आदेशे प्रवर्त्तते किं तर्हि स्थानिस्यैव यथोक्तं कृतं तस्येत द्विरुच्यत इति न पुनस्तदुत्पाद्यते नो द्विरुच्यत इति। आश्रयादिति। आहायं स्वरितयण इति न चास्ति सिद्धः स्वरितस्तत्राश्रयात् सिद्धत्वं भविष्यति। एवमुच्यमानेऽतिप्रसंगमुद्भावयति यथैव मिति॥ ॥छ छ॥ ॥छ छ॥ ॥छ छ॥ ॥

दध्याशेतिदधिशब्देनविषयस्यानिमंतस्येत्याद्युदात्तःशेषनिघातः उदात्तादनुदात्तस्यस्वरितत्वंतस्याश्रयात्सिद्धत्वेसतितस्यानिकादध्यिय
णः परस्यानुदात्तस्यस्वरितत्वप्रसंगइत्यर्थः। तस्मादित्यादि। यतएवमाश्रयात्सिद्धत्वेदोषस्तस्मादयमेवयणःस्वरोयथासिद्धोभवतितथावक्त
व्यंतत्कथंयोगविभागःकरिष्यतेउदात्तयणःपरस्यानुदात्तस्यस्वरितोभवति। ततःस्वरितयणः। स्वरितयणश्चपरस्यानुदात्तस्यस्वरितोभव
तिउदात्तयणइत्येवतेनउदात्तयणइत्येवंयोभिनिर्वृत्तःस्वरितःतद्यणःपरस्यानुदात्तस्यस्वरितत्वंभवतीत्यर्थः। तेनास्येवस्वरितस्याश्रयात्सि

॥दध्याशेस्त्रापिस्वरितःस्यात्· तस्मादयमेवयणःस्वरोयणादेशेसिद्धोवक्तव्यः। केचित्तुब्रुवतेउदात्तात्स्वरितयणोपिप
रस्यानुदात्तस्यस्वरितत्वंदृश्यतेतथाचतैत्तिरीयकेशाखांतरेयास्तेविश्वाःसमिधःसंत्वग्नइति· अग्नेइत्ययमकारःस्वरि
तःपठ्यतेतथाब्राह्मणेपिदध्याशयतीत्याकारःस्वरितःपठ्यतइति ८ ॥ ॥श्री४॥ ॥श्री४॥ ॥

द्धत्वंभविष्यति। यद्येवमित्यादिनायोतिप्रसंगउद्भावितस्तंकेषांचिन्मतेनपरिहरतिकेचित्त्विति। उदात्तात्स्वरितयणोपीति। उदात्तात्परोयःस्वरि
तः उदात्तादनुदात्तस्येतिविहितःतस्ययोणतस्मादपिपरस्येत्यर्थः। तित्तिरिणाप्रोक्तमधीयतेतैत्तिरीयास्तेषामाम्नायस्तैत्तिरीयकंचरणात्लक्ष
णाबुञः शाखांतरइति। तत्तिकारदेशेपाशाखांतरेपेक्षंशाखांतरत्वं। एकशतंयजुर्वेदशाखाः। विशेषवचनोवांतत्रसिद्धः। यास्तेविश्वाइति। राम०
यद्वत्रान्नित्यमितिसंतीत्यस्यनिघातप्रतिषेधः। अग्नेशब्दस्यामंत्रितनिघातः। ब्राह्मणइतितत्रैवतैत्तिरीयके। दधिशब्दउक्तस्वरः आशयती ३८
त्यस्यतिङ्ङ्घातः ८ ॥श्री४॥ ॥

ननु वोभयत्राप्येकयणादेशे कृते उदात्तादनुदात्तस्य स्वरितः स एव स्वरितः तथा च यत्र नः प्रतिषिध्यते नोदात्तस्वरितोदयमिति न स्वरितो न इष्यते एव स्व
स्यमभ्यस्य प्रसज्यत्रिहषसामग्रं नन्दयेरिति। अयं तु स्वरितः उदात्तस्वरितयोरस्यापि भवति इहाशनो रक्षसः पाहि स्मानि इति तथा च भाष्ये पुरोदात्तयरस्यामनु
दात्तेति प्रसंग उद्भावितो दृष्टा शेति तस्मात् पूर्वोक्तस्यातिप्रसंगस्य नायं प्रतिविधानं इति चिंतितमेतत्। निराकरिष्यमाणत्वाद्भाष्ये नानुसृत्य निर्बंधनायं तद्
र्शयतीति यथालिखितं। अत्र वार्त्तिके यणः स्वरो यणादेशे सिद्धो वक्तव्यः स्वरितयणः स्वरितार्थः आश्रयात्सिद्धत्वमिति चेदुदात्तात्स्वरितप्राप्तौ इति यदि चोदा

यथा तु वार्त्तिकं भाष्यं च तथा उदात्तात्स्वरितयणः परस्यानेन स्वरितत्वं न भवतीति स्थितं तथा च भाष्ये स्वरितयणो ग्रहणामि
ह प्रसाध्यमायते सहस्त्याशे सेव माद्यौ उदात्तयणः इसेव स्वरितस्य सिद्धत्वात् स्वरितयणा च व्यवधानमव्यवधानमेव स्वरविधौ व्यं
जनमविद्यमानवदिति। तत्क्रियते पूर्वस्मादविधौ स्थानिवद्भावाद्व्यवधानमस्ति स्वरदीर्घयलोपेषु वलोपाजादेशस्य स्थानिवद्भा
वः प्रतिषिध्यत इति उदात्तस्वरितयोरिति किं वैदीव्याशा ब्रैद्याशा कृ रभाशा। अनुदात्तस्येति किं कुमार्यत्र किशोर्यत्र। अत्रेत्य

यमाद्युदात्तेनोलित्स्वरेण॥ ॥श्री॥ ॥

त्तादनुदात्तस्य स्वरित इति यः स्वरितः तस्य यो यणः ततः परस्यानुदात्तस्य यणः इसेव। स्वरितयणः स्यानुदात्तस्य स्वरितत्वमिष्टं स्याद्दोषत्वे न वचनमनु
पपन्नं स्यात्। भाष्ये तु यथा यमर्थः स्थितस्तथा दर्शयति। तथा चेति। अत्र भाष्यं अथवा स्वरितग्रहणं न करिष्यते यदि न क्रियते केनेदानीं स्वरितयणः य
रस्यानुदात्तस्य स्वरितत्वं भवति उदात्तयणः इसेव। स्वरितयणा व्यवहितत्वान्न प्राप्नोति स्वरविधौ व्यंजनमविद्यमानवदिति नास्ति व्यवधानमिति।
यदि चोदात्तात्स्वरितयणः परस्यानुदात्तस्य स्वरितत्वमिष्टं स्यात् प्रसाध्यानं नयुञ्जे तायदि प्रसाध्यानं किमर्थं तर्हि स्वरितयणः ग्रहणं क्रियत इत्याह त
त्क्रियत इति। स्थानिवद्भावाद्व्यवधानमस्तीति स्थानिनेकारेण व्यंजनस्य त्वविद्यमानवद्भावो नाचः। ननु च नपदान्तद्विर्वचनेति स्वरविधौ प्रतिषिद्धः
स्थानिवद्भावस्तत्राह। स्वरदीर्घेति। इत्यापरं अन्नध्यानं तयैविदादिभ्योजश्शार्ङ्गरवाद्यञो ङीन्। नित्स्वरेणाद्युदात्तो वैदी शब्दः॥ ॥ ॥

एका·पा·१
३९

ग एकादेशः॥ ॥अनुदात्तस्येति निवर्त्तते। अग्न्यादिशब्दाः प्रातिपदिकस्वरेणान्तोदात्ताः विभक्तिरनुदात्ता आपवंतीति अत्र शकारस्य यण स्वरित
त्वं उदात्तादनुदात्तस्य स्वरित इति तस्यासिद्धत्वाद्द्वयोरनुदात्तयोरेकादेशः॥ ॥स्वरितो वा॥ ॥प्रादित्वात्समासे सतीति प्रादिग्रहणे कर्मप्रवच
नीयानां प्रतिषेध इष्यस्तु मन्त्रैर्वत्स्वतीपूजायामिति प्रतिषेधः कृतः गतिसमासत्वनाश्रितः गतिर्गताविति निघातप्रसंगात्। वसुकशब्दः पूर्ववदन्तो
दात्तः। स्वरितग्रहणं विस्पष्टार्थमिति। कथमिसाह् दात्ते हीति। आन्तर्यतः स्वरितो भविष्यतीति। यद्येवं तस्यासिद्धत्वाच्छेषनिघातः स्यात् गांगेभ्

एकादेश उदात्तेनोदात्तः॥ ॥उदात्तेन सहानुदात्तस्य य एकादेशः स उदात्तो भवति· अग्निस्रो· अग्नी। वायुस्रो· वायू। वृक्षौ प्ल
क्षौ। उदात्तेनेति किं पचन्ति। लसार्वधातुकानुदात्तत्वे कृते द्वयोरनुदात्तयोरयमेकादेशः॥ ॥स्वरितो वानुदात्ते पदादौ॥ ॥अनु
दात्ते पदादौ परत उदात्तेन सह य एकादेशः स स्वरितो भवत्युदात्तो वा· सु उत्थितः सूत्थितः सूत्थितः। वि ईक्षते वीक्षते वीक्षते।
वसुकः असि वसुकोऽसि वसुकोऽसि। सूत्थित इत्यत्र सुशब्दः सुः पूजायामिति कर्मप्रवचनीयसंज्ञः तस्य प्रादिसमासे सत्य
व्ययपूर्वपदप्रकृतिस्वरत्वेनाद्युदात्तः शेषमनुदात्तं नानुदात्ते पदादावेकादेशो भवति। वीक्षते वसुकोसीत्यत्रापि तिङः ति
ङः इति निघाते अनुदात्ते पदादावेकादेशः। स्वरितग्रहणं विस्पष्टार्थम्। उदात्ते हि विकल्पिते तस्मिन्नसत्यान्तर्यत एव स्वरितो

परतः। एकादेशस्य परं प्रत्यादिवद्भावात्तत्र पशब्दोऽनुदात्तः प्राप्नोति स्वरितग्रहणे तु सति आसन्नसिद्धत्वाद्यथोक्तदोषाभावः अथ क्रियमाणेपि
स्वरितग्रहणेऽयं सिद्धः स्वरितः तेन वर्तमानता कस्मान्न भवति कन्यानूय इति। कन्याशब्दः कन्याया जन्म मनुष्याणामन्त इत्यन्तस्वरितः स्वरितः नतः
स्वरितानुदात्तयोरेकादेशः आन्तर्यतः स्वरितस्तस्यासिद्धत्वात्रेन वर्तमानता प्राप्नोतीति तत्रैवात्रय परिहारः स एव गांगेनूय इत्यत्र भविष्यति। कः पु
नरसौ पदद्वयाश्रयत्वेन एकादेशस्य बहिरंगत्वात्स्वरितोऽपि तदीयो बहिरंगः शेषनिघातस्तु एकपदाश्रयत्वादन्तरंगः न तः किमसिद्धं बहिरंगमन्तरंगे

॥ ९ ॥

राम०
३९

नलोपः प्रातिपदिक॥ ॥विशेष्यमंतस्येत्यस्य नेत्येतद्विभक्तिकांतं तथैव प्रातिपदिकेत्येतत्पदं विशेषणं। प्रातिपदिकस्य पदस्येति समानाधिकरणे षष्ठ्यौ। अहन्निति। हं ते लङ् तिपो हल्ङ्यादिलोपः। अंतग्रहणं किमिति। नलोपः प्रातिपदिकस्येत्येतावत्युपदस्येति वर्त्तते तत्र नकारेण पदे विशेष्यमाणे तदंतविधिना नकारांतस्य पदस्य लोपो विधीयमानो लोंत्यस्येत्यंत्यस्यैव भविष्यतीति प्रश्नः। राज्ञा नाविति। असत्यंतग्रहणे प्रातिपदिकस्य पदस्यैव पर्यो नकारः तस्य यत्र तत्र स्थितस्य लोपो भवतीत्यर्थः स्यात् ततश्चेहापि स्यादिति भावः। एवं च नराभ्यामित्यादावपि प्रसंगो द्रष्टव्यः। ननु चाक्रियमाणमप्यंतग्रहणं प्रातिपदिकग्रहणेन समस्तं ततश्च प्रातिपदिकांतस्य पदस्यावयवस्य नकारस्येत्येषोर्थो भवति न पुनः पदांतस्येति ततश्च नराभ्यामित्यादौ माभूत् राजानावित्यादौ तु स्यादेवात आह प्रातिपदिकग्रहणमिति। अहरिति स्वमोर्नपुंसकादिति स्वमोर्लुक्। नलुमतांगस्येति प्र-

नलोपः प्रातिपदिकांतस्य॥ ॥प्रातिपदिकस्य यो यो नकारस्तस्य लोपो भवति। राजा राजभ्यां राजभिः। राजत्वं राजता राजतरः राजतमः। प्रातिपदिकग्रहणे किं। अहन्। अंतग्रहणं किं। राजानौ राजानः। प्रातिपदिकग्रहणमसमस्तमेव सुपो सुलुगिति षष्ठ्या लुकानिर्दिष्टं। अह्नो नलोपप्रतिषेधो वक्तव्यः। अहः। अहोभ्यां अहोभिः। अहन् रो ऽसुपीति रुत्वरेफयोरसिद्धत्वान्नलोपः प्राप्नोति सावकाशं च तदुभयं संबुद्धौ। हे अहः। हे दीर्घाहो निदाघेति। तत्र समाधिमाहुः॥

स्य पलक्षणप्रतिषेधात्सुप्परत्वाभावाद्गौ सुपीति रत्वं। अहोभ्यामिति। अहन्निति रुत्वं ननु चात्र रत्वरुत्वयोः कृतयोर्नकाराभावादेव नलोपो न भविष्यत्यत आह रुत्वरेफयोरसिद्धत्वादिति। ननु नवकाशत्वाद्रत्वरुत्वे एव भविष्यतः उक्तं ह्ययवादस्यपरस्यापि वचनप्रामाण्यादसिद्धत्वं न भवतीत्यत आह सावकाशं चैतदुभयमिति। संबुद्धौ हि न ङि संबुद्ध्योरिति नलोपः प्रतिषिध्यते हे अहरिति। वा नपुंसकानामिति पक्षे नलोपप्रतिषेधः अत्र रत्वं सावकाशं। हे दीर्घाहो निदाघेति। पुल्लिंगे नायमुदाहरणार्थं बहुव्रीहिः संबुद्धौ हल्ङ्यादिलोपः निदाघशब्दस्य परस्य प्रयोगो विशेषणार्थः। हशि चेत्युत्वं। अथ अहः। अहोभ्यामित्यादौ नलोपे कृते एकदेशविकृतस्यानन्यत्वात्स एवाहः शब्द इत्सवकाश इष्टस्य यो सो कारः सोवकाश इति कस्मान्नोक्तं एवं मन्यते अहन्निति नकारापरिसांगेन निर्देशान्नकारस्यैव स्थानित्वं अन्यथा हस्येत्येव ब्रूयादिति॥ ॥श्रीः॥ ॥४॥

२को०प०२

४०

अहन्निति प्रथमैकवचनांतमिति। आदेशमात्रे विधित्सिते अह्न इति नकारांतस्यैव षष्ठ्या निर्देशं कुर्यात् प्रथमांतस्य निर्देशे प्रयोजनमेतस्य रूपस्या
न्वाख्यानमेवेति भावः॥ ॥नङि॥ ॥आर्द्रे चर्मन्निति हे राजन्निति सुपां सुलुगित्यादिना ङेर्लुक्। ननु च ङिसंबुद्ध्योर्द्वयोरपि लुप्तयोः पूर्वस्य प्रातिपदिकसंज्ञा
नास्ति प्रत्ययलक्षणेनाप्रत्यय इति निषेधात् ङौ नु पदसंज्ञापि नास्ति प्रत्ययलक्षणेनैव प्रवृत्तत्वात् भसंज्ञया बाधितत्वात् कुतोत्र नलोपप्रसंगो तत्रा
ह एतस्मादेवेति। ननु च हे तु राजन्नित्यसार्वधर्मे तत्स्यात्त्वत्र हि कृत्तद्धितसमासाश्चेति प्रातिपदिकसंज्ञा न च तस्या अपि अयं योगोपवाते तत्र हि विभक्त्य

अहन्निति प्रथमैकवचनांतमनुकृत नलोपं रूविधौ यदुपादीयते तदावर्त्तते तत्रैकया प्रवृत्त्या तदेव तु रूपं नलोपाभावार्थमन्वा
ख्यायते द्वितीयया पितस्य रूर्विधीयत इति॥ ॥नङिसंबुद्ध्योः॥ ॥ङौ परतः संबुद्धौ च नकारलोपो न भवति। ङौ आर्द्रे चर्मन्। लो
हिते चर्मन्। सुपां सुलुगिति ङेर्लुक्। संबुद्धौ हे राजन् हे तक्षन्। एतस्मादेव नलोपाभावार्थमन्वाख्यायते द्वितीयया पितस्य रूर्वि
धीयत इति॥ ॥नङिसंबु॰ प्रतिषेधवचनादप्रत्ययस्येति प्रत्ययलक्षणेन प्रातिपदिकसंज्ञा न प्रतिषिध्यत इति ज्ञाप्यते। भसं
ज्ञा च न भवतीति। तथा च राज्ञः पुरुषो राजपुरुष इत्यत्र नलोपश्च भवति अल्लोपश्च न भवतीति १० ॥ ॥श्री॥

र्थमुपसंख्यया प्रातिपदिकसंज्ञया नलोपो न प्राप्नोति। भसंज्ञा च न भवतीति। अत्रापि एतस्मादेव प्रतिषेधवचनात् प्रत्ययलक्षणेन ज्ञाप्यत इति
च संबध्यते। ज्ञापनस्य प्रयोजनमाह तथा चेति। नलोपश्च भवतीति प्रातिपदिकत्वात् अल्लोपश्च न भवतीति भसंज्ञाया अभावात्। अथ
आहन्नापसमर्थे ज्ञापकं साध्यः भसंज्ञा न भवतीति कथं यचीन्नुमन्ते न चात्र यजादिपरत्वाभावः। प्रत्ययलक्षणेन न नुमतांगस्येति प्रतिषे
धः तत्र हि लुमता लुप्ते प्रत्यये यदंगं तस्य यत्कार्यं प्रागंवा तत्सर्वं प्रतिषिध्यत इति १०

राम०

४०

चर्मतिल इति वैयधिकरण्येपि गमकत्वाद् बहुव्रीहिः॥ ननु चाऽसत्यमिदमुच्यते ऽवितिसंबुद्धावपुत्तरपदे प्रतिषेधो वक्तव्यः अन्यथा हे राजन् वृ
न्दारकेति चिन्त्यमहं दारकनागकुंजरैः पूज्यमानमिति संबुध्यंतयोः समासे सति न लोपो न स्यात् तथा च वार्त्तिकं ङि संबुद्ध्योरुत्तरपद इति अत
आह हे राहे राजवृन्दारके सत्र लिति। न पूर्वपदार्थसंबोधनमिति न हि पृथगव पदार्थयोरभिमुखीकरणोपरस्परमेकार्थीभावः संभवति। किंच
संबुद्धाविति सुच्यते न चात्र संबुद्धिं पश्यामः प्रत्ययलक्षणेन न लुमतांगस्येति प्रतिषेधः वचनं तु हे राजन्निति नोटोयत्रलोपशब्दे न सं।बुद्धिलुप्यते तत्र
चरितार्थं ङौ तु नायं परिहारः संभवति सर्वत्र लुमता लुप्तत्वात्। वा नपुंसकानामिति। अप्राप्तविभाषेयं संबुद्धेर्लुमता लुप्तत्वात्। मादुपधाया

ऽवुत्तरपदे प्रतिषेधो वक्तव्यः। चर्मणि तिला अस्य चर्मतिलः अश्वनि सिद्धः अश्वसिद्धः सामनि शोण्डः सामशौण्डः। हे राज
वृन्दारक इत्यत्र तु समुदायार्थसंबोधनं प्रतीयते न पूर्वपदार्थसंबोधनं प्रतीयत इति संबुद्ध्यंतं पूर्वपदं नैव समस्यते। वा नपुंसकानामि
ति वक्तव्यं हे चर्मन् हे चर्म॥ ॥मादुपधायाश्च मतोर्वोऽयवादिभ्यः॥ ॥मतोरिह कार्यित्वेनोपादानात्सामर्थ्यलभ्यं प्रातिपदिकं त
स्मादिति मकारावर्णाभ्यां विशेष्यते मकारावर्णविशिष्टया चोपधयेत्ययमर्थो भवति मकारांतान्मकारोपधादवर्णांतादवर्णोपधा
च्चोत्तरस्य मतोर्वकार आदेशो भवति यवादिभ्यस्तु परस्य न भवति। मकारांतात्तावत् किंवान् शंवान् मकारोपधात् शमीवान्
दाडिमीवान् अवर्णांतात् वृक्षवान् प्लक्षवान् खट्वावान् मालावान् अवर्णोपधात्

श्वा॥ ॥अत्र च कारणाकामभेदः मश्च अश्च समाहारद्वंद्वः तस्मान्मात्परस्य मतोर्वो भवति उपधायाश्च मात्परस्येति वा उपधायाश्च मात्परस्य मतोर्वो भवति
पूर्वेणानंतर्ये विहितं व्यवधानेपि यथा स्यादित्ययमारंभः एवं आ वात्पांतव्ये मतोरिह कार्यित्वेन स्यादित्युक्तं तत्राभिप्रायो मृग्यः। कश्चिदाह मका
रांतान्मकारोपधादवर्णांतादवर्णोपधाच्चेति वैयाकरणा गोष्ठीषु पठंति तत्स्यादमुपयादिनमिति तत्रापि मकारोपधादकारोपधादिति वादि
ति बहुव्रीहावर्थस्य नीपयादृश्यते। यद्वा स्यमादेशो भवतीति। अत्रेति शब्दः पठितव्यः तदयमर्थो भवति सुपकमात्ता पदिवा प्रतिषेधप्रकोऽ
दिश्यते॥ ॥

८का० ७.२ पयस्वानिति। तसौमत्वर्थ इति भत्वाद्रुत्वाभावः। इह त्वरोऽस्मिन्नस्तीति त्वन्मात्वच तस्येदं नामर्तिमिति विवृद्धौ कृतायामवर्णोपधारि इति वत्वं प्राप्नोतीति तस्य प्रतिषेधो
४१ वक्तव्य इत्यत आह इहेति। बहिरंगत्वादिति तापिस्त्वाद्बहिरंगात्वद्धिरंतर्भूत मतु वेपे सेवत्वे असिद्धो भवतीत्यर्थः॥ ॥झयः॥ ॥अग्निचित्वानिति पू
र्ववद्रुत्वाज्जश्त्वाभावः॥ ॥संज्ञायां॥ ॥अहीवतीत्यादौ वा तुरर्थिकोनद्यां मतुप्॥ ॥आसंदीव॥ ॥आसंदीवदहिस्थलमिति देशवि

पयस्वान् यशस्वान् भास्वान्· मादुपधायाश्चेति किं अग्निमान् वायुमान्· अयवादिभ्य इति किं यवमान् दल्मिमान् ऊर्मिमान्· यव· ज
र्मि· दल्मि· भूमि· कृमि· कुंचा· वशा· द्राक्षा इत्येतेषां मादुपधायाः इति प्राप्नोति· ध्रेजिं ध्रजिं· सिंजि· निंजि इत्येतेषां छंदसीर इति· हरि
त ककुत गरुत इत्येतेषां झय इति प्राप्नोति· इक्षु द्रुम मधु मधं उ इत्येतेषां संज्ञायामिति प्राप्नोति· आकृतिगणोयवादिः यस्य सति निमित्ते
मतुपो वत्वं न दृश्यते स यवादिर्द्रष्टव्यः। इह त्वरुमत इदं नार्मतिमिति बहिरंगलक्षणत्वादवर्णोपधत्वस्य मतुपो वत्वं न भवति॥ ॥झयः॥
॥झयंताद्रुत्तरस्य मतोर्व इत्ययमादेशो भवति· अग्निचित्वान् ग्रामः उदश्वित्वान् घोषः विद्युत्वान् बलाहकः इंद्रो मरुत्वान्· दृषद्वान्॥
संज्ञायां॥ ॥संज्ञायां विषये मतोर्वो भवति· अहीवती· कपीवती· मुनीवती· ऋषीवती॥ ॥आसंदीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्च
र्मण्वती॥ ॥आसंदीवदादयः शब्दाः संज्ञायां विषये निपात्यते· वत्वं पूर्वेणैव सिद्धं आदेशार्थानि निपातनानि। आसंदीवदिति आस
नशब्दस्य आसंदीभावो निपात्यते आसंदीवान् ग्रामः आसंदीवदहिस्थलं· आसनवानित्येवान्यत्र अपरे त्वाहुः आसंदीशब्दोपि प्र
कृत्यंतरमेवास्ति तथा चोक्तं औदुंबर्यासंदी भवतीति· तस्यैव संज्ञायामिति वत्वेन सिद्धमासंदीवदित्येतत्प्रपंचार्थमिह पठ्यत इति ११
शेषः यत्रेदं मुच्यते। आसंदीवति धामादहङ्क्रितण्वद्वरितस्वर्ज्जं अश्वं बबंध सारंगं देवेभ्यो जनमेजय इति। तथा चोक्तमिति प्रयोगशास्त्रेषु राजासं रुम०
दी। सोमराजस्यासनं वा यदित्येवसंज्ञायामिति वत्वेन सिद्धं आसंदीवदित्येतावत्तावत्मर्थं तर्हि निपातनमित्यत आह। प्रपंचार्थत्वमिह पठ्यत इति। अत्रे ४१
तिः पठितव्यः। अपरे त्वाहुरित्युपक्रमात् ११ ॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥

शरीरैकदेशस्येति स पुनर्जानुनोर्वा सन्धिः । चक्रीवन्तीति सद्योहविर्धानानीति सारस्वते सत्रे जङ्गमानि सद्योहविर्धानानि न त्वेकत्रावस्थितानीति तानि तत्र
तत्र कर्षणार्थं चक्रयुक्तानि भवन्ति । कक्षीवानिति हलः इति दीर्घत्वम् । रुमण्वानिति प्रकृत्यन्तरमस्तीति रुमा वा लवणाकरः । णत्वार्थं चेति । परस्तस्येति प्रति
षेधप्रसङ्गात् । मतोर्वा नुडर्थमिति । अत्र पक्षे पूर्वस्य नकारस्य लोपः णत्वमपि रषाभ्यामित्येव सिद्धम् ॥ ॥उदन्वान्॥ ॥उदन्वान्नाम ऋषिरिति य

अष्ठीवदिति अस्थ्नोऽष्ठीभावः अष्ठीवानिति शरीरैकदेशस्य संज्ञा । अस्थिमानित्येवान्यत्र । चक्रीवदिति चक्रशब्दस्य चक्रीभावो निपा
त्यते चक्रीवान्नाम राजा चक्रवानित्येवान्यत्र । चक्रीवन्ति सद्योहविर्धानानि भवन्ति सेत नुच्छान्दसत्वादनुगन्तव्यम् । कक्षीवदिति कक्ष्यायाः
संप्रसारणं निपात्यते कक्षीवान्नाम ऋषिः कक्ष्यावानित्येवान्यत्र । रुमण्वदिति लवणशब्दस्य रुमभावो निपात्यते रुमण्वान्नाम पर्वतः
लवणवानित्येवान्यत्र । अपरे त्वाहुः रुमन्निति प्रकृत्यन्तरमस्ति तस्येदं निपातनेन नकारलोपाभावार्थं णत्वार्थं च मतोर्वा नुडर्थं च । चर्मण्व
ती चर्मणो नलोपाभावो णत्वं च निपात्यते मतोर्वा नुडागमः । चर्मण्वती नाम नदी चर्मवतीत्येवान्यत्र ॥ ॥उदन्वानुदधौ च॥ ॥उदन्वा
निसुदकशब्दस्य मतौ उदन्भावो निपात्यते उदधावर्थे संज्ञायां च विषये । उदन्वान्नाम ऋषिर्यस्यौदन्वतः पुत्रः । उदधौ उदन्वान् । य
स्मिन्नुदकं धीयते स एवमुच्यते । उदधाविति किं उदकवान् घटः इति । अत्र तुदधासमर्थो न विवक्ष्यते किं तर्हुदकस्य मत्वासंबन्धसामा
न्ये ॥ ॥राजन्वान्सौराज्ये॥ ॥श्री ४॥ ॥

स्य च कामवर्षी पर्जन्यः । यस्मिन्नुदकं धीयत इति असमुनस्तदाकादिः कर्मण्यधिकरणे चेति किप्रत्ययः पेषंवासवाहनधिषु चेति उदकस्योदभावः ।
उदकसंबन्धसामान्यमिति यदेवदत्तादिष्वपि स भवति । असंज्ञार्थं वोदधिग्रहणम् ॥ ॥राजन्वान्॥ ॥शोभनो राजा यस्मिन्स सुराजा तस्य भावः
सौराज्यं ब्राह्मणादित्वात्ष्यञ् टिलोपः तस्य नः शोभनेन राज्ञा देशस्य संबन्धः समासकृत्तद्धितेषु संबन्धाभिधानं भावप्रत्ययेनेति वचनात् । एतच्च
राजन्वानिति सप्रकृतिनिमित्ते देशस्वत्वमभिधेयः यदाह ॥ ॥

सोराज्ञेगम्यमानइति। राजन्वानिति प्रशंसायामनुप्रनलोपणभावोनिपात्यते। सन्नेपुल्लिंगस्याविवक्षितत्वं दर्शयति राजन्वतीपृथिवीति॥ ॥अनोनुट्॥ ॥
अक्षण्वंतइति। अक्षिशब्दस्यमनुपिछंदस्यपि दृश्यतइतिअनङादेशः। नुटोऽसिद्धत्वात् पूर्वंनलोपेमतपूर्वमस्यानुट् तस्यणत्वं। शीर्षण्वतेति। शीर्षंश्छंद
सि। नुडयंपारिः क्रियतेतस्यमनुग्रहणेनग्रहणान्मादुपधायाश्चेतिवत्वंप्राप्नोतिमकारस्यतुनप्राप्नोतिनुटाव्यवधानात्तयदि पुनरयंनुडुमपूर्वोतः
क्रियतेतनैवंशक्यं अक्षण्वताशीर्षण्वतासालेनस्यात्। इहचसुपथितरः उत्तरसूत्रेणनुकिद्रूतेपदांतत्वान्नभ्रुअप्रशानितिरुत्वंप्राप्नोतितस्मात्स

सोराज्ञेगम्यमानेराजन्वानितिनिपात्यते। शोभनोराजायस्मिन्नस्तिसराजन्वादेशः राजन्वतीत्येवाम्नत्रभवति॥ ॥छंदसीरः॥ ॥
छंदसिविषयेइवर्णांतद्रिफांताच्चोत्तरस्यमतोर्वोभवति। इवर्णांतात्तावत् त्रिवतीर्याज्यानुवाक्याभवंति। हरिवोमेदिनंत्वा। अधिपतिवतीर्जु
होति। चरुरग्निवान्। आरेवानेतुनोविशत्। रयतेर्मताविति संप्रसारणमत्रः सरस्वतीवान्भारतीवान्दधिवांश्चरुः छंदसिविषयेसर्वेवि
धयोविकल्प्यंतइतीहनभवतिसप्तर्षिमंतंयशशृषिमान् अतिमान्। स्वर्यंतिद्यावापृथिवीमंतरिक्षमिति। रेफांतात्। गीर्वान् आशीर्वा
न्॥ ॥अनोनुट्॥ ॥छंदसीतिवर्ततेअन्नंतादुत्तरस्यमतोर्नुडागमोभवतिछंदसिविषये। अक्षण्वंतः कर्णवंतः सखायः। अस्थ
न्वंतंयदनस्थाबिभर्ति। अक्षण्वतालांगलेनाशीर्षण्वता। मूर्द्धन्वतीरुपदधातीति। नुटोसिद्धत्वात्तस्यचवत्वंनभवति॥ ॥नाद्घस्य॥
॥नकारांतादुत्तरस्यघसंज्ञकस्यनुडागमोभवतिछंदसिविषये। सुपथितरः दस्युहंतमः भूरिदाव्नस्तरुवृक्षमः भूरिदावत्तरःर
॥ थिनईकारांतादेशोवोपरतः रथीतरः रथीतमः। रथशब्दादेवमामत्वर्थीयोयमीकारः छंदसिईवनिशाविति १२
दिरेवकर्त्तव्यः तत्रचोक्तोदोषोतआह नुटोसिद्धत्वादिति। नन्वेवमप्यवग्रहेदोषः प्राप्नोति अन्नत्वं नदसक्षण्वंतइति णांतमवग्रहकं तितन्नप्राप्नो राम॰
तिलक्षणेनपदकाराअनुवर्त्याः पदकारैर्नामलक्षणमनुवर्त्यं॥ ॥नाद्घस्य॥ ॥भूरिदावत्तरइतिआतोमनिन्निसादिनावनिपू। रथीतरइति। रथ ४२
शब्दान्मत्वर्थीयइनिः तदंतान्तरपनकारस्यलोपेकृतेइकारस्यईकारः पदितुनकारलोपापवादोनकारस्यस्थानेविधीयेततदांतस्यासिद्धत्वादेकादेशो
नस्यात् १२ ॥ ॥

कृपः॥ ॥कृपोधातोरितिपाठः भाष्येकृपोरोलइतिपठितत्वात्। नुङ्खिधिलादेशविनामेषुकारेप्रतिविधानमभिमुक्तंतत्रावसरेप्राप्तेलादेशे
प्रतिविधत्त्रेरइतिसामान्यमिति। वर्णात्वावर्णैकृतभेदतिरस्कारेणात्मिकायाप्रवर्णात्मिकायांवरेफव्यक्तौयः सामान्यमेवर्ततेपतोकृपोपि
नयोरइत्यभिन्नावभिधानप्रत्ययोभवतस्तदुपादीयतेनतुवर्णात्मिकेवरेफव्यक्तीरित्यर्थः ततः किमित्यतआहतेनेति। लइत्यपिसामान्यमे
वेति। उपादीयतइत्यपेक्षतेऽस्रपितेनपश्चात्केवलोलकारः पश्चाल्लृकारस्थः तयोर्द्वयोरपिग्रहणमिति घटितमंप्रवर्णानुसारेणानुगम्यमान
त्वात्नपठितं। परिद्वयोरपिग्रहणं ततोपि किमित्याह ततोपमिति। केवलस्यशुद्धस्यलकारस्यादिशइति अत्रापिकेवलइतिदृष्टव्यं। ऋकारस्यापि

कृपोरोलः॥ ॥कृपोधातोरेफस्यलकारादेशोभवति। इतिसामान्यमुपादीयते तेनयः केवलोरेफोयश्चऋकारस्थस्तयोर्द्वयो
र्ग्रहणं लइत्यपिसामान्यमेव। ततोपि केवलस्यस्थानेलकारआदेशोभवति। ऋकारस्यापेकदेशविकारद्वारेणलृका
रः तथाचलुरिचक्लृपइत्येवमादयोनिर्दिश्योउपपद्यन्ते। कल्पाकल्पाः ऐकल्प्यः चिक्लृप्सति क्लृप्तः क्लृप्तवान् कृपाइत्ये
तस्यकृपेः संप्रसारणंचेतिभिदादिषुपाठाद्भवति॥ ॥श्री॥ ॥छ॥ ॥छ छ॥ ॥छ॥ ॥छ छ॥

लृकारइतिअत्रान्तरतम्यात्। ननुसमस्तविद्धयोरपिग्रहणेऋकारस्थोरेफः तस्यविकारएकदेशविकारः यद्वाएकदेशंलृकारस्थोलकारः सएवविका
रएकदेशविकारः तद्वारेणएतदुक्तं भवतिऋरुभक्तिसंपुटयोरेफलकारयोर्निष्कर्षस्यकर्तुमशक्यत्वात्समुदायस्यसमुदायआदेशइतियदिनि
ष्कर्षोशक्यक्रियः माभूत्तयोरुपादानंननुपुनस्तावतासूत्रेनुपात्तयोः समुदाययोः स्थानेदेशभावोविघनइत्यतआहतथाचेति। एवमादयइति।क्ला
दिशब्देनतासिचक्लृपः आक्लृप्तिर्तेः अनक्लृप्यमर्षयोरित्यादेर्ग्रहणं। कल्पेतिकुटिलात्वेत्रेइउभावः अत्रलंत्वस्याभिद्वात्स्वंगुणेकृतेरेफ
स्यलकारः।चिक्लृप्सतीतिहलन्तात्त्वेतिसनः कित्वं। कृपेरितिकृपकृपायांभवतुसंप्रसारणेकृतेरस्यंतथापिरूपसामान्याद्ग्रहणप्रसंगोतआह॥ ॥

॥श्री॥ ॥श्री॥ ॥

८ का०प०२

४३

तस्पहीति। कपेरेवद्रष्टव्या इति रंजेः कुन बहुलवचनात् कपेरपि भवति कुहृ पिप्पलीकीटस्त्रिस्तत्रापि कपिरेव पठितव्यः खर्जिपिंजादिभ्य ऊरोलचौ कपे
रपि भवति सर्वत्र बहुलवचनात् संप्रसारणं। कर्पूरादय इति आदिशब्देन कृपाणस्य ग्रहणं पृषि बुधिष्वा इति रंजेः कुन बहुलवचनात् कपेरपि भवति कु
हृ पिप्पलीकीटस्त्रिस्तत्रापि कपिरेव पठितव्यः खर्जिपिंजादिभ्य ऊरोलचौ कपेरपि भवति सर्वत्र बहुलवचनात् संप्रसारणं। कर्पूरादय इति आदिशब्देन
दृशेः किन्नेति वा द्रुलकारान्तत्वं। पथवरूपं बाहुलकमाश्रयणीयं कपेरपि नदीषइस्याह उणादय इति। वालेति। वणावलूम् संवरणे वल्यत इति वा

तस्पहिक तत्संप्रसारणास्पलाक्षणिकत्वादिह कृपय इति ग्रहणं नास्ति॰ कृपणः कृपीट कर्पूरादयोपि कपेरेव द्रष्टव्याः। उणादयो ब
हुलमिति चात्कर्पेरेव लत्वाभाव। वालमूललघुलमसुलांगुलीनां वा रोलमापद्यत इति वक्तव्यं। वालः वारः मूलं मूरं॰ लघुः रघुः अ
लं अरं॰ असुलः असुरः। अंगुलिः अंगुरिः। कपिलकादीनां संज्ञाछन्दसोर्वा लो रमापद्यत इति वक्तव्यं॰ कपिलकः कपिरकः।
तिल्पिलीकं तिर्प्पिरीकं॰ रोमाणि लोमानि पांसुरं पांसुलं। कर्म कल्म॰ शुक्रः शुक्लः रलयोरेकत्वस्मरणमिति केचित्॰ किमिदमे
कत्वस्मरणमिति समानविषयत्वमेतयोः स्मर्यत इत्यर्थः १३ ॥ ॥श्रीराम४॥ ॥श्री०॥ ॥श्री४॥ ॥श्री०॥

लः मलप्रतिष्ठायामित्यस्मादिगुपधलक्षणः कः लांधिबंह्योर्नलोपश्चेति कुप्रत्ययान्तो लघुशब्दः अलमित्यव्ययं अंगेरुलिः अनेनुरीरश्च लोवेति ताभ्रितांक
पिलकादिषु वा रस्य लः रोमाणी तिनेतरहित अचीकृ परितिहि नमिभेत अकार ल्कारयोः सवर्णविधिरिति लकारस्योसंदिति अकारेकृते अचीकृति
+। रोतेर्मनिन् लोमन्नामन्निति निपातनं नाश्रितं। पांसुरस्मिन्नस्तीति नगपांसुपांडुभ्यश्चेति रः कृजोमनिन् कर्म शुक्रः शुक्ल इति ऋज्रेन्द्रेति निपा राम०
तनं नाश्रितं अथ कृप्रसामर्थ्ये रस्येव कस्मान्न पठितं एवं हि लत्वं न विधेयं भवति+ दितिस्यात् लत्वविधौ तस्यासिद्धत्वात् पूर्वमृकारस्ततो लत्वमिति ४३
सिद्धमिष्टं तथा चलीकृस्यत इति रीको पिलत्वसिद्धिर्भवति १३ ॥

उपसर्गस्य॥ ॥अग्रनोपरइति अत्र द्वौ पक्षौ अयतिग्रहणं रेफस्य विशेषणं अयतिपरस्य रेफस्य सस्य चेडुपसर्गस्येति उपसर्गविशेषणं वा अय
तिपरस्योपसर्गस्य यो रेफ इति तत्राद्ये पक्षे एवमन्वयः अयतौ परतो यो रेफ उपसर्गसंबंधी तस्येति । द्वितीयपक्षे अयतौ परतो य उपसर्गस्तस्य यो रेफ
स्तस्येति प्लायत इति रनुदात्तेत । कथं तर्हि उदयति वितनोत्यूर्ध्वरश्मिरब्जा विति परस्मैपदं किमनेन वत्सगजशोचेनयदि वा पचाद्यजन्तादुदयश

उपसर्गस्यायतौ॥ ॥उपसर्गस्य यो रेफस्तस्यायतौ परतो लकार आदेशो भवति॰ प्लायते पलायते । अत्र यो यमेकादेशस्त
स्य स्थानिवद्भावात् पनेरुपसर्गस्य च विभागमतिपद्यतिग्रहणं रेफविशेषणं तदायेन नाव्यवधानेन व्यवहितेपि वचनप्रामाण्या
दिति एकेन वर्णेन व्यवधानेपि लत्वं भवति॰ ॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥छ॥ ॥
॥श्री४॥ ॥श्री४॥ ॥श्रीः॥ ॥

वृद्धाचार्यैरपि लत्वं । केचित्तु इटकिटकटीगतावित्यत्र इकारमपि धातुं पठंति । यथा त्वत्र दर्शितेपक्षद्वयेपि दोषो न भवति तथा क्रमेण दर्शयति ।
अत्रेति । स्थानिवद्भावादिति पूर्वत्रासिद्धेन स्थानिवद्भावे सेतद्विहन भवतीति तत्र दोषः संयोगादिलोपे लत्वणत्वेष्विति सपवादस्य रणात् । यद्ययतिग्र
हणं रेफस्य विशेषणमिति कार्यित्वेन प्रधानत्वात् । एकेन वर्णेनेति । एकग्रहणं प्रत्ययत इत्यत्र संघातेन व्यवाये न भवतीति प्रदर्शनार्थं ॥ ॥
॥ ॥३॥ ॥३॥ ॥३॥ ॥

तथाचेति। एवंचरूसेत्यर्थः। पल्ययतइत्यत्रापीतिपत्रप्लूयमाणोनैकैनैववर्णेनिलौकिकंम्यवधा॰ नंतत्रापिप्रवर्त्तते न केवलंप्लावतइत्यादौपत्रप्लुत्या
निवङ्गायह्यरेणाशास्त्रीयेते त्रैवेत्यपिशब्दस्यार्थः। अमुमेवविशेषंदर्शयितुमस्यपृथगुपन्यासः ननुचनिरः कुषः सुदुरोरधिकरणइतिनिर्देशादे
फंतावप्युपलगेरित्रिस्तोवचनस्यावकाशइत्यिकथंम्यवधानेभवति। उच्यतेयद्येतावत्प्रयोजनंस्यान्निर्दुरोरपत्ता। निसेववूयात उपसर्गग्रहणान्तु
ग्यवायेपिभविष्यतिरएतस्वैकवर्णाम्यवधानेनाप्युपन्नमितितिनप्रसयतइत्यत्रप्रसंगः उपसर्गविशेषणात्विति। श्रुतत्वादितिभावः। सिद्धमेवैतत्स

तथाचपल्ययतेइत्यत्रापिभवति॰ उपसर्गविशेषणोत्वयतिग्रहणेसर्वमेवैतत्सिद्धंप्रतेरपितुप्राप्नोति॰ तत्रकेषांचिद्दर्शनंभवित
ग्यमेवव्लन्ययतइति। प्रथमपक्षदर्शनाभिनिविष्टास्तुप्रत्यायितइत्येवभवितव्यमितिमन्यंते। अपरेपुनः प्रतिशब्दोपसर्गस्यामतेः
प्रयोगमेवनेच्छंति। निसदुस इत्येतयोस्तुरुत्वस्यासिद्धत्वाल्लत्वेनभवितव्यंनिरयणंदुरयणं॥ ॥ओपङि॥ ॥गृइत्येतस्य
धातोरेफस्यलकारोभवतिपङि॰ परतः॥ निजेगिल्यते निजेगिल्यते निजेगिल्यते॰ भावगर्हायांओयङ्किहितः इत्वेकृतेरपरत्वेच
दीर्घस्यासिद्धत्वान्निसत्वाच्चलत्वेकृतेनिमित्ताभावाद्दीर्घत्वंनभवति॰ केचिदिहयइतिगिरतेर्गृणातेश्चसामान्येनग्रहणमि
च्छंति॰ अपरेतुगिरतेरेवगृणातेर्हिपङि॰ वनात्सनभिधानादिति। पङीतिकिंनिगीर्यते १४ ॥ ॥श्रीः॥ ॥

त्वर्वमितियेननाम्यवधानमित्यादिके। नकश्चित्प्रयत्नोस्मिन्पक्षेइत्येवशब्दस्यार्थः प्रतेरपितुप्राप्नोतीतिपूर्वस्मिन्पक्षेसंबंधातेनव्यवायान्नप्रा
प्नोतित्यत्र न तु प्राप्नोतीत्यमुंविशेषंतुशब्दोद्योतयतिप्रथमपक्षदर्शनः भिनिविष्टास्त्विति प्रथमपक्षस्यपरदर्शनायरेभ्यः प्रतिपादनात्तत्राभि
निविष्टास्तत्परायणाइत्यर्थः। अपरेत्वित्यादि। आप्रयर्याणाः प्रत्यायितशब्दइत्तचप्रत्ययांतः संजातप्रत्ययाः प्रत्यायिताइति। निसदुस इत्येत
योस्त्विति सकारांतविषयोग्रंथः रेफांतयोस्तुभवितव्यमेवलत्वेन॥ ॥ओपङि॥ ॥उदाहरणेअतइत्यातोरिती त्वंहलिचेतिदीर्घस्या
सिद्धत्वात्स्वंमनेनलत्वंततोविहतनिमित्तत्वाद्दीर्घाभावः। गिरतेर्गृणातेश्चेतिनिगरणार्थस्यशब्दार्थस्यच सामान्येनेमिविशेषानुपादा
नात्। अपरेतुगिरतेरेवग्रहणमिच्छंती सानुषंगः कः पुनरत्रदेतुरित्यतआह गृणातेस्त्विति। तुर्ह्यर्थो। विगीर्यतइतिपङ् १४ ॥ ॥छ॥ ॥

अचिविभाषा॥ ॥धातोः स्वरूपग्रहणे तत्प्रत्यये कार्ये विज्ञाते तात्प्रत्ययः संनिधापितः तस्याचाविशेषणात्तदादिविधिर्विज्ञायते परग्रहणाज्जादौ प्रत्यये इति। निगिरतीति लुङादिः ताल्लुः तस्य ङित्वात् सति गुणे इलंणि लोपस्य स्थानिवद्भावादिति। परस्य लत्वविधानात् अंतरंगत्वाभावात् सर्वत्रासिद्धमिति कत्वतस्याति ध्वात्सर्वे णिलोप एव भवतीति भावः। प्रत्ययलक्षणमप्यत्र अकंवक्तुं। नचवर्णाश्रयत्वमज्जादौ प्रत्यय इत्युक्तत्वात् कथंयुनः

अचिविभाषा॥ ॥अजादौ प्रत्यये परतो गृणोरेफस्य विभाषा लकारादेशो भवति। निगिरति निगिलति। निगरणं निगलनं। निगारकः निगालकः। इयं व्यवस्थित विभाषा तेन गल इति प्राण्यंगे नित्यमेव लत्वं। गर इति विषे न भवति। निगार्यते निगाल्यत इत्यत्र णिलोपस्य स्थानिवद्भावात् इचि विभाषेति लत्वविकल्पः सर्वत्रासिद्धेन स्थानिवदित्येतदपि साप्यवादमेव। तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति। अंतरंगत्वाच्चात्र कृते लत्वविकल्पे णिलोपो भविष्यति। गिरौ गिर इत्यत्र धातोः स्वरूपग्रहणे तत्प्रत्ययविज्ञानमिति लत्वं न भवति। गिरतिर्वा लत्वविधावधिकृतो न रणातेरेतद्रूपं॥ ॥परेश्च घांकयोः॥ ॥परि इत्येतस्य योरेफस्तस्य घ अंक इत्येतयोश्च परतो विभाषा लकारादेशो भवति। परिघः पलिघः। पर्यङ्कः। पल्यङ्कः। घ इति स्वरूपग्रहणमत्रेष्यते न तरप्तमपौ। योगे चेति वक्तव्यं। परियोगः पलियोगः॥ ॥

स्थानिवद्भावः यावता सर्वत्रासिद्धेन स्थानिवदिति पद्धतेः तस्माह सर्वत्रासिद्ध इति कः पुनरस्यापवाद इत्यत आह तस्य दोष इति। अंतरंगत्वादिति। यद्यस्मिन्नधिकारे लकारे अंतरंगत्वाभावे ऽप्यंतरंगं नाज्झापेक्षं ज्झाप्ये सत्वाल्लत्वमंतरंगं बहिर्भूतयगापेक्षत्वात्तु णिलोपो बहिरंग इति भावः। गिरौ गिर इति विस्पष्टार्थं॥ ॥परेश्च॥ ॥परिघ इति। परो घ इत्यस्य ग्रहणे तेषु लोपो घत्वं च। पर्यंक इति अकिलक्षणोपसंग्रहः। हलश्चेति घञ्। घ इति स्वरूपग्रहणमत्रेष्यत इति इष्टिरेवेयं परियोगः पर्यनयोगः॥ ॥

संयोगांतस्य॥ ॥इह श्रेयान्भूयानिति संयोगांतलोपो न प्राप्नोति परत्वान्नुत्वे न बाध्यमानत्वादित्याशंक्याह इहेति। एवं तर्हि नुत्वमसिद्धत्वात्संयोगां
तलोपं न बाधते तथा जश्त्वमपि न बाधेत तत्रश्च पयोधक् इति जश्त्वमेव स्यादत आह न जश्त्वे त्विति संयोगांतलोपे हि प्राप्ते चाप्राप्ते च जश्त्वमारभ्यते
श्रेयानित्यादौ प्राप्ते पय इत्यादौ त्वप्राप्ते जश्त्वे तु सर्वत्र प्राप्तमेव तस्माद्येन नाप्राप्तिन्यायेन जश्त्वमेव बाध्यते न संयोगांतलोपं इत्यत्रेत्यादि· यणादेशो हि
द्विपदाश्रयत्वाद्बहिरंगः। संयोगांतस्य लोपस्त्वेकपदाश्रयत्वादंतरंगः। अंतग्रहणं शक्यमकर्तुं पदस्येति वर्त्तते संयोगेन हि पदे विशेष्यमाणे तदंतवि

संयोगांतस्य लोपः॥ ॥संयोगांतस्य लोपो भवति· गोमान्· यवमान्· कृतवान्· हतवान्· इह श्रेयान्भूयानिति फलं परमप्यसिद्ध
त्वात्संयोगांतलोपं न बाधते· जश्त्वे तु नाप्राप्ते तदारभ्यत इति तस्य बाधकं भवति यशः ययाति। दध्यत्र मध्वत्र अत्र तु यणादेशस्य ब
हिरंगलक्षणस्यासिद्धत्वात्संयोगांतस्य लोपो न भवति·॥ ॥रात्सस्य॥ ॥संयोगांतस्य पदस्य यो रेफस्तस्मादुत्तरस्य अलोऽन्त्यस्य
सकारस्य लोपो भवति· गोभिर्व्राः प्रत्यंचमत्साः। हरतेः सरतेश्च लुङि· सिचि वृद्धौ हसलादि इभावेव कृतं छंदसीति वचनान्नार्हीर्धिसति
रूपमेतत्। मातुः पितुरिति ऋत उदित्युत्वे कृते रपरत्वे च सति रात्सस्येति सलोपः। सिद्धे सत्यारंभो नियमार्थः रात्सस्यैव लोपो भव
तिनान्यस्य· ऊर्जेः क्विप्· ऊर्क्· मृजेर्लङि· न्यमार्ट् १५॥

धिना संयोगांतस्येति लभ्यत एव॥ ॥रात्सस्य॥ ॥संयोगांतस्य पदस्येत्यादि। संयोगांतस्य पदस्य यो वर्णो रेफस्तस्मादुत्तरस्य सकारस्य लोपो भव
तीति तदेव पदं यस्य लोपः स्यादित्यर्थः अत्साः अत्सारिति त्सर संचलने त्सरधातुः गतौ। रात्सस्येति रादेव सस्य नान्यतः श्रेयानित्यादौ एवं तु नियमो न भव
ति उरः प्रभृतिषु पुमानिति हलंतसंयोगांतलोपस्य पाठात्। ऊर्गिति ऊर्ज बलप्राणनयोः भ्राजभासेत्यादिना क्विप् अत्र नियमाज्जकारस्य लोपाभा
वे चोः कुरिति कुत्वं गकारः वावसान इति चर्त्वं। न्यमार्डिति। मृजू शुद्धौ अदादिः तिपो हल्ङ्याब्भ्य इति लोपः मृजेर्वृद्धिः व्रश्चादिना षत्वं जश्त्वचर्त्वे १५

धिच॥ ॥इतः प्रभृति सिचः सकारस्य लोप इति वक्ष्यति तत्र्च सिचा प्रत्यय आक्षिप्यते तस्य धकारेण विशेषणात्तदादिविधिर्विज्ञायते तस्मादधकारादौ
प्रत्यय इति भाष्यकारमते तु धकारे परे इति द्रष्टव्यम् अलविढ्मिति लुङ् ध्वं सिच् इट् सिचो लोपः विभाषेट इति पक्षे मूर्धन्यः धकारेण न श्रूयते तेनिष्टुत्वे कृते अलवि
ढ्मित्येव स्यात् विभाषाग्रहणं तु तत्र षीध्वं मध्यं लिङ्थं च स्यात् । इतः प्रभृतीत्यादि उदः स्थास्तंभोः पूर्वस्येति पूर्वसवर्णविधानमत्र ज्ञापकमाङ्कः अन्यथा उ
त्थाइति स्थिते तकारात्परस्य सकारस्य झलो झलीति लोपे सति उत्थात इत्यादेः सिद्धत्वादनर्थकं तत्स्यात् सामान्यापेक्षं च ज्ञापकमस्मि न्नकारेणापि लोपः प्रसि
वइति । चकाड्ढीति हे शिः यलितं मः चकाड्डि शो भवेत्स्यथीः । चकास्ट दीप्तौ अदादिः लोट् सिपो हिर्हेर्धिः झलां जश् झशीति सकारस्य दकारः । पयोधावतीति ।

धिच॥ ॥धकारादौ प्रत्यये परतः सकारस्य लोपो भवति· अलविढ्वं अलविध्वं अपविढ्वं अपविध्वं· यद्यत्र सकारलोपो न स्यात् सि
च· षत्वे जश्त्वे च सति विभाषेट इति म ईमाभाव पक्षेपि धकारो न श्रूयेत· इतः प्रभृति सिचः सकारस्य लोप इष्यते इह न भवति च
काड्ढि यलितेशिर इति· तथा पयोधावती सेवमादीनामपि न भवति· सग्धिश्च बब्धामिति छांदसो वर्णलोपः भाष्यकारस्त्वाह च
काधी सेवमभवितव्यं तेन पयोधावती सेवमादावपि॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥ श्री ॥ ॥श्री॥

हशिवेति रोफत्वं पयादि सिचो लोप इष्यते सग्धिश्च बब्धामिति झलो झलीति लोपो न स्यादत आह सग्धिश्च बब्धामिति । अदेः क्तिनि बहुलं छंदसीति घस्ला
देशः घसिभसोर्हलि चेत्युपधालोपः समानस्य छंदसीति सभावः बब्धामिति भषप्सभत्सींनदी भ्योः जुहोत्यादिः लोट् तस्य तां श्लो द्विर्वचनं पूर्ववदुपधा
लोपः सकारस्य च लोपः तकारस्य धत्वं भकारस्य जश्त्वं बकारः । पयोधावती सेवमादावपीति । अन्यथा सत्वस्यासिद्धत्वात्सर्वं स लोपः स्यात् भाष्यका
रस्त्वाहेति पूर्वं तु श्लोकवार्त्तिककारस्य मतं दर्शितं॥ ॥

यत्नांतरमास्थेयमिति। एकपदाश्रयत्वादंतरंगत्वं पदद्वयाश्रयत्वाद्बहिरंगः सलोपः तत्र सलोपस्यासिद्धत्वात्पूर्वत्रासिद्धमिति पूर्वत्रेति निर्दिष्टस्य वि
षयस्याभावादसिद्धत्वाभावाद्गुणमेव तावत्प्रवर्त्तते अल्विधित्वाच्च स्थानिवत्त्वाभावाद्रोर्लोपाभाव इति। धिसकार इति स्थानिनोपि विषयाच्च विवक्षया
सकार इति सप्तमी निर्दिष्टः आशाध्वमिति आङः शासु इच्छायां अदादिरनुदात्तेत्तान्नश्त्वमिति। ध्वलोऽज्ञशश्त्वश्वाश्यनेन सर्वमेवमिति यदि सकारस्य
जश्त्वेनाशाध्वमिति सिद्धं ततः सर्वमेवल सुजातं जश्त्वेनैव सिद्धं स्यात् ततश्च सूत्रमेवेदं न कर्त्तव्यमिति श्रुतिश्चापि न भिद्यत इति व्यंजनपरस्यैकस्या
नेकस्य वा हलः श्रवणे विशेषो नावधार्यत इत्यर्थः। लुङः श्चापीति अपंचापरे जश्त्वे सति गुणः इणः षीध्वमित्यत्र लुङोग्रहणं न कर्त्तव्यं भवति अ

यत्नांतरमास्थेयं। धिसकारे सिचोलोपश्चकार्द्धीति प्रयोजनं। आशाध्वं तु कथं जश्त्वं सकारस्य भविष्यति। सर्वमेवं प्रसिद्धं स्या
च्छ्रुतिश्चापि न भिद्यते। लुङश्चापि न पूर्वस्मिन्ग्रहणं सेटि दुष्यति॥ ह्रस्वमिभस्योर्नसि छ्येत तस्मात्तिन्ग्रहणं न तत्। छांदसोपर्णा
लोपो वा पथ्येष्टक्त्वारमध्वरे निष्कत्रीरमिति प्राप्ते १६ ॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥ ॥

च्योद्धम सोद्धमित्यादौ षत्वजश्त्वश्रुत्वैरेव रूपस्य सिद्धत्वात् ह्रस्वादंगादिति सिचोलोपे कृतं कथं भवेत्। दोषांतराभिधानात्त्वनेन तत्तु ष्टुनिरूपितं।
नद्दर्शयति सेटि दुष्यतीति। एतच्च यत्र सकारस्य लोपो न स्यादित्युपक्रम एवोक्तं। तस्माद्धिचेति कर्त्तव्यं पूर्वस्मिंश्च लुङोग्रहः धिसकारे सिचोलोप
इति त्वेतत्त्व व्याख्यातं। तत्र दोषांतरं दर्शयति च सिभस्योरिति। साश्विर्बन्धामिसे तयोरसिद्धिप्रसंगात् न सिचोलोपः शक्यो विज्ञातुमित्यर्थः परिहरी
ति छांदसो वर्णलोपो वेति वा शब्दः प्रसंख्यावर्त्तयति। सिचश्चापं लोपः ह्रसिभस्योस्तु छांदसो वर्णलोप इति तत्पथ्ये साहयथेति। इष्टक्त्वारमध्वर
स्यैकदेशानुकरणादिष्टक्त्वारमध्वरेशाद्वावसप्तमीन्तत्रबहूच्चारः इष्टक्त्वारमिति पठंति तैत्तिरीयास्तु निष्टक्त्वारमिति १६ ॥ ॥ ॥

॥स्लोस्लि॥ ॥भिदिच्छिदिहीत्वीतितेतोमत्ततिरत्नुदात्रेत। अयमपि सिच एव लोप इति। पदिलोपद्स्येतिवर्तते तत्रास त्रेस्लोस्लि सस्येति निर्दिष्टा नांत्र पाणा मप्येकसर्वं धिलेविधिरयमितिसोमसुत्स्यात सारोनभविष्यतिसमासेपिनभवति सोमसुत्स्थितिरितिा किं कारणं सकारस्य कारण्मांय सदमारत्वं तत्प्रतिति कारस्यावयवलाभावात॥ ॥ह्रस्वा॥ ॥अच्चोष्टेति। सलोपस्यासिद्धत्वात्स्वं गुरुणत्तो विहलनिमित्तला त्नोपाभावः अप मपीति। अत्रोदस्यात्तंभोरितिसूर्योक्तं न्यायकमेवशरणं। छिष्टाणामितिह्रस्वात्सारोतद्धितइतिपत्वे॥ ॥इटईटि॥ ॥अत्रसिचएवसंभवः॥ ॥

झलोझलि॥ ॥झलउत्तरस्य सकारस्य झलिपरतो लोपो भवति। अभिन्न अभित्थाः अछिन्न अछित्थाः आवात्तामवात्तं अवात्त त्यत्रवसेःसिचः सकारलोपस्यासिद्धत्वात्समाईधातुकइतिसकारस्य तकारः झलइति किं अर्मसत अमंस्थाः झलीति किं अभित्साता मभित्सत। अयमपि सिच एव लोपः तेनेह न भवति सोमसुत्स्नाता॥ ॥ह्रस्वादंगात्॥ ॥ह्रस्वादंपादुत्तरस्य सकारस्य लोपो भवा ति झलिपरतः अकृत अकृथाः अहृत अहृथाः ह्रस्वादिति किं अच्योष्ट अप्लोष्टः अंगादिति किं अलाविष्टामलाविषुः आयाविष्टामया विषुः झलीत्येव अकृषातामकृषत। अयमपि सिच एव लोपः तेनेह न भवति छिष्टाणां छिष्टमां। सुजंनाद्विशब्दादुद्भवप्रकर्ष अातिशा यिकआमप्रत्ययः॥ ॥इटईटि॥ ॥इटउत्तरस्य सिचो लोपो भवति ईटिपरतः। अदेवीत् असेवीत् अकोषीत्। इटइति किं अकार्षी त् अहार्षीत्। ईटीति किं अलाविष्टां अलाविषुः॥ ॥स्कोःसंयोगाद्योरंतेच॥ ॥पदस्यांते यः संयोगो झलि च परतस्तदाद्योः सकारक कारयोर्लोपो भवति। लस्जेः लग्नः लग्नवान् साधुलक्। मस्जेः मग्नः मग्नवान् साधुमक् मस्जेः॥ ॥ ॥श्री०॥ ॥श्रीः॥ ॥

॥स्कोःसंयोगाद्योः॥ ॥गुणाभूतोपिसंयोगोझलंताभ्यां विशेष्यते संयोगाद्योः पदस्यांते स्कोर्यस्मान्नास्ति संभवइति मत्वाहा पदस्यांतइति झलि च परत इति पदस्य पः संयोगइत्यपेक्षते। लग्नइति ओलस्जी व्रीडे निष्ठाईदित्वादिट्प्रतिषेधः अत्र नकारे झलि परतः सजयोर्यः संयोगः तदाद्योः सका रः ओदितश्चेति निष्ठानत्वं तस्यासिद्धत्वात् कुत्वं साधुलगिति साधुलज्जत इति क्विपुमस्नइ निमत्ति नशोर्झलीति नुम सचजकारात्पूर्वः मस्जेरंत्यात् र्वमिच्छंतीति वचनात् तेनानिदितामिति लोपः सलोपादि पूर्ववत्॥ ॥

टका·प०२
४७

नष्ट इति नक्ष्‌ तन्‌ करणो जरित्वा ढिकस्येति ट यस्य विभाषेतीट्‌ प्रतिषेधः झलि सङ्गीति वक्तव्यमिति सङ्गीत्ययं प्रकरणशेषः किं प्रयोजनं गिरो
भोधि ढित्वं चट्‌ षत्वस्य ःकाष्ठशक्‌ स्थिरः क्रुंचा धुर्येति मास्मेत्‌ पुल त्वादीनि भवन्त्विति गिर इत्यत्रापि विभाषेति लत्वं मा भूत्‌ अंभोधि ढित्विति धिचेति
सलोपो न भवति ढिष्टामिति क्रुत्वादि गादि इति न भवति दृषत्स्यः झलो झलीति न भवति काष्ठशक्‌ स्थिरः स्कोः संयोगाद्योरिति न भवति क्रुंचा
नोः कुरिति कुत्वं न भवति धुर्येति हलि चेति दीर्घत्वं न भवति तथा वार्त्तिकं सङ्गि· लत्वसलोपसंयोगादिलोपकुत्वदीर्घत्वानीति सङ्गीति प्रकृत

नष्टः नष्टवान्‌ साधुतर्‌ । झलि सङ्गीति वक्तव्यं· किमिदं सङ्गीति· सनः प्रभृति महिङ्ङो ङकारेण प्रत्याहारः इह मा भूत्‌ का
ष्ठशक्‌ स्थातेति धकारे झलि ककारस्य संयोगादेर्लोपः प्राप्नोति· तदत्र शकेः क्विबन्तस्य प्रयोग एव नास्तीत्याहुः अत
एवाहुः काष्ठशो वनास्ति कुतो यं काष्ठशक्‌ इति ष्ठेदिति· वाक्यार्थका कार्थापि सत्रापि बहिरङ्गलक्षणस्य यणादेशस्या
सिद्धत्वात्‌ संयोगादिलोपो न भवति· स्कोरिति किं नर्नर्त्रिः संयोगाद्योरिति किं पयः ऊक्‌· अते चेति किं रक्षिता॥ १७ ॥

लत्वादीनि वक्तव्यानीत्यर्थः तदेवं वार्त्तिककारमतेपि चकाधीत्येवं भवितव्यं सङ्गीति वचनात्‌ सनः प्रभृतीनि धातुप्रत्ययानां ग्रहणमित्यर्थः टप्र०
अत्र संयोगादिलोपं प्रयोजनं प्रत्याचष्टे तदिति । तदित्ति वाक्योपन्यासे शकेरिति ककारेणोपलक्षणमेतत्‌ ततो न ककलोर्लक्कुकहेक अपादा ४७
न इत्यादेरपि क्विबन्तस्य प्रयोगो नास्त्येव अप्राहुरिति भाष्यकारादयः तत्र भाष्यं तावत्‌ सरति काष्ठशगेवेति वाक्यार्थमित्यत्र स्थानिवद्भावोपि
शक्यो वक्तुं तस्य दोषः संयोगादिलोपरसुक्त्वात्‌ १७ ॥

वोकुः॥ ॥नकारोपधोवेति पूर्वमोसक्ति कं नकारोपधत्वमाश्रित्योक्तं इदानींतु नकारस्यानुस्वारपरसवर्णाभ्यामागतो ञकार इत्युच्यते नकारलोपे
हीति तथा संनिपातपरिभाषायाः प्रयोजनेषु पठितत्वादुपधत्वमकित्वस्यनिमित्तं न भवतीत्यर्थः। न च वस्तुनोपधः तथाप्यनुस्वारपरसवर्णयोः कृ
तयोर्ञकारस्य कुत्वप्रसंगो तत्राह न त्रेति। कुत्वस्य तत्र प्रसंगो नास्ति अनुस्वारंप्रति तस्यासिद्धत्वात्॥ ॥हो ढः॥ ॥सोढेतितीषसहेती द्धि

चोः कुः॥ ॥चवर्गस्य कवर्गादेशो भवति झलि परतः पदान्ते च॰ पक्ता पक्तुं पक्तव्यं ओदनपक्॰ वक्ता वक्तुं वक्तव्यं वाक्॰ क्रुंचेत्यत्र
झलि सडीतिवचनात् ञकारस्य चकारे झलि परतः कुत्वं न भवति पुजिक्रुंचांचे ति निपातनाद्वा॰ नकारोपधो वा धातुरयं कुंच गति
कौटिल्याभावयोरिति पठ्यते न नकारलोपे हि निकुचितिरित्येवं दृश्यते॰ पुजिक्रुंचांचेति तस्यैव रेफोधिको नकारस्य लोपाभा
वश्च निपात्यते तत्रानुस्वारस्य परसवर्णस्यासिद्धत्वात् नकार एव नास्तीति कुत्वं न भविष्यति॥ ॥हो ढः॥ ॥हकारस्य ढका
रआदेशो भवति झलि परतः पदान्ते च॰ सोढा सोढुं सोढव्यं॰ जलाषाट्॰ वोढा वोढुं वोढव्यं प्रष्ठवाट् दित्यवाट्॥ ॥दादेर्धातोर्घः
॥ ॥दकारादेर्धातोर्हकारस्य घकारआदेशो भवति झलि परतः पदान्ते च॰ दग्धा दग्धुं दग्धव्यं काष्ठधक्॰ दोग्धा दोग्धुं दोग्धव्यं गो
धुक् धातोरिति दादि समानाधिकरणमेतन्न भवति किं तर्हि तद्विशेषणं॥

कल्पः जलाषाडिति। छंदसि सहः इति ण्विः। अन्येषामपि दृश्यत इति पूर्वपदस्य दीर्घत्वं सहेः साडः सः इति षत्वं प्रष्ठवाडिति वहश्चेति ण्विः॥ ॥
दादेः॥ ॥किं तर्हि तद्विशेषणमिति यदपि समानाधिकरणं न भवतीत्यस्येन त्वमिति पक्षे भूतं न भवति समानाधिकरणस्यापि विशेषणलोपप्यन्ते।
तथापि समानाधिकरणपक्षेधातोरित्येतद्विशेष्यं अत्र तु पक्षे विशेषणमित्यस्यैव प्रतिपक्षता॥ ॥छ छ॥ ॥छ छ॥ ॥

अवयवषष्ठ्यंतमिति। अवयवसंबंधे या षष्ठी तदंतमित्यर्थः। अत्र स्पष्टमेव प्रतिपक्षत्वं धातोरवयवो योऽसौ दादिः शब्द इति। एवं चोपक्रमे पि दकारादेर्धा
तोरिति अधिकरणे षष्ठी। किंकृतं भवतीति किमिष्टं सिद्धं भवतीत्यर्थः। अधोगित्यत्राधीनिसामानाधिकरण्येन लक्षणमेन दादिलस्य विहन्तलान्तस्यात्।
कथमिति धात्ववयवं न धातोरवयव इति प्रश्नः। अथवेति अस्मिन्पक्षे उपक्रमे पि दादेर्धातोरिति यच्छ्रुतमेव धातूपदेश इति एतच्च धातुग्रहणाल्ल
भ्यते। न ह्यधातोर्दकारादेर्हकारांतस्य संभवः। दिवानदुह्यामित्यादौ यस्माद्धलं प्रवर्तते। नटेतरस्य मीवीन मयवधान युतं वचः। यस्माद्दामलिडित्यादौ धा

मवयवयवषष्ठ्यंतं धातोरवयवो योऽसौ दादिः शब्दः तस्यावयवस्य हकारस्येति· किंकृतं भवति अधोगित्यत्रापि घकारः सिद्धो भवतीः क
थं दामधादगुमिति· उपदेशिवद्भावात्· अथवा धातूपदेशे यो दादिरित्येवं विज्ञायते तथा च दामलिहमिच्छति दामलिह्यमिच्छतिदा
मलिह्यतिदामलिह्यते प्रत्ययः दामलिडित्यत्रापि न भवति॥ ॥वाद्रुहमुहष्णुहष्णिहां॥ ॥द्रुह मुह ष्णुह ष्णिह इत्येतेषां हकारस्य वा घ
कारआदेशो भवति झलि परतः पदांते च· द्रुह द्रोग्धा द्रोढा मित्रध्रुक् मित्रध्रुट्। मुह मोग्धा मोढा उन्मुक् उन्मुट्। ष्णुह स्नोग्धा स्नोढा स्नु
क् स्नुट्। ष्णिह स्नेग्धा स्नेढा स्निक् स्निट्· द्रुहेर्दादित्वान्नित्यं प्राप्तमितरेषामप्राप्तं घत्वं विकल्प्यते·॥ ॥नहो धः॥ ॥नहो हकारस्य
धकारादेशो भवति झलि परतः पदांते च· ढत्वस्यापवादः· नद्धा नद्धुं नद्धव्यं उपानत् परीणत् १८ ॥ ॥छ॥ ॥छ॥ ॥

तोरपि संभवः। तस्माद्धातुग्रहणमावश्यकं नीयां। तत्रैकमतिरिक्तमानमुपदेशकालं लक्षयतीति तथा चेति पूर्वत्र तु पक्षे उपदेशिवद्भावेन दामलिडि
त्यत्रापि प्रसंगः॥ ॥वाद्रुह॥ ॥द्रुहादयः एते दिवादिषु पठ्यन्ते तेन वक्रमेणापठ्यन्ते रधादिभ्यश्चेति कल्पितेटः तत्र वा द्रुहादीनामिति विकल्पे प्रतिपद्य
टोपद्रुः अपि पच्या स्यात्। द्रोधुक् द्रोधुट्। अन्यथा निर्दिष्टपठनेन चेति न स्यात्॥ ॥नहो धः॥ ॥यदीणादिति संपदादित्वात् क्विप्। नहिवृती ति दी
र्घत्वं उपसर्गादसमासेपीति णत्वं। प्रक्रियालाघवार्थं दकार एव विधातव्ये धकारविधानं झषन्तयोर्धोऽधः इति धत्वं यथा स्यात् नदुमित्यत्र दाम्यां
निष्ठानत्वं च माभूदिति १८ ॥

आहस्थः॥ ॥ अथग्रहणतो घकार एव कस्मान्न विधीयते तस्यापि हि जश्त्वेन भवितव्यं एवं च हृत्वा नदाहोर्घ इत्येक एव योगः कर्त्तव्य इति अत आह
आदेशांतरकरणमिति एवमपि तकार एव कर्त्तव्यः हृग्रहोर्भ इति हकारस्येति वक्तव्यं हल्यर्थमिति आभमिति उदियह इत्यत्र छंदसि निपूर्वादपीष्यते
सुगुयमननिपातनयोरिति वचनाद्धावज्ज॥ ॥ व्रश्च॥ ॥ अत्र शकारांतस्य जश्त्वे प्राप्ते रतोर्षात्कुत्वे च तदपवादः षत्वं विधीयते झल

आहः स्थः॥ ॥ आहो हकारस्य थकारादेशो भवति झलि परतः इदमात्थ किमात्थ आदेशांतरकरणं झषस्तथोर्धोधः
स्य सिद्धवन्नित्यर्थं। हृग्रहोर्भश्छन्दसि हकारस्येति वक्तव्यं। गर्दभेन संभरति। अभीता जभ्रिरे। उद्ग्राभं च निग्राभं च ब्रह्म दे
वा अवीवृधन्॥ ॥ व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः॥ ॥ व्रश्च भ्रस्ज· सृज· मृज· यज· राज·
भ्राज इत्येतेषां छकारांतानां शकारांतानां च षकारादेशो भवति झलि परतः पदांते च। व्रश्च व्रष्टा व्रष्टुं व्रष्टव्यं मूलवृ
ट्· भ्रस्ज· भ्रष्टा भ्रष्टुं भ्रष्टव्यं धानाभृट्· सृज· स्रष्टा स्रष्टुं स्रष्टव्यं रज्जुसृट्· मृज· मार्ष्टा मार्ष्टुं मार्ष्टव्यं कंसपरिमृट्· य
ष्टा यष्टुं यष्टव्यं उपयट्· राज· स्वाराट् सम्राट् विराट् विभ्राट्· राजभ्राजोः पदांतार्थं ग्रहणं झलादिराभ्यामिति पर्यवपद्यते· केचित्तु ए
च्छिः प्राच्छिरिति क्विन्नंतं सिद्धं ति। छकारांतानां प्रष्टा प्रष्टुं प्रष्टव्यं शब्दप्राट्· छ्वोः शूडनुनासिके च इत्यत्र छ्वोः इत्यनुवर्त्तते इति छ
ग्रहणमिह क्रियते· शकारांतानां· लिश लेष्टा लेष्टुं लेष्टव्यं लिट्· विश वेष्टा वेष्टुं वेष्टव्यं विट्॥

हृद्यानाल ङितियङ्किस्यादिना संप्रसारणं स्कोः संयोगाद्योरिति सलोपः। षकारस्य जश्त्वं डकारः। वावसान इति पक्षे टकारः। झलादिराभ्यामित्यादि प
र्यवपद्यतेत्व वधीयते। राष्टिः प्राष्टिरिति गुरोश्च हल इत्यकारे प्राप्ते क्तिन्नाबादिभ्य इति क्तिन्प्रत्ययः। तितुत्रेत्यादिनेट्प्रतिषेधः। शब्दप्राडिति क्विब्वचीत्या
दिना क्विप्दीर्घत्वं संप्रसारणाभावश्च छग्रहणमनर्थकं छ्वोः शूडित्यादिना छस्य शत्वे कृते शांतानामित्येव षत्वं सिद्धमत आह छ्वोः शूडित्यादि॥ ॥

।एकाचो॥ ॥धातोरितिपदमिहानुवर्त्ततेतच्चाधिकरणमवयवषष्ठ्यंतमेकाचस्तस्यविशेषणं झषंतस्येत्येतदपितस्यैवसमानाधिकरणंविशेषणं एवंविशिष्टं तेकाचइत्येतदवयवषष्ठ्यंतंबशोविशेषणंतदाहधातोरवयवइत्यादिझलिसकारइतिएतेनानुवर्त्तमानस्यझलोविशेषणंसकारइति दर्शयतिकिमर्थंपुनरिहझलीत्यनुवर्त्ततेअंतइत्यस्यानुवृत्तिर्यथास्यात्तस्याझलीत्यस्यनिवृत्तौतत्संबद्धमंतइत्यपिनिवर्त्तेत।ननुचत्वारोभ षआदेशाःस्थानिनस्तुबशस्त्रयःउकारस्यतुनकश्चिदपिसंभवतोस्तिकथंचन।ततश्चवैषम्यात्संख्यातानुदेशोनप्राप्नोतितत्राहचत्वारोबशः

।एकाचोबशोभष्झषंतस्यस्ध्वोः॥ ॥धातोरवयवोयएकाच्झषंतस्तदवयवस्यबशःस्थानेभषआदेशोभवतिझलिस कारेध्वशब्देचपरतःपदांतेच।अत्रचत्वारोबशःस्थानिनःभषादेशाश्चत्वारएवतत्रसंख्यातानुदेशोप्राप्तेरकारस्यस्थानिनोऽभा वातदकारादेशोनभवति।बुधःभौत्स्यतेअभुध्वं।अर्थभुत्। गुहः निघोक्ष्यतेअघुक्षतपर्णघुत्। दुहः धोक्ष्यतेअधुध्वंगोधुक्।अजर्घाः गर्धेर्यङ्लुगंताल्लुङिसिपिजश्त्वपधगुणोकृतेसिपोहल्ङ्याब्भ्यइतिलोपेचधातोरवयवस्यैकाचोबशःस्थानेभषभावः ततोधका रस्यजश्त्वंदश्चेतिरुत्वंरोरीतिपूर्वरेफस्यलोपःढ्रलोपेपूर्वस्यदीर्घोणइतिदीर्घत्वं।गर्द्दभयतेःप्रत्ययःगर्द्दप्।एकाचः किंदामलि हमिच्छतिदामभिच्छतिदामलिह्यतेःप्रत्ययःदामलिट्। अप्रत्येकाच्ग्रहणेधातोरित्येतदेवबशोविशेषणंस्यात्। बशइति किं क्रुधक्रोत्स्यति। झषंतस्येतिकिं दास्यति। स्ध्वोरितिकिं बोद्धा बोद्धुं बोद्धव्यं। धकारस्यचकारोपश्लिष्टस्यग्रहणंकिंदादद्धिदधधार
णाइत्यस्यपद्धुःकिलोपिद्धुःत्वाट्धैरितिधिभावेस्यैतद्भवति १९

स्थानिनइत्यादि।शास्त्रेप्रतीतिवेलायांसंख्यासाम्यस्यासंभवात्।प्रवर्त्ततेयथासंख्यमनुष्ठानेतुसंभवइत्यर्थः।क्वचित्तुनायंग्रंथःपठ्यतेभो त्स्यंतइति।बुधिरनुदात्तेत्।लृट्स्यः।तत्रअपदेशिवद्भावेनधातुप्रत्येकाचोवयवत्वं।अभुध्वमितिधिचेतिसिचोलोपः।गुहिदुहीस्वरितेतौ। अजर्घाइति।गर्द्धेर्यङ्लुकिद्विर्वचनेरुग्रिकोयलुकीतिरुक्।जर्गृधइतिस्थितेलङादि।गर्द्दभयतेरिति।गर्द्दभमाचष्टइतिणिचुअग्रावाप्रत्ययोःप्रत्य यः।क्विबादिः।अप्रत्येकाच्ग्रहणइत्यादि।यद्येकाच्ग्रहणंनक्रियेततर्हिमस्मिहापिस्यात्तस्माद्धशिवधातोरित्यनेनविशेष्यतबशोझषंतत्वस्यासंभवा दझषंतस्येत्यनेनापिधातुरेवविशेष्येततश्चायमर्थःस्यात्झषंतस्यधातोर्योवयवोबशस्तस्यभषितितितोदामलिडित्यत्रापिप्रसंगः।एकाचइ

त्यस्मिंस्तुसतिहमिकारोपदर्शितस्याधोभवतीतिनतत्रप्रसंगः।अ त्रहियोझषंतएकाचलिडितिनतस्यावयवोबशइत्कारःयस्यचावयवो दामित्यस्यनसझषंतःक्रोत्स्यतीत्यत्रककारस्यबकारोनभवति १८॥

५९

दधः ॥ ॥ दधातिर्निर्दिश्यत इति दधधारणे दधस्य ग्रहणं न भवति शपा तथोर्व्यवायात् । ननु यङ्लुकि च व्यवायो नास्तीति तत्र अत एव ग्रहणप्रसंगः एवं च
वचनसामर्थ्यादिति वक्ष्यमाणं नाश्रयितव्यं भवतीति तस्माद्व्याख्यानमेवात्र शरणं । वचनसामर्थ्यादिति न दधातेराकारलोपेन विना झषन्तो भवति एत
त्पूर्वत्रासिद्धेन स्थानिवद्भावस्य नाश्रितत्वात् । अभ्यासजश्त्वस्यापूर्वासिद्धत्वमिति वचनसामर्थ्यान्न भवतीत्यपेक्षयेन ह्यभ्यासस्य जश्त्वेन विना दधा
तेर्वशाघ्रिश्चिन्त्यं भवति तथोरिति किमिति स्थली तिरतेनेषवंतस्येति च न तकारस्य थकाराभ्यामनन्तरत्वात् धोः स्थलस्य तोन्तावदृष्टमेव तस्मात्तथोरिति न च

दधस्तथोश्च ॥ ॥ दध इति कृतद्विर्वचनो दधातिर्निर्दिश्यते तेन तस्य झषन्तस्य बशः स्थाने भषादेशो भवति तकारथका
रयोः स्ध्वोः च परतः धत्तः धत्थः धत्से धत्स्व धध्वे धध्वं वचनसामर्थ्यादातो लोपस्य स्थानिवद्भावो न भवति अभ्यासजश्त्वस्य चा
सिद्धत्वं तथोरिति किं आनन्तर्यात्स्ध्वोरेव विज्ञायेत चशब्दः स्स्वयोरनुकर्षणार्थः झषन्तस्येत्येव दधाति दधामि ॥ ॥ झलां जश् झशीति
॥ ॥ श्री ४ ॥ ॥ श्री ४ ॥ ॥ श्री ४ ॥ ॥ श्री ४ ॥ ॥ श्री ४ ॥ ॥ श्री ४ ॥ ॥ ६ ॥ ॥
॥ ॥ ६ ॥ ॥ श्री ४ ॥ ॥ श्री ४ ॥ ॥ श्री ४ ॥

कथं एवं च कृत्वा चकारो ऽपि न कर्तव्यः सर्वत्र स्थलीत्येव सिद्धमिति पृष्टः आनन्तर्यादिति । ननु च स्ध्वोः पूर्वेणैव सिद्धं न सिध्यति आल्लोपस्य
स्थानिवद्भावे सति अझषन्तत्वात् । ननु च पूर्वत्रासिद्धेनास्ति स्थानिवद्भावः एवमप्यभ्यासजश्त्वस्यासिद्धत्वान्न सिध्यति यदि तर्ह्यभ्यासजश्त्वचर्त्वे
मेलतु को ऽसिद्धं वचनमपि प्रत्ययलक्षणेनानुकरिष्यपनीयाविशेषेणासिद्धत्वमुच्यते न फलिभजिग्रहणं वा सामान्येन ज्ञापकमाश्रीयेत न लेलविषयमेवन
तस्तथोश्चेति शक्यमकर्तुं कथं स्ध्वोः पूर्वेणैव सिद्धं दन्तुत्यातिरिक्ते स्थलिपथास्यादिसेवमर्थं भविष्यति ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥

॥झलांजशोऽन्ते॥ ॥पदांतेवर्त्तमानानामितिपदावसानेवर्त्तमानानांअंतशब्दोवसानवचनोनत्ववयववचनः अलिड्लिस्त्रहकारस्यजश्त्वेप्रा
प्तेतस्यासिद्धत्वात्पूर्वंढत्वेढकारस्यजश्त्वेडकारः॥ ॥झषः॥ ॥दधातिवर्ज्जयित्वेति॥ अनेनाधइतिधातुप्रतिषेधंदर्शयतिधह्णिधकारप्रतिषेधः
स्यातधकारएसरयोर्नेतिततोगनिबुद्धास्यादयोनिर्द्दिशानोपयधेरत॥ अलब्धअलब्धाइतिलुङि·तथासो॥ एवमलीढअलीढाइति॥ धत्रः ध

झलांजशआदेशोभवंतिपदस्यांतेवर्त्तमानानां·वाग्यत्रशवलिड्ध·अमिचिदत्रत्रिष्टुवत्र·अंतग्रहणांझलीत्येतस्यनि
वृत्त्यर्थवस्तावत्तमं॥ ॥झषस्तथोर्धोऽधः॥ ॥झषांतडोंते॥ ॥झषउत्तरयोस्तकारथकारयोः स्थानेधकारआदेशोभव
तिदधातिंवर्जयित्वा· लभलब्धालब्धुंलब्धव्यंअलब्धअलब्धा॥ दुहदोग्धादोग्धुंदोग्धव्यंअदुग्धअदुग्धाः॥ लिहलेढालेढुं
लेढव्यंअलीढअलीढाः॥ बुधबोद्धाबोद्धुंबोद्धव्यंअबुद्धअबुद्धाः अधइतिकिंधत्तः धत्थः॥ ॥षढोः कः सि॥ ॥
षकारढकारयोः ककारादेशोभवतिसकारेपरतः षकारस्यतावत् पिषूपेक्ष्यतिअपेक्षत·पिपिक्षतिः ढकारस्य·लिहले
क्ष्यतिअलेक्ष्यतिअलेक्षत॥ लिलिक्षतिः सीतिकिंपिनष्टिलेढि १० ॥ ॥छ छ॥ ॥छ॥ ॥छ छ॥ ॥

स्यादितिधत्वेप्रतिषिद्धेधकारस्यचर्त्वंअध इतिशक्यमवक्तुंइहकस्मान्नभवतिधत्तोधत्थइतिजश्त्वेयोगविभागःकरिष्यतेदधस्तथोश्चझलां ग·म·
जशः झलांजशोभवंतिदधस्तथोः ततोऽन्तेचझलांजशोभवंतितत्रपूर्वत्रासिद्धमितिधत्तोधत्थइतिजश्त्वेयोगविभागःकरिष्यतेदध ५०
स्तथोश्चझलांजशः झलांजशोभवंतिदधस्तथोः ततोऽन्तेवझलांजशोभवंतितत्रपूर्वत्रासिद्धमितिभषभावेजश्त्वस्यासिद्धत्वाद्दस्तथे
ततंधचेपरस्मिन्नसिद्धंजश्त्वमितिसप्रषंतत्वाद्धत्वाभावइतिसिद्धमिष्टं १०

रदाभ्यां ॥ निष्ठातइतिसमासनिर्देशः तत्रप्रधानम् तत्तकारो रदाभ्यामित्यनेनविशेष्यतेनगुणभूता निष्ठेत्याह रेफदकाराभ्यामुत्तरस्येति। तेनचोक्तंमु
दितमित्यत्रनिष्ठायाः अव्यवधानेपितस्येटाव्यवहितत्वान्नत्वंनभवति। अवगुरणमितिगुरीउद्यमनइतीदितोनिष्ठायामिति नीट्प्रतिषेधः पूर्वेषुसूत्रकृ
कीतीति। भिन्नमित्यादेशेनरस्यकामउच्चारणार्थः तेनदकारस्याप्यानेपुद्धोनकारोभवति। कृतः कृतः कृतवानिति। ननुपथापनयोरोलरस्यदकारस्यस्था
पिरेफस्यलकारोभवतितथेहापिऋकारस्थरेफमात्रस्यनत्वंप्राप्नोतितत्राह रस्येति। उक्तं तत्रसामान्योपादानादिहतुनसामान्यमुपादीयते किं
तर्हिव्यंजनं किमात्मकं ऋकारस्यतुमात्राचतुर्भागात्मकः अस्तुवासामान्यनिर्देशस्तथापिनदोषइत्याह सामान्यनिर्देशेवातेऋकारेऽपिनतोऽभ

॥ रदाभ्यांनिष्ठातोनः पूर्वस्यचदः॥ ॥ रेफदकाराभ्यामुत्तरस्यनिष्ठातकारस्यनकारस्यनकारआदेशोभवतिपूर्वस्यचदका
रस्य· आस्तीर्णं विस्तीर्णं विकीर्णं निगीर्णं निगीर्णं अवगूर्णं· दकारात् भिन्नः· भिन्नवान् छिन्नः· छिन्नवान्· रदाभ्यामिति किं
कृतः· कृतवान्· ऋदृस्यत्रश्रुतिसामान्यंनोपादीयते किं तर्हि व्यंजनाम अर्धमात्रात्मकं· सामान्यनिर्देशे वा सति रेफात् परायाऽर्धभक्ति
स्तद्व्यवधानान्नत्वंनभवति· निष्ठाग्रहणं किं कर्ताहर्ता· तइतिकिं चरितंमुदितं· पूर्वस्येतिकिं परस्यमाभूत्· भिन्नवद्भ्यांभिन्नव
द्भिः। इहकृतस्यापत्यंकार्त्तिरितिवृद्धेर्बहिरंगलक्षणत्वादेकदेशेरेकस्यासिद्धत्वान्नत्वंनभवति॥ ॥८ ६१॥ ॥

क्तिर्मध्यरेफस्य भक्तिस्तत्रश्चयरपाऽन्यस्याव्यवधानान्नास्तिनत्वप्रसंगः चरितंमुदितमितितइत्यनुच्यमानेइटोनिष्ठाभक्तत्वात्तस्यनत्वप्रसं
गः परस्यमाभूदितिपरस्येवमाभूदित्यर्थः असतिपूर्वग्रहणेपाठक्रमेनिष्ठाप्रत्ययस्येतितइकारस्यैवनत्वेनभाव्यंतेनैतदपिनचोदनीयंब
हिरंगत्वात्कार्त्तिकत्वाच्चनभविष्यतीतिकिंचपदस्येत्यधिकारात्ससदावस्थायांनत्वविधानाद्बहिरंगत्वमपिनास्तिकेवलस्यगणस्यानुपदेशात्त
निपदोक्तत्वमपिनास्तिअथापिप्रत्यासत्तिनपिस्यतेतथापिपंचमीनिर्देशात्परस्येवप्रसंगः कार्त्तिरित्यत्रबहिर्भवततद्धितायेत्यत्वाद्बहिरंगात्वृ
द्धिः वृद्धेश्चापन्निमित्तं तदेवरेफस्याप्युरणरपरइत्यस्यहद्विविधिनेत्वासिद्धत्वात्॥ ॥

संयोगादेः॥ ॥प्रद्राण इति कस्य च इति गालं निर्यात इति यो त्र धातुर्नासौ संयोगादिर्यश्च संयोगादिर्न सो धातुः न चात्र संयोगादित्वस्य बहि
रंगत्वात्कथं पूर्वं धातुरूपमेगीणयुज्यते ततश्च निष्ठोसत्त्वे प्रागेव संयोगः संनिहितः प्रद्राणइत्यादावप्येतावदेव॥ ॥ल्वादिभ्यः॥ ॥जीन
इति आवयोर्हानो ग्रहिज्यादिना संप्रसारणं निष्ठावदिति नत्वसंनिधेर्वचनान्तरं देवातिदिश्यते ते न पूनिरित्यत्र क्लिशः क्त्वानिष्ठयोः ७.२.श्वेती

संयोगादेरातोधातोर्यण्वतः॥ ॥संयोगादिर्योधातुराकारान्तोयण्वान् तस्मादुत्तरस्य निष्ठातकारस्य नकार आदेशो भवति॰
प्रद्राणः प्रद्राणवान्॰ ग्लानः ग्लानवान्॰ संयोगादेरिति॥ केयातः यातवान्॰ आत इति किं च्युतः च्युतवान्॰ धातोरिति किं निर्या
तः निर्यातवान्॰ निर्वातः निर्वातवान्॰ यण्वत इति किं स्नातः स्नातवान्॥ ॥ल्वादिभ्यः॥ ॥लूञ् छेदने इत्यतः प्रभृति वृच्
रणाइति यावद्वल्करणानपरं समापितत्वात्दीर्घो इत्येतेभ्य उत्तरस्य निष्ठातकारस्य नकार आदेशो भवति॥ लूनः लूनवान्॰ धूनः
धूनवान्॰ जीनवान्॰ ऋकारल्वादिभ्यः क्तिन्निष्ठावद्भवतीति वक्तव्यं॰ कीर्णिः गीर्णिः लूनिः पूनिः धूनिः दुग्वोर्दीर्घश्चेति व
क्तव्यं प्रनायवाः विनाश इति किं प्रतायवाः प्रतंधाम्॥ सिनोतेर्ग्रासकर्मकर्तृकस्येति वक्तव्यं॥ सिनो ग्रासः स्वयमेव॰ ग्रासक
र्मकर्तृकस्येति किं सिता याशेन सूकरी॥ ग्रामो पिच्छे यदा कर्मैव भवति न कर्मकर्त्रीत दापि न भवति सितो ग्रामो देवदत्तेन २१

द्विकत्वेन भवति॥ दुग्वोरिति दुद्गुगतावित्यस्यैव दीर्घग्रहणं न टुदु उपतापे इत्यस्य सानुबंधकत्वात्॥ तथा भाष्ये प्रयुक्तं मद्रुतया द्रुतयेति॥ ग
पुरीषोत्सर्गे॥ पूनाइति अनेकार्थत्वाद्धातूनां पूजनत्र विनाशार्थः॥ सिनो ग्राम इति षिञ् बंधने बध्यमानः पिंडीक्रियमाणो ग्रामो यदा दृश्य
दिव्यंजनवशेन तत्रानुकूल्यं प्रतिपद्यते तदा कर्मणः कर्तृत्वविवक्षायामयं प्रयोगः॥ सिता याशेन सुकेकर्मणि क्तः॥ समुदायप्रसुदाहर
णामेतत् इदानीमवयवप्रसुदाहरणं दर्शयति ग्रामोपीति २१ राम॰
५१

ओदितश्च ॥ ॥ आपीन इति। प्यायः पीतिपीभावः। स्वादयः षूङ् प्राणिप्रसवे इत्यारभ्य ओगाद् वृणोत्यर्थ इत्येवमन्ता दिवादौ पठ्यन्ते॥ ॥ क्षियो॥ ॥
क्षि क्षये इति विषमगमोः क्षयोरर्थ इति ग्रहणम्। क्षीण इति अकर्मकत्वात् कर्तरि क्तः। निष्ठायामण्यदर्थे इति दीर्घः। क्षीणस्तपस्वीति अत्रापि वाक्रो
शदैन्ययोरिति। दीर्घादिति किं शक्यमकर्तुं क्षियः इति निर्देशादेव दीर्घस्य ग्रहणं विज्ञायते ह्रस्वस्य हि ग्रहणे इयङादेशासत्त्वात् ह्रस्वे क्षेरिति निर्दिशेत्
कृते क्षेरिति निर्देशः स्यादित्येतत्राह ह्रस्वान्तस्यापीति यथाभूतस्य दीर्घत्वं विधेयं तथाभूतमेवानुकर्तुं युक्तं ह्रस्वान्तस्य च दीर्घत्वं विधेय
मिति तत एव दीर्घविधौ च ह्रस्व· कारणं तत्रापि चेयङादेशो दृष्टः तस्मादियङादेशेन दीर्घग्रहणे प्रमाणमित्यर्थः। यदि तर्हि ह्रस्वान्तस्यापि धात्व

ओदितश्च ॥ ॥ ओकारेतश्च धातोरुत्तरस्य निष्ठातकारस्य नकारादेशो भवति· ओलस्जी लग्नः लग्नवान्· ओविजी उद्वि
ग्नः उद्विग्नवान्· ओप्यायी· आपीनः आपीनवान्· स्वादय ओदितः षूङ् प्राणिप्रसवे सूनः सूनवान्· दूङ् दूनः दूनवान्· दीङ्
दीनः दीनवान्· डीङ् डीनः डीनवान्· धीङ् धीनः धीनवान्· मीङ् मीनः मीनवान्· रीङ् रीणः रीणवान्· व्रीङ् व्रीणः व्रीणवा
न्·॥ ॥ क्षियो दीर्घात्॥ ॥ क्षियो धातोर्दीर्घादुत्तरस्य निष्ठातकारस्य नकारादेशो भवति· क्षीणाः क्लेशाः क्षीणो जाल्मः क्षीण
स्तपस्वी· क्षियः निष्ठायामण्यदर्थे वाक्रोशदैन्ययोरिति दीर्घत्वं· दीर्घादिति किं आक्षितमस्मिमामेक्षेष्टाः अक्षितमिति भावे क्तप्रत्य
यः भावकर्मणोरण्यदर्थ इति दीर्घाभावः ह्रस्वान्तस्यापि हि धात्वनुकरणे दृष्टः इयङ् निर्देशः क्षियो निष्ठायामण्यदर्थे इत्यत्र· दीर्घग्रहणमतः
क्रियते· विपराभ्यां जेरित्येवमादौ तु धातुत्वमनुकार्यगतं सदप्यविवक्षितत्वान्नोपमामासानुकरणं द्रष्टव्यम्॥ ॥

नुकरणस्येयङादेशो भवति विपराभ्यां जेरित्यादावपि प्रसंग इत्यत आह विपराभ्यां जेरित्येवमादौ त्विति। अविवक्षितत्वेति पाठः तत्र हि धातावनुकार्ये·
वस्थितं धातुत्वं क्रियावाचित्वलक्षणमविवक्षितत्वात् अविवक्षणमकृत्वा रूपमात्रमस्य विवर्जितं कूजितमित्यादिसो धारणस्य रूपस्यानुकरणं ततश्च
विशेषनिबंधनस्य कार्यस्य मामामोः भावात् सह कृता वदृष्टत्वादनुकरणेऽप्यभाव इत्यर्थः· यदा तु विशेषो नु क्रियते तदा तन्निबंधनं कार्यमनुकरणे प्रव
र्तते यथात्रेयङादेशः। यद्येवं विभक्त्युत्पत्तिर्न प्राप्नोति अधातुरिति प्रतिषेधेन प्रातिपदिकसंज्ञाया अभावात् नैष दोषः अधातुरिति पर्युदासोऽयं
न प्रसज्यप्रतिषेधः ततः किं आतिदेशिकस्य कस्य चित् कार्यस्याभावात् धातोरन्यत्वात् स्यादेव प्रातिपदिकसंज्ञा प्रवर्तते इयङादेशस्तु आतिदेशिको धा

गुणोऽस्पर्शे॥ ॥शीनं इमिति। श्येङ् गतौ द्रवमूर्त्तिस्पर्शयोः श्य इति संप्रसारणं गुणाभूतोपि स्पर्श इति एतत्र व्याख्यानाल्लभ्यते। स्पर्शशब्दोपमस्ति गुणवचनः स्पृशतं स्पर्शभावे कर्मणि वा घञ् स्पर्शयोः श्य इति संप्रसारणं गुणाभूतोपि स्पर्श इति एतत्र व्याख्यानाल्लभ्यते। स्पर्शशब्दोपमस्ति गुणवचनः स्पृश संस्पर्शे भावे कर्मणि वा घञ् स्पर्शस्त्वगिंद्रियग्राह्यो गुणः अस्ति रोगवचनः स्पृश उपतापे घञ् स्पर्शः तदिह विशेषानुपादानाद्द्वयोरपि ग्रहणे तत्र रोगे पि प्रतिषेधात् प्रतिशीन इति न सिध्येत् अत आह गुणे चेति गुण एवेत्यर्थः। एवं मन्यते पदद्वयं द्रवमूर्त्तिस्पर्शयोः श्य इति स्पर्शे संप्रसारणं विधाय पुनः प्रत्येक

द्वयोः स्पर्शे श्यायतेरुत्तरस्य निष्ठातकारस्य अस्पर्शे अर्थे नकारस्य आदेशो भवति। शीनं घृतं शीनं मेदः शीना वसा। अस्पर्श इति किं शीतं वर्त्तते। शीतो वायुः शीतमुदकमित्यत्र गुणाभूतोपि स्पर्शे नत्वप्रतिषेधस्य संप्रसारणस्य च निमित्तं भवति। गुणे च स्पर्शे प्रतिषेधोयं न रोगे तेन प्रतिशीन इत्यत्र नत्वं भवत्येव॥ ॥अंचोनपादाने॥ ॥अंचतेरुत्तरस्य निष्ठातकारस्य नकारस्य आदेशो भवति न चेदपादानं तत्र भवति। समक्नौ शकुनेः पादौ तस्मात् सशवो न्यक्नाः अनपादान इति किं उदक्तमुदकं कूपात्। व्यक्तमित्येतत्तु अंजेरूपं २२ ॥

स्याहतन्नतापयतिश्यायते र्ग्रहणेस्स्पर्शशब्दो रोगं न प्रत्याययतीति यदि प्रत्याययेत पुनर्निर्दिश्यात पूर्वेणैव सिद्धत्वात् प्रतिशब्दे रोग एव श्यायतिर्वि र्त्तते॥ ॥अंचोनपादने॥ ॥न चेदपादानं तत्र भवतीति तत्रांचत्यर्थे विषये अपादानं चेन्न भवतीत्यर्थः। समक्नौ विनिसंगतावित्यर्थः। यस्य विभाषेतीट्प्रतिषेधः अनिदितामिति उपधालोपः उदक्तमिति उद्धृतमित्यर्थः। व्यक्तमित्येतदिति अंजू व्यक्तिम्रक्षणकांतिगतिष्वित्यस्येदं रूपं नांचतेः तेन नत्वमिदं न भवतीति भावः २२ ॥

दिवोविजिगीषायां॥ ॥आघ्नइतिघ्नोः ऋतुः आघ्नइसोटरिकः परिघ्नः क्षीणः घृतं वर्न्तेइतिनन्वत्राक्षयातनल स्याणाक्रीडाप्रतीयतेनविजि
गीषाअतआहविजिगीषयाहीति॥ ॥निर्वाणः॥ ॥वाताधिकरणाइतिवातकर्तृकइसर्थः॥ यदिवातश्चेदभिधेयोनभवतीसर्थः स्यान्तदानि
र्वातोवातइसत्रैवप्रतिषेधः स्याद्यत्रकर्त्तारिक्तः यत्रतुभावेतत्रनस्यात् निर्वातंवातेनेतिनिर्वाणोग्निरितिउपशान्तइसर्थः निर्वाणोभिक्षुरितिउप

दिवोऽविजिगीषायां॥ ॥दिवउत्तरस्यनिष्ठातकारस्यनकारआदेशोभवतिअविजिगीषायामर्थे॰ आद्यूनः परिद्यूनः अविजि
गीषायामितिकिं द्यूतंवर्त्तते॰ विजिगीषयाहितत्राद्यूयातननादिक्रियते॥ ॥निर्वाणोऽवाते॥ ॥निर्वाणइतिस्वर्वाद्वातेरुत्तरस्यनि
ष्ठातकारस्यनकारोनिपात्यतेनचेद्वाताधिकरणोवातसर्थोभवति॰ निर्वाणोग्निः निर्वाणः प्रदीपः निर्वाणोभिक्षुः अवातइतिकिं नि
र्वातोवातः निर्वानवातेन॰ निर्वाणः प्रदीपोवातेनेतिप्रदीपाधिकरणोवात्यर्थोवातस्तुतस्यकारणमितिभवसेवनत्वं॥ ॥शुषःकः
॥ शुषेर्धातोरुत्तरस्यनिष्ठातकारस्यककारआदेशोभवति शुष्कः शुष्कवान्॥ ॥पचोवः॥ ॥पचेर्धातोरुत्तरस्यनिष्ठातकारस्य
वकारआदेशोभवति॰ पक्वः पक्ववान्॥ ॥क्षायोमः॥ ॥क्षैइसेतस्माद्धातोरुत्तरस्यनिष्ठातकारस्यमकारादेशोभवति॰ क्षामः
क्षामवान्॥ ॥प्रस्त्योऽन्यतरस्यां॥ ॥प्रपूर्वात्स्त्यायतेरुत्तरस्यनिष्ठातकारस्यमकारादेशोभवत्यन्यतरस्यां॰ प्रस्तीमः प्रस्तीम
वान्॰ प्रस्तीतः प्रस्तीतवान्॰ घ्रः आमत्वंनभवतितदासंयोगादेरातोधातोर्यण्वतइसस्यपूर्वत्रासिद्धत्वात्संप्रसारणंप्रथमंक्रियतेतत्र
रूतेतिमित्रत्वाद्वातान्नत्वंनभवति॥ ॥अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः॥ ॥फुल्लक्षीबकृशउल्लाघइत्येतेनिपात्यंतेनचे
दुपसर्गादुत्तरेभवति॰ ॥ ॥श्री३॥ ॥

रतइसर्थः वातस्तुकरणमिति। यथासंभवंकरणत्वंहेतोवात्सतीयाद्रष्टव्या। यथानुवार्त्तिकंतथाभावेप्रतिषेधोनभवतिनिर्वाणंवातेनेसेव
भवति॥ ॥प्रस्त्यो॥ ॥प्रस्तीमइतिस्त्यः प्रपूर्वस्येतिसंप्रसारणं॥ ॥अनुपसर्गात्॥ ॥फुल्लसि॥ ॥६९ ६९॥ ॥ ॥

॥फुल्ल इति आदितश्चेतीट्प्रतिषेधः उत्तरस्मान्नेति चेत् सुलाक्तवत्वं तस्याप्येतल्लत्वमिष्यत इति निष्ठायां लशब्दान्तं यद्रूपं तस्य फुल्ल इत्येतन्निपात्यत
इति भावः। क्षीबादिषु तु नैतदिष्यते इडभाव इति अनन्तरं लोपस्यासिद्धत्वाद्धलादित्वादिट्प्रसज्येत क्तवतौ वा इति इच्छन्ति लोपः इति निपात्यत इत्यपेक्षते
लाघेस्तु द इत्यस्य इति उदस्तु प्रतिषेधो न भवतीति निर्देशसामर्थ्यात् कृशिं प्रत्युपसर्गत्वेतियत्क्रियायुक्ताः प्रादय इत्यस्मितीति वचनात्तत्क्रियातस्योगमेवद
र्शयति परिगतः कृश इति कार्यमन्वयरिणतः इत्यर्थः। यद्यपि फुल्लादयः पचाद्यचि इगुपधलक्षणे के च सिध्यन्ति तथापि निष्ठा च धजनादित्वाद्विका
र्यसिद्ध्यै क्षीबितादिनिष्ठा शब्दनिवृत्त्यये च निपातनं फुल्लशब्दे तु फुल्लवानित्येतदर्थं च॥ ॥नुदविदा॥ ॥अत्रानन्तरस्य निपातनस्य विधानमु
क्तत्वादुपहितं विधेयमिति स्थिते श्रुषः करस्मादिभिरादेशान्तरे च विहितमपि नत्वमेव विधीयते। कथं च तरस्त्रेतावन्नदेव प्रतिषिध्यते प्राप्ति

फुल्ल इति। ञिफला विशरणे इत्येतस्मात् क्तो क्तवतोः निष्ठातकारस्य लकारादेशो निपात्यते। इत्वमिडभावश्च सिद्ध एव। क्तवत्वं
तस्याप्येतल्लत्वमिष्यते फुल्लवानिति। क्षीबकृशोल्लाघा इति क्षीबृ कृश लाघृ इत्येभ्य उत्पूर्वाच्च लाघेः क्तप्रत्ययस्य तकारलोप इडभाव
श्च निपात्यते क्तवतौ वा इति इच्छन्ति लोपः। क्षीबः। कृशः। उल्लाघः। अनुपसर्गादिति किम्। प्रफुल्लताः सुमनसः। प्रक्षीबितः। प्रकृशितः। प्रो =
ल्लाघितः। लाघेरुदो न उपसर्गः प्रतिषिध्यते। उत्फुल्लसंफुल्लयोरुपसंख्यानं कर्तव्यम्। उत्फुल्लः। संफुल्लः। परिकृश इत्यत्र तु परि ३
शब्दः संक्रियां न त योगा कृशिं प्रत्यनुपसर्गत्वं। परिगतः कृशः परिकृश इति॥ ॥नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम्॥ ॥नुदवि ८
द उन्द त्रा घ्रा ह्री इत्येतेभ्य उत्तरस्य निष्ठातकारस्यान्यतरस्यां नकारादेशो भवति नुदः। नुन्नः। नुत्तः। विद। विन्नः। वित्तः। उद। २
समुन्नः। समुत्तः। त्रा। त्राणः। त्रातः। घ्रा। घ्रातः। घ्राणः। ह्री। ह्रीणः। ह्रीतः। ह्री इत्येतस्याप्राप्ते नत्वमितरेषां नित्यं प्राप्ते विकल्प्यते। ५६
विद विचारणे इत्यस्येदं ग्रहणमिष्यते। एवं ह्युक्तं वेत्तेस्तु विदितो निष्ठा विद्यते विन्न इष्यते। विन्ते विन्नश्च वित्तश्च भोगे वित्तश्च वि

र्वकत्वात् प्रतिषेधस्य तस्मान्न देव बुद्धो विपरिवर्तमानमस्य शापि विकल्पते समुन्न इति उदी कोदनेज दित्वादिट्प्रतिषेधः। अनिदितामिति उपधा
लोपः। उभयत्र विभाषेयमित्याह ह्री इत्येतस्येति। विद विचारणे इत्यस्येति। रोधादिकस्य उन्दिना रोधादिकेन साहचर्यात्। यद्यपि तौदादिके न नुदि
नापि साहचर्यं तथापि यः साहचर्यमेव व्यवस्थापकं विप्रतिषेधे परमित्यस्यैव मा तावदस्तु प्रयोगात्। विचारणार्थस्य ग्रहणमित्येतदाप्रागमेन दृष्य
ते एवं ह्युक्तमिति। वेत्तेः इतो निष्ठान्तं शब्दरूपं विदित इति ष्यते तस्य सेट्त्वात् इह च रदाभ्यां निष्ठातः इत्यस्य नुद्द्त्नेः। विद्यते श्चात्र विन्न इति नत्वमेव भवति।
सत्तार्थस्य विदेर्विन्न इतीष्यते तस्यानिट्त्वादिह चत स्याग्रहणात् विंदतेरिति इं। तानुकरणात् षष्ठी भोगवित्त इति एकार्थी भावाभावे पि भाष्यकार निपातनमात्र

मासः भोगग्रहणमुपलक्षणं भोगप्रत्यययोरर्थयोः विद्यते स्तो द्रीहिकस्य विदे
विन्न इतीष्यते अन्यत्र विन्न इति नत्वमेव भवति न त्वयं विकल्प इत्यर्थः उक्तो च है

दतेः २३ ॥
तुः २३ ॥
राम०
५३

न ध्याख्या॥ ॥मूर्त इति। आदितश्चेतीट्प्रतिषेधः। राल्लोप इति छस्य लोपः। मत्त इति। ईदित्वादिट्प्रतिषेधः॥ ॥वित्तो भोग॥ ॥लाभार्थादिति। ज्ञानार्था
द्विदाभामप्यन्ना विचारणार्थयोरपि न भोगप्रत्यययोर्वृत्तिः संभवतीति भावः। कथं पुनर्भोगेति पात्यमानो वित्तशब्दो धने भवतीत्यत आह धनं हीति। कर्मसा
धनः सूत्रे भोगशब्द इत्यर्थः। एतेन प्रत्यय इति व्याख्यातं वित्त इति विभाषा गमहनविदविशामिति नेट्। रादिकस्येक्षसो विकल्पिते ऽल्लाघस्य विभाषेति
निष्ठायामिट्प्रतिषेधः॥ ॥भित्तं॥ ॥शकलपर्याय इति। निपात्य शकलशब्दो जातिशब्दो न क्रियाशब्दस्तथा भित्तशब्दोऽपीत्यर्थः। नन्वयं भिदेर्धा

न ध्याख्यापृमूर्छिमदां ध्याख्यापृमूर्छिमद इत्येतेषां निष्ठातकारस्य नकारादेशो भवति ध्यातः ध्यातवान्· ख्यातः ख्यातवा
न्· पूर्तः पूर्तवान्· मूर्तः मूर्तवान्· मत्तः मत्तवान्॥ ॥वित्तो भोगप्रत्यययोः॥ ॥वित्त इति विदेर्लाभार्थादुत्तरस्य न लाभावो नि
पात्यते भोगे प्रत्यये च· भोगे तावत्· वित्तमस्य बहु धनमस्य बह्वित्यर्थः धनं हि भुज्यत इति भोगोऽभिधीयते· प्रत्यये· वित्तोऽयं मनु
ष्यः प्रतीत इत्यर्थः प्रतीयत इति प्रत्ययः। भोगप्रत्यययोरिति किं चित्तः॥ ॥भित्तं शकलं॥ ॥भित्तमिति निपात्यते शक
ले चेद्भवति· भित्तं तिष्ठति भित्तं पततीति· शकलपर्यायोऽयं· अत्र भिदिक्रियाशब्दमुत्सृज्यैव निमित्तं भिदिक्रियाविवक्षायां
हि शकलविषयेऽपि भिन्नमित्येव भवति॥ ॥श्री ४॥ ॥

तोऽर्थमुत्साघमानः क्रियाशब्दः स कथं जातिशब्दस्य पर्यायो भवत्यत आह अत्रेति। संततिहितेशब्दा येषु भुत्पत्तिमात्रोपयोगिनी क्रिया जाति
रेव तु समुदायशक्या शब्दार्थः यथा तैलं पिबतीति तैलपायिकेति। किमर्थं पुनरेवमाश्रीयत इत्याह भिदिक्रियाविवक्षायां हीति साध्यप्रतिपाद
नार्थे शकलग्रहणं यथा विदारणाविवक्षायां भिन्नं भिन्नमित्येव प्रयोग इत्यर्थः। क्रियाशब्दत्वे तु भिन्नशब्देनैव क्रियापाउपात्तत्वाद्भिन्नमित्ये
वं प्रयोगो न स्यात्। अन्ये त्वाहुः यया विदारणया शकलं निर्वर्तितं तामंगीकरोत्येव भित्तशब्दः यत्र शकलस्यासत्त्वो विदारणं तत्प्रतिपाद
नाय भित्तं भिन्नमिति प्रयोग इति॥ ॥

८का॰ पृ॰२
५४

॥ऋणं॥ ॥ऋ इत्येतस्मात् क्त इति ऋ गतौ ऋ गतिप्रापणयोरिति वा। एतस्माद्देवेति। शौण्डादिव्यतिरेकेण सप्तमीसमासः एवमप्यः प्रागेव सम्पन्नो
त्र्यपद इति भावः। कालान्तरेत्यादि। ऋणग्रहणकाले सया कालान्तरत्वं तत्र देयं कालान्तुरदेयं तत्र यो विनिमयो विपरिवर्त्तनं तदुपलक्षणार्थमाध
मर्णपि ग्रहणं न तु स्वार्थप्रतिपादनार्थं। किं पुनः कारणमेवं व्याख्यायत इत्याह उत्तमर्णे इत्यपि हीति एतच्च धारेरुत्तमर्ण इति निर्देशाद्वसितं॥

ऋणमाधमर्ण्ये॥ ॥ऋणमिति ऋ इत्येतस्माद्धातोः क्तप्रत्ययस्य निष्ठातकारस्य नकारादेशो निपात्यते आधमर्ण्ये विषये। अध
मऋणो अधमऋणो अधमर्ण एतस्मादेव निपातनात् सम्पन्नो त्र्यपदसमासः तस्य भाव आधमर्ण्यं। यद्येवमुत्तमर्णविषये
ऋणमिति न सिध्यति। नैष दोषः कालान्तरदेयविनिमयोपलक्षणार्थमेतदुपात्तमुत्तमर्णेऽपि हि भवति। ऋणं ददाति ऋणं
धारयति। आधमर्ण्य इति किं ऋतं वक्ष्यामि नानृतं॥ ॥नसत्तनिषत्तानुत्तप्रतूर्तसूर्तगूर्तानि छन्दसि॥ ॥नसत्तं निष
त्तं। अनुत्तः प्रतूर्तः सूर्तः गूर्त इत्येते शब्दाश्छन्दसि विषये निपात्यन्ते। नसत्तं निषत्तमिति सदेर्नञ्पूर्वान्निपूर्वाच्च नत्वाभावो निपात्य
ते। नसत्तमञ्जसा। असन्नमिति भाषायां। निषत्तं निषण्णमिति भाषायां। अनुत्तमिति उन्देर्नञ्पूर्वस्य निपातनं अनुत्त
मा ते मघवन्। अनुन्नमिति भाषायां। प्रतूर्तमिति त्वरतेस्तुर्वी इत्येतस्य वा निपातनं। प्रतूर्णमिति भाषायां सूर्त इति सृ इत्ये
तस्य धातोरुत्वं निपात्यते प्रसूर्त्तं वयः। प्रसृतं वयमिति भाषायां। गूर्तमिति गुरी इत्येतस्य निपात्यते। गूर्ता अमृतस्य पत्नी॥

नसत्त॥ ॥नसत्तेत्यादीनामनुकरणपदानां द्वन्द्वः। निषत्तमिति सदिरप्रतेरिति षत्वं। अनुत्तमिति भाषायामिति। नुदविदोन्दत्रेति विकल्पो
ऽपि न भवति एतन्निपातनारंभसामर्थ्यादित्याहुः। प्रतूर्तमिति यदा त्वरतेः तदा ज्वरत्वरेत्यादिना ऊठ् यदा तु तुर्वी हिंसायामित्यस्य तदा राल्लोपः उ
त्वमिति। रपरत्वं उरण् रपर इत्येव सिद्धं परिभाषाणामसिद्धप्रकरणेऽपि प्रवृत्तेः २४

एम॰
५४

क्विन्।। क्विनः कुरिति वक्तव्ये इति। नहि क्विन्प्रत्ययत्वं व्यभिचरतीति भावः। न चैवं पुच्छमानेवेरपृक्तस्येति लोपं बाधित्वा क्विन एव कारस्य कुत्वं च कारः प्राप्नो
तीति शंकनीयं तथा। क्विन इति प्रत्ययग्रहणपरिभाषया तदंतस्य ग्रहणे सति क्विनो वकारस्य लोपे कर्त्तव्ये सति कुत्वस्यासिद्धत्वाल्लोप एव भवति तस्मिंश्च
सति पश्चाद्द्रवकुत्वं परिशिष्टस्य धातोरेव भविष्यतीत्यादेतत्। क्विबादिषु सावकाशं लोपं विशेषविहितं कुत्वमपवादवचनप्रामाण्यादिति न्यायेन बाधे
तेति। नन्वा एवं हि वर्गीयग्रहणमनर्थकं स्यात्। अनेकस्य स्थानिनो नेकादेशप्रतिपत्त्यपेक्षिवर्गग्रहणं वकारस्येव तु स्थानित्वेष्य काएव वा निर्दिश्येत वर्गा
णां तु तौ पचतुर्थाविति शिक्षायां वकारस्य ककारो गुणसाम्यप्रतिपादनात्। तस्मात् क्विनः कुरित्येव वक्तव्ये बहुव्रीहिविज्ञानार्थमिति। बहुव्रीहिस्त्री

क्विन्प्रत्ययस्य कुः।। ।।क्विन्प्रत्ययो यस्माद्धातोस्स क्विन्प्रत्ययः तस्य पदस्यान्तस्य कवर्गादेशो भवति। स्पृशोनुदके क्वि
न्। घृतस्पृक्। हलस्पृक्। मधुस्पृक्। क्विनः कुरिति वक्तव्ये प्रत्ययग्रहणं बहुव्रीहिविज्ञानार्थं क्विन्प्रत्ययो यस्माद्विहितस्तस्यान्यस्मि
न्नपि प्रत्यये कुत्वं यथा स्यात्। क्विन्प्रत्ययस्य सर्वत्र पदांते कुत्वमिष्यते मा नोऽस्राक्। मा नोऽद्राक्। सृजिदृशिभ्यां हि क्विन्विहि
तस्तयोर्लुङि। रूपमेतत्। माङ्योगेपि छांदसत्वादडागमः। ईडुन भवति बहुलं छंदसीति। तथा दृग्भ्यां दृग्भिरिति क्विन्तस्या
पि दृशेः कुत्वं भवति। एवं च सति रज्जुसृड्भ्यामित्यत्रापि कुत्वेन भवितव्यं अयनेष्यते प्रतिविधानं कर्त्तव्यं।। ।। श्री ४।। ।।

पलक्षणोपि भवति यथा चित्रगुमानीयतामिति लिंगवामभावेपि चित्रगवीभिरुपलक्षितस्यानयनं भवति तथेहाप्यसत्यपि क्विनि क्विन्नोपलक्षितस्य
धातोः कार्यं भवतीति। अस्राक्। अद्राक्। इति सृजिदृशिभ्यां माङि लुङ्। तिप्। च्लेः सिच्। हल्ङ्याबिति लोपः। वदव्रजेति वृद्धिः। अत्र व्रश्चादिषत्वे प्राप्ते कुत्वं ज
स्य गः। शस्य खः। तस्यापि जश्त्वं चावसाने इति चर्त्वं ककारः। पूर्वत्रासिद्धमित्यसिद्धत्वं षत्वे कुत्वस्य ना। नि प्रत्ययग्रहणसामर्थ्यात् षत्वापवादत्वा
त् कुत्वस्य। क्विन्तस्यापीति। ईदृशे स्यादौ तु न भवति अपदांतत्वात्। एवं च सतीत्यादि। तथा वदेव दृग्भ्यामिति कुत्वमुदाहृतं। प्रतिविधानं कर्त्तव्य
मिति। प्रतिविधानं च वचनमेव।। ।।छ।। ।।

॥नशेः॥ ॥जीवनाशहेतुत्वाद्‌दूतिर्जीवनगिदुच्यते संपदादित्वाद्भावे क्विप्॥ ॥मोनो॥ ॥नलोपो न भवतीति नत्वं नुलोपार्थमेवस्यादिमन्य
ते॥ ॥समजुषोः॥ ॥सजूरिति। पूर्ववद्भावे क्विप् प्ररूत्वे कृते वोरुपधाया इति दीर्घत्वं जुष्प्रीतिसेवनयोः सहस्य सभावः सप्रीतिरित्यर्थः॥ ॥अवयाः॥ ॥श्वि

॥नशेर्वा॥ ॥नशेः पदस्य वा कवर्गादेशो भवति· सा वै जीवनगाद्‌दूतिः सा वै जीवनडाद्‌दूतिः। नशेर्‌र्यं संपदादित्वाद्भावे क्विप्· जी
वस्य नाशो जीवनगिति षष्ठीसमासे कुत्वविकल्पः॥ ॥मोनो धातोः॥ ॥मकारांतस्य पदस्य धातोर्नकारांतादेशो भवति· प्रशान्प्रता
न् नलस्यासिद्धत्वान्नलोपो न भवति· म इति किं भित् छित्· धातोरिति किं· इदं· किं· पदस्येत्येव प्रतामौ प्रतामः॥ ॥म्वोश्च॥
॥मकारवकारयोश्च परतो मकारांतस्य धातोर्नकारादेशो भवति· अगन्म तमसः पारं अगन्वत मसः पारं· गमेर्लिङ् बहुलं
छंदसीति शपो लुक्· जगन्वान् विभाषा गमहनविदविशामिति क्वसौ विकल्पमस्याभाव· अपदांतार्थ आरंभः॥ ॥स
सजुषोरुः॥ ॥सकारांतस्य पदस्य सजुष इत्येतस्य च रुरादेशो भवति· सकारांतस्य अग्निरत्र वायुरत्र· सजुष्· सजूऋषि
भिः सजूर्विश्वेभिः सजूर्देवेभिः जुषेः क्विपि सह पूर्वस्य च निपातनं ॥ ॥अवयाः श्वेतवाः पुरोडाश्च॥ ॥अवयाः श्वेत
वाः पुरोडाः इत्येते शब्दा निपात्यंते· अव पूर्वस्य यजेः श्वेतपूर्वस्य च वहेः पुरःपूर्वस्य च दाशतेः मंत्रे श्वेतवहोक्थशस्पुरोडा
शो ण्विन् अवे यजः इति ण्विनि कृते श्वेतवहादीनां डस्पदस्येति डस्प्रत्यये संबुद्धौ दीर्घार्थमेते निपात्यंते अत्वसंतस्य चाधातोरिति
त्वसंबुद्धाविति नुवर्त्तते· हे अवयाः हे श्वेतवाः हे पुरोडाः। चकारेणानुक्तसमुच्चयार्थः हे उक्थशाः २५ ॥ ॥ ॥

निरुक्त इति भाष्यस्यार्थः। श्वेतवाहादीनां यत्र पदत्वं भावि तत्र ण्विनोपवादो डस्प्रत्ययः इति निहितत्वार्थः नपुनरर्विनं तानां पदत्वे सति डस्य व
क्तव्य इति। ननु श्वेतवोभ्यामित्यादिसिद्ध्यर्थमवश्यं डस्प्रत्ययः स चेदुच्यते नार्थो नेन सान्तत्वात्सुर्वैरत्वरुः सिद्धो दीर्घत्वमत्वसंतस्येत्येव सि
द्धत्वादसंबुद्धौ दीर्घार्थमिति २५ ॥

अहन्॥ ॥अहोभ्यामिति हशिवेसुत्वं। नलोपमकृत्वेत्यादि। नलोपविधावेतस्मात्। लाक्षणिकत्वादिति अउगमेनाहन्निति रूपलाभात्॥
रुत्वविधाविति। समासे चासमासे च लुमता लोपात् रादेशे प्राप्ते रुत्वार्थमुच्यते अहो रूपमिति षष्ठीसमासः गतमहो रूपं पश्येत्समासः। अहो
रात्र इति। अहः सर्वैकदेशेत्यादिना च समासांतः। इकारलोपे कृते एकदेशविकृतस्यानन्यत्वात् रुत्वं॥ रात्र्यह्नांतु न कृतं गतमहो रात्रिरा

अहन्नित्येतस्य पदस्य रुर्भवति। अहोभ्यां अहोभिः नलोपमकृत्वा निर्देशो ज्ञापको नलोपाभावो यथा स्यादिति। दीर्घाहो
निदाघः दीर्घाहोत्रः अहन्नहि मित्यत्र लाक्षणिकत्वादह शब्दस्य रुर्न भवति रुविधावह्नो रूपरात्ररथांतरेषूपसंख्यानं कर्तव्यं।
अहो रूपं अहो रात्रः अहो रथंतरं। रोः सुपी त्यस्यापवादो रुत्वमुत्वार्थं विधीयते॥ ॥रोः सुपि॥ ॥अहन्नित्येतस्य रेफादेशो भ
वति असुपि परतः अहर्ददाति अहर्भुङ्क्ते। असुपीति किं अहोभ्यां अहोभिः। ननु चात्रापि प्रत्ययलक्षणेन सुपस्ति अहर्ददाति
अहर्भुङ्क्त इति। नैतदस्ति उक्तमेतत् अह्नो रविधौ लुमता लुप्ते प्रत्ययलक्षणं न भवतीति नायमहन्शब्दः सुप्परो भवतीति
यत्र तु लोप इति लुप्यते तत्र प्रत्ययलक्षणं भवत्येव यथा हे दीर्घाहोत्र दीर्घाहो निदाघ इति अत्र हल्ङ्याभ्य इति प्रत्ययनिवृत्तिः

गते स्यसमासे पि रुत्वार्थं॥ ॥रोः सुपि॥ ॥पूर्वस्यायमपवादः रेफस्य कार उच्चारणार्थः। अहर्ददातीति असंतसंयोगे द्वितीयात् अह्नो रुवि
धाविति। यथा चेतन्नस्त्रैणोवासिद्धं तथा नलुमतांगस्येत्यत्रोक्तं दीर्घाहो निदाघ इति असुपीति प्रसज्य प्रतिषेधः पर्युदासे तु सुप्सदृशो हल्प
रोस्तीति स्यापमयं वा। देनात्रैव पक्षे प्रसज्यप्रतिषेधे तु प्रत्ययलक्षणेन प्रतिषेधे सति रुरेव भवति ततश्च तन्निर्बंधनैपत्योत्वे भवतः॥ ॥ ॥

८ का०प०१

५६

॥अम्नरूधस॥ ॥निसर्गहल्ब्रेप्राप्तेयस्रेरोपिपथास्यादित्ययमारंभः। अम्नस शब्द ईयरर्थे अम्नरस्त्वमितइतिपथ्या। अवोरहरणं। प्रचेताराजन्निति
सस्यरेफः। तस्यरोरीतिलोपः ढ्रलोपेपूर्वस्यदीर्घोरणइतिदीर्घः अहरादीनमित्यादि उभयत्राप्यादिशब्दः प्रकारे इदमपिछंदसिभाषायांच॥ ॥भु
वश्चमहा॥ ॥तिस्रोमहाव्याहृतयः पृथिव्यंतरिक्षस्वर्गाणांवाचिकाः उद्दृत्तुमध्यमायाग्रहणं। भुवोविश्वेषुसवनेष्विति। तिङंतमेतद्भवतेः

अम्नरूधरवरित्युभयथाछंदसि॥ ॥अम्नसऊधसअवस इत्येतेषांछंदसिविषयेउभयथाभवतिरुर्वारेफोवा। अम्न
स अम्नएव अम्नरेव। ऊधसऊधएवऊधरेव। अवसअवएवअवरेवः यदारुत्वंतदाभोभगोअघोअपूर्वस्ययोशी
तियकारः। छंदसिविषयेभाषायांच प्रचेतसोराजन्युपसंख्यानंकर्तव्यं। प्रचेतोराजन् प्रचेताराजन्। अहरादीनांपत्यादि
षूपसंख्यानंकर्तव्यं। अहर्पतिः अहःपतिः गीर्पतिः गीःपतिः धूर्पतिः धूःपतिः विसर्जनीयबाधनार्थमत्ररेफस्यैव
पक्षेरेफोविधीयते॥ ॥भुवश्चमहाव्याहृतेः॥ ॥भुवस इत्येतस्यमहाव्याहृतेश्छंदसिविषयेउभयथाभवतिरुर्वा
रेफोवा। भुवरित्यंतरिक्षं भुवइत्यंतरिक्षं। महाव्याहृतिरिति किं भुवोविश्वेषुसवनेषुयज्ञियः। भुवइदं भुवरित्येतदव्य
यमंतरिक्षवाचिमहाव्याहृतिः॥ २६ ॥ ॥छ छ॥ ॥छ छ॥ ॥छ छ॥ ॥

छंदसिलुङ्लङ्लिटः इतिवर्तमानेलङ्। सिपुश्चपिगुणाभावश्छांदसः बहुलंछंदस्यमाङ्योगेपीत्यडभावः। लाक्षणिकत्वादेवास्याग्रह
णासिद्धेमहाव्याहृतिग्रहणमस्याः परिभाषायाअनित्यत्वज्ञापनार्थं तेनक्षायवतीसाटीपुक्सिद्धोभवति २६ ॥ ॥छ॥ ॥ राम०

५६

वसुस्रंसु॥ ॥सइतिवर्त्ततइति। अनडुह्श्चेनो नुतस्य विद्वानित्यादौ नकारस्य दत्वं प्राप्नोति। ननु स्रंसु ध्वंसु इति विशेष्यते इति विपरिणामेनान्वयः।
असंभवाच्चानडुह्शब्द इति न विशेष्यत इत्यन्वयः। इहेदं न सोर्दत्वं नाप्राप्ते विध्यंतो आरभ्यमाणो यथा विद्वद्भ्यामित्यादौ हत्वं बाधते तथा विद्वानित्यादौ
संयोगांतलोपमपि बाधेत स्यात आह हत्वेनाप्राप्त इति। अथानडुह्वानित्यत्र नुमो दकारः कस्मान्न भवत्यत आह नुमा स्वित्वानि। दत्वं यदि नकारस्य स्यात्

वसुस्रंसुध्वंस्वनडुहां दः॥ ॥समनुषोर्हस्येनः सइतिवर्त्ततेतेन संभवाद्व्यभिचाराच्च वसुरेव विशेष्यते न तु स्रंसुध्वंसू तयोर्व्य
भिचाराभावात्· असंभवाच्चानडुह्शब्दः वस्वंतस्य सकारांतस्य पदस्य स्रंसु ध्वंसु अनडुह् इत्येतेषां दकारादेशो भवति· वसु· विद्वद्भ्यां
विद्वद्भिः पपिवद्भ्यां पपिवद्भिः। स्रंसु· उखास्रत् उखास्रद्भ्यां उखास्रद्भिः। ध्वंसु· पर्णध्वत् पर्णध्वद्भ्यां पर्णध्वद्भिः। अनडुह्ः अनडु
द्भ्यां अनडुद्भिः हत्वेनाप्राप्त इदमारभ्यते संयोगांतलोपस्तु नैवमिति तेनैव दत्वं बाध्यते· विद्वान् पपिवान्· अनड्वान्· अनडु
द्भ्यां अनडुद्भिः हो ढ इति घत्वस्यापवादो दकारः। नुमस्तु विधानसामर्थ्याद्दत्वं न भवति· अनड्वान् हे अनड्वन्निति· सइत्येव
विद्वान् पपिवान्· पदस्येत्येव विद्वांसौ विद्वांसः॥ ॥तिप्यनस्तेः॥ ॥तिपि परतः सकारांतस्य पदस्यानस्तेर्दकार आदेशो
भवति· अचकाद्भवान्· तिपीति किं चकास्ते· क्विपि चकाः। अनस्तेरिति किं आप एवेदं सलिलं सर्वमाः॥ आः इति अस्तेर्लुङ्
इति पिबद्कुलं छंदसीतीरानकृतः॥ ॥छ॥ ॥
ननु मोनर्थको विधिर्हकारस्यापि दत्वेन घ्नन्ड्वादिति सिध्यति। यद्येवं तर्हि नुमो विधानसामर्थ्याद्दत्वं न भवतीति तथानड्वा अत्रेत्यादौ दीर्घादिष्टिसमान
पाद इति रुत्वमपि न प्राप्नोति। यं विधिं प्रत्युपदेशोनर्थकः स विधिर्बाध्यते यस्य तु विधेर्निमित्तमेव नासौ बाध्यते दत्वं च प्रति नुमो विधिरनर्थकः रुविधेः
पुनर्निमित्तमेव॥ ॥छ॥ ॥छ॥ ॥

ङमो ह्रस्वात्॥ ॥ङमोङमुडिस्तुभयत्रापिप्रत्याहारग्रहणांउ डितिप्रत्येकंङकारादिभिः संबध्यते संज्ञायां हि रूतमागमलिंगसंज्ञिनां भवतिङ्
स्वादिसेतनुङमोविशेषणं सोपिङमपदस्य विशेषणो नचतदंतविधिर्भवतिपदस्येति प्रकृतंपद पिषष्ठ्यंतं तथापिङमइत्येतेन संबंधात्
षष्ठ्यंतं विपरिणाम्यते उभयनिर्देशेपंचमीनिर्देशोबलीयानितिङमइतिपंचम्याचीतिसप्तम्याः षष्ठीप्रकल्प्यते सप्तमीतिर्देशस्तुलाघवा
र्थः उत्तरार्थश्च तदेतत्सर्वं मनसि कृत्वाह ह्रस्वात्परइति। संख्यातानुदेशश्चवेदितव्यः आगमानामागमिनां च समत्वात् परमदंडिने
त्यादौसुबंतयोः समासः तत्रसमासार्थायां विभक्तौ लुप्तायामपि प्रत्ययलक्षणेन दंडिन्नित्यस्य पदत्वमस्तीतिङमुडागमो नीत्याशंक्याह दंडि
नि समासेयउत्तरोभागस्तस्य पदत्वे कर्त्तव्ये प्रत्ययलक्षणं न भवति अपदादिविधौ पदादिविधिं वर्जयित्वा। प्रत्ययलोपे पूर्वपदादिवि
ङमो ह्रस्वादचि ङमुण्नित्यं॥ ॥ह्रस्वात्परो यो ङमुपदांतः तस्मादुत्तरस्याचो नित्यं ङमुडागमो भवति। ङणनेभ्यो यथासं
ख्यंङणना भवंति। ङकारांतादुत्कृष्टप्रत्यङ्ङास्ते उदङ्ङास्ते। णकारांतात्सुगण्णस्ति गणावाचनं। नकारांतात् कुर्वन्नास्ते
कुर्वन्नवोचत। कृषन्नास्ते कृषन्नवोचत। ङमइति किं किमास्ते। ह्रस्वादितिकिं प्राङास्ते। अचीति किं प्रत्यङ् करोति पच
न्करोति। इह तु परमदंडिने अत्र उत्तरपदत्वे चापदादिविधाविति प्रत्ययलक्षणप्रतिषेधादुत्तरस्य पदत्वं नास्तीति ङमुण्
नभवति। अथवा उजिचपदइत्यतः समस्यंतं पदे इत्यनुवर्त्तते नेनयदेत्र नादौ ङमुडागमो भवति॥ ॥मयउञो वोवा
॥ ॥मयउत्तरस्य उञो वा वकार आदेशो भवति अचि परतः। शम्वस्तु वेदिः शमुअस्तु वेदिः। तद्वस्य तन्तरत्। उस्य
तः। प्रगृह्यत्वात् उञः प्रकृतिभावे प्राप्ते वकारो विधीयते। तस्मात् सिद्धत्वात् ङलीति मोनुस्वारो न भवति ८ ॥ ॥
यीप्रत्ययलक्षणं भवत्येवेत्यर्थः एतद्वार्त्तिककारमतेनोक्तं। सूत्रकारमतेनाप्याहाथवेति॥ ॥मयउञो वो वा॥ ॥उञोयणा वीसने
नेवसिद्धत्वान्नार्थोनेनेत्याशंक्याह प्रगृह्यत्वादिति। प्रगृह्यत्वे च निपात एकाजनाङिति। एवमपि इको यणचीत्यस्यानंतरं मयउञो वेति
वक्तव्यं एवं हि वग्रहणं न कर्त्तव्यं भवति तत्राह तस्यासिद्धत्वादिति। परात्त्विति परउञ भवति मयश्च परस्तस्मादुञ इति प्रगृह्यसंज्ञायां वि
कल्पः ञं आदेशश्चतत्र यदा प्रगृह्यसंज्ञानं भवति तदाने नवत्वं च प्राप्नोति परत्वादेशश्चतत्रापि वत्वस्यासिद्धत्वाद्यणादेशो मस्तनुस्वारोपि भ
वति। किंविति प्रगृह्यसंज्ञायहेत्वनेनवा वत्वं। किम्वितिकिमुइति ञं आदेशस्यापि स्थानिवद्भावात् नेनयश्च वकारो भवति सवान्तरनम

तादनुनासिकस्तच्चतुर्थं रूपं ञं आदेशाभावपक्षेऽश्रवणं
तत्संचर्मरूपं ८ ॥

विसर्जनीयस्य सः॥ ॥इहाव्खवसानयोर्द्वयोरपि रेफस्य विसर्जनीय उक्तस्तत्रेहतिभिन्नविशेष्यमनुपादानात्खरीवावसानेपिसत्वंप्राप्नोतीत्यत आह
स्प्रक्ष्यति। संहितायामितिवर्त्ततेनचावसानेसंहितास्तिपरस्याभावात्। माभूत्स्वरः पूर्वेणायासंहितानदारअयंसत्वंप्राप्नोति। इकोयणचीत्यारै
नुकार्यपिनिमित्तयोर्द्वयोरप्युयात्तत्वात्तयोरेवपरस्परंसंहिताश्रीयतइतिदधिअत्रेतिपूर्वापराभ्यामिगचोः संहितायांसत्यामपिकार्यंनभवतिप
रस्परमसंहितत्वात्। स्यादेतत्। सामान्यविहितेनसंहितासंज्ञाविशेषविहितावसानसंज्ञाकार्यंयेरेकवर्णविषयत्वात्कार्यार्थत्वाच्चसं
ज्ञानोसंज्ञयोरप्येकविषयत्वाद्बाध्यबाधकभावः। परःसन्निकर्षः संहितेतीयत्ताभिद्वेपरग्रहणमतिशयप्रतिपत्त्यर्थमप्रकृष्टोयः सन्निकर्षः
कश्चप्रकृष्टोपः पूर्वपराभ्यामुभाभ्यामपि। तदभावादवसानस्यसंहितासंज्ञाया अभावः। यद्येवमरोप्रत्यस्यानुनासिकेदोषः तत्रहिचाव

विसर्जनीयस्य सः॥ ॥खरीत्यनुवर्त्ततेविसर्जनीयस्य सकारआदेशो भवतिखरि परतः। वृक्षश्छादयति। वृक्षष्टकारः। प्लक्ष
ष्टकारः। वृक्षश्चिनोति प्लक्षश्चिनोति। वृक्षस्थीकते प्लक्षस्थीकते। वृक्षस्तरति प्लक्षस्तरति॥ ॥शर्परे विसर्जनीयः॥ ॥शर्परे ख
रि परतो विसर्जनीयस्य विसर्जनीय आदेशो भवति। शराः क्षुरंपुत्रः क्षुरं अद्भिः प्सातं। वासः क्षौमं। पुरुषः त्सरुकः। घना घनः॥
क्षोभणः। नेतिवक्तव्ये विसर्जनीयविसर्जनीयवचनंतद्धिकारनिवृत्त्यर्थंतेनजिह्वामूलीयोपध्मानीयावपिनभवतः ८ ॥

सानइतिवर्त्ततेसंहिताधिकारश्चोत्तरार्थोवश्यमनुवर्त्यः नोर्लीतिपरसवर्णोः संहितायांमाभूत् अग्निचित्लुनातीतितत्रसंहितावसा
नोभयाश्रयोनुनासिकोदधिंइसाद्रोनस्या संहितावसानसंज्ञयोः समावेशइष्यतेयः ततश्चावसानेपिसत्वप्रसंगोतआह खरीत्यनुवर्त्त
तइति। तदनुवृत्तिश्चमंडूकप्लुतिन्यायेनसंबंधानुवृत्त्याबावेदितमात्रअस्याहिपूर्वत्रापिखरिकार्यंविज्ञायेत। किंपुनरत्रसमाणांखरीत्यनुव राम०
र्त्ततइति। तदनुवृत्तिश्चमंडूकप्लुतिन्यायेनसंबंधानुवृत्त्याबावेदितमात्रअस्याहिपूर्वत्रापिखरिकार्यंविज्ञायेत। किंपुनात्रप्रमाणांखरी
त्यनुवर्त्ततइतिउत्तरशर्परइतिवचनं। सहिबहुव्रीहिः तस्मान्यपदार्थापेक्षायांयोविसर्जनीयात्परः संभवतिममवान्यपदार्थः। सचखरेवअव
सानस्यशर्परत्वासंभवात्॥ ॥

हेमपरे वा॥ ॥ह्मलयतीति ह्मल चलने णिच्। ज्वलह्वलह्मलनमनमामनुपसर्गाद्वेति पक्षे मित्संज्ञा मितां ह्रस्वः। यवलपरे इति। यवलाः परे यस्मात् हकारात्स तथोक्तः। यवलोश्चैते भवं तत्र आंतरतम्यात्सानुनासिका भवंति। वाचचनात्पक्षे नुस्वारो विभवति। यत्परग्रहणं शक्यमकर्त्तुं। सममेव तदर्थलाभात्। मकारे परतो यो हकारस्तत्रेति। विपर्ययस्तु न भवसमं भवान्। न हि मकारात्परो हकारः क्वचित्संभवति॥ ॥ङ्णोः कुक्टुक्श

हेमपरे वा॥ ॥हकारे मकारपरे परतो मकारस्य मकार आदेशो भवति वा। किम्ह्मलयति किंह्मलयति कथम्ह्मलयति कथंह्मलयति। यवलपरे यवला वा मकारस्येति वक्तव्यं। किय्ह्यः किंह्यः। किव्ह्वलयति किंह्वलयति किल्ह्लादयति किंह्लादयति॥ ॥
नपरे नः॥ ॥नकारपरे हे परतो वा मकारस्य नकार आदेशो भवति। किन्ह्नुते किंह्नुते कथंह्नुते॥ ॥ङ्णोः कुक्टुक् शरि॥ ॥ङ-
कारणकारयोः पदांतयोर्यथासंख्यं शरि परतो वा कुक्टुक् इत्येतावागमौ भवतः। प्राङ्क्शेते प्राङ्शेते। प्राङ्क्षंडे प्राङ्षंडे।
प्राङ्क्सायेप्राङ्साये णकारस्य। बण्ट्शेते बण्शेते। बण्ट्षंडे बण्षंडे। बण्ट्साये बण्साये। पूर्वांतकरणं प्राङ्क्षष्ठे इत्यत्र
छत्वार्थं। शश्छोटीति हि पदांतात्स्य इत्येवं विज्ञायते इह मा भूत् पुराक्रस्य विसयोचिरयशिन्निति। प्राङ्क्षष्ठाय इत्यत्र सात्प
दाद्योरिति षत्वप्रतिषेधार्थं बण्सायेरस्पत्र न पदांतादोरनामिति ष्टुत्वप्रतिषेधार्थं च॥ ॥ ॥ ॥ ॥

रि॥ ॥उदाहरणे खुरवयोर्द्वितीयः शरि योष्करसादेरिति पक्षे ककारस्य खकारः टकारस्य ठकारः। पूर्वांतकरणमित्यादि। किं पुनः कारणं परादौ छ
त्वं न सिध्यतीत्यत आह शश्छोटीति। विर्पृशि त्रिति। महन्नामेन न विपूर्वाद् दृपौ णादिकः कर्मणि शिनि प्रत्ययः। पदिवा विरपणां विरपृशः
मेऽस्मास्तीति विरपृशीश इतः संकीर्तित इत्यर्थः। षत्वप्रतिषेधार्थमिति। परादौ तु सकारः पदादिः स्यात्। ष्टुत्वप्रतिषेधार्थमिति। परादौ तु ट
कारः पदांतो न स्यात्॥ ॥

डः सि धुट्॥ ॥उभयनिर्देशे पंचमीनिर्देशो बलीयानिति डः इति पंचम्यासीतिसप्तम्याः षष्ठी प्रकल्प्यते। निमित्तादुकारांतादिति। सप्तमीनि
र्देशस्तुलाघवार्थः। उदाहरणेषु धुटि कृते चर्त्वं तकारस्तस्य पूर्ववित्ससेथकारः। अथ किमर्थं धुट् परादिः क्रियते न धुगेव पूर्वांतः क्रियेत। एवं हि शि
तुगित्यत्र तुग्ग्रहणं न कर्तव्यं भवति एष धुक् तत्रानुवर्तिष्यते। तत्राह परादिकरणमिति। प्रक्रियालाघवार्थं तु इति विक्रमे धुक्ग्रहणमुत्तरार्थं
नश्चेति धुड्यथा स्यान्तु रायाभूत्। किंच स्यादुक्तास्यापरस्तत्र नश्छव्यप्रशानिति रुत्वं प्रसज्येत नैतदस्ति। अम्परः इति तत्रानुवर्तते। किंच तुक्सि
द्धत्वादपि रोरप्रसंगः। तस्मात् ट्वैव क्रमः॥ ॥नश्च॥ ॥अवापि यणादित्वात् कुर्वन्नीदतीत्यादौ पदांतस्येति णत्वप्रतिषेधो भवति। धुटश्चासि
द्धत्वादिति। धुटोयश्चर्त्वं तस्यासिद्धत्वादित्यर्थः। यद्यपि धुडसिद्धः तथापि नततुच्यते सिद्धेपि नसि चिनाचर्त्वेन रुत्वस्याप्राप्तेः। नन्वस्तु

डः सि धुट्॥ ॥डकारांतात्पदात्परस्य सकारस्य वा धुडागमो भवति। श्वलिट्त्साये श्वलिट्साये मधुलिट्त्साये मधुलिट्साये। प
रादिकरणं न पदांतादिरस्मामिति ष्टुत्वप्रतिषेधार्थं॥ ॥नश्च॥ ॥नकारांतात्पदादुत्तरस्य सकारस्य वा धुडागमो भवति। भवान्
त्साये भवान्साये महान्त्साये महान्साये। धुटश्चर्त्वस्यासिद्धत्वान्नश्छव्यप्रशानिति रुत्वं न भवति॥ ॥शि तुक्॥ ॥नकारस्य
पदांतस्य शकारे परतो वा तुगागमो भवति भवान्च्छेते भवान्शेते। पूर्वांतकरणं छत्वार्थं। यद्येवं कुर्वन्छेते इत्यत्र नकारस्याप
दांतत्वाण्णत्वं प्राप्नोति तत्र समाधिमाह। स्तोश्चुना श्चुरित्यत्र योगविभागः क्रियते णत्वप्रकरणं च प्रकृतं तेन स्तोः श्चुना संनिपाते ण
कारो न भवतीति तत्र श्चुरिति ७ ॥

चर्त्वमसिद्धं तथापि नैव रुः प्राप्नोति। अनम्परत्वात्। सस्याप्यत्वसे धुट उकारस्तेन मतस्पूर्वेणामपरत्वमभ्युपेत्यैतदुक्तं। अस्येग्रंथमिमंनपठं
ति॥ ॥शि तुक्॥ ॥शीसेष्वा सप्तम्यकृतार्था पूर्वसूत्रे कृतार्थायाः पंचम्याः षष्ठी प्रकल्पयतीति दाह नकारस्येति। अथ किमर्थम पूर्वः श्वांत
स्तुक् क्रियते न प्रकृतः परादिर्धुडेव विधीयेत तत्र शि च चर्त्वेन सिध्यत्येवात आह पूर्वांतकरणमिति। पूर्वांतस्यापूर्वस्य तुकः करणमित्यर्थः। न
कारस्यापदांतत्वादिति। तुकापदांततापाविहत्वात्। यणादौ तु पदांतस्येति प्रतिषेधाद्दोषः। तत्रेत्यादि। तत्र तु कोपश्चुत्वं तदाश्रयात्सिद्धं भवति॥ राम०

॥७॥ ॥७॥ ॥

लोपः शाकल्यस्य॥ ॥अवर्णपूर्वयोरिति। ओकारपूर्वस्य तत्परस्य तेण नित्यं लोपो विधास्यते। शाकल्यग्रहणं विकल्पार्थमिति। ननु लोपोप्यु
च्यते लघुप्रयत्नतरोपि तावुभौ वचनाद्भविष्यतस्तत् किं विकल्पार्थेन शाकल्यग्रहणेन। तत आह तेनेति॥ ॥ओतो गार्ग्यस्य॥ ॥ओकारादुत्त
रस्य यकारस्येति। वकारस्त्वस्मिन्विषये न संभवति। नित्यार्थोयमारंभ इति। विकल्पस्य पूर्वेणैव सिद्धत्वात्। किमर्थं तर्हि गार्ग्यग्रहणमित्याह योयमि
ति। केचित्त्विति। यद्यस्मिन्नकारणे मोः कार्यं तत्त्वमुदाप्यते स्यात् तेन त्वनंतरो लोपविकल्प इति तेषामभिप्रायः॥ ॥उञि च पदे॥ ॥भूतपूर्वेणाज

लोपः शाकल्यस्य॥ ॥यकारवकारयोः पदांतयोरवर्णपूर्वयोः शाकल्यस्याचार्यस्य मतेन लोपो भवत्यशि परतः। कआस्ते कया
स्ते असाउड्रः असावुड्रः अत्र चावत्र असा आदित्यः असावादित्यः। शाकल्यग्रहणं विभाषार्थं। तेन यदा लघुप्रयत्नतरो न भवत्या
देशस्तदापि पक्षे श्रीः अवणं भवति॥ ॥ओतो गार्ग्यस्य॥ ॥ओकारादुत्तरस्य यकारस्य लोपो भवति गार्ग्यस्याचार्यस्य मते अशि
परतः। भो अत्र भगो अत्र अघो अत्र नित्यार्थोयमारंभः। गार्ग्यग्रहणं पूजार्थं योपमलघुप्रयत्नतरस्तस्य लोपविकल्पः इतः सोपि
न निवर्त्तते लघुप्रयत्नतरस्तु भवत्येव यकारः भोयत्र भगोयत्र अघोयत्रेति केचित्सर्वमेव यकारं नेच्छंति॥ ॥उञि च पदे॥ ॥उञि च
पदे परतः अवर्णपूर्वयोः पदांतयोर्य्वोर्लोपो भवति। स उ एकविंशतिः स उ कास्निः पद इति किं तंत्र उतं तंत्रयुतं। वेञः संप्रसारणे
कृते उञ्भूतपूर्वेणाञ्कारेणाशाक्य तेषां प्रतिपत्तु। अथ उञिति एवं रूपो निपातः प्रतिपदोक्तोस्ति तदा लाक्षणिकत्वाद्वेञादेशस्य ग्रह
णं नास्तीत्युत्तरार्थं पदग्रहणं क्रियते॥ ॥ ॥छ छ॥ ॥छ छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

कारेणोञि। मलोदाहरणेपि भूतपूर्वेणैव ञकारेणोञिति प्रतिपत्तिः अनुबंधस्य प्रयोगे समवायात्। उत्तरार्थमिति। ङमो ह्रस्वादचि ङमुण्नित्य
मित्येष विधिरञोद्भोपटेयष्मा स्यात् इह मा भूत् दंडिनेति। ने नदास्ति प्रयोजनं यदस्येति विवर्त्तते। इह तर्हि परमदंडिना अत्र हि सुबंतस्य समास इति
पदत्वमस्ति नास्ति। उक्तं हि उत्तरपदत्वे चापदादिविधाविति। तदेतत्पदस्य ग्रहणात्तिष्ठतु तावत्। अयमपि नित्यार्थो योगः॥ ॥छ॥ ॥
॥ ॥ ॥

२का.पृ.३

॥हलि सर्वेषां॥ ॥यकारस्य पदांतस्येति। वकारस्तु भोभगो अघो अपूर्वो न संभवति अवर्णपूर्वस्तु संभवति वृक्षव करोतीति तस्य तु लोपो न भवति। अशि हलीति विशेषणात्सिद्धमुक्तं तस्माद्यकारस्येत्युक्तं। ननु वृक्षवृहसतीत्यादौ संभवति। न संभवति। अनभिधानात्। नह्येवं विधमभिधानमस्ति। तथा चलक्षिसूत्रभाष्यकार आह न पदांता हलो णः संतीति। एवं च वृक्षव करोतीत्यिदमपि प्रयोगश्चिंत्यः॥ ॥मोनुस्वारः॥ ॥अत्र पदस्येति स्थानषष्ठी। तस्मकारेण परस्य विशेषणात् मकारांतस्य पदस्यालोंत्यस्यानुस्वारो विधीयते तदाह मकारस्य पदांतस्येति॥ ॥नश्चापदांतस्य झलि॥

॥हलि सर्वेषां॥ ॥हलि परतो भोभगो अघो अपूर्वस्य यकारस्य पदांतस्य लोपः सर्वेषामाचार्याणां मतेन। भो हसति भगो हसति अघो हसति भोयाति भगोयाति अघोयाति वृक्षाहसंति वृक्षायांति। सर्वेषांग्रहणं शाकटायनस्यापि मते लोपो यथा स्यात् लघुप्रयत्नतो माभूत्॥ ॥मोनुस्वारः॥ ॥मकारस्य पदांतस्यानुस्वारादेशो भवति हलि परतः। कुंडं हसति धनं हसति कुंडं याति धनं याति। हलीत्येव कुंडमत्र। पदस्येत्येव गम्यते रम्यते॥ ॥नश्चापदांतस्य झलि॥ ॥नकारस्य मकारस्य चापदांतस्यानुस्वार आदेशो भवति झलि परतः। यशांसि यशांसि पयांसि सर्पींषि हवींषि। मकारस्य आक्रंस्यते आचिक्रंसते अधिजिगांसते। अपदांतस्येति किं राजन्याद्धि सलीति किं गम्यते रम्यते॥ ॥मोराजि समः क्वौ॥ ॥समो मकारस्य मकार आदेशो भवति राजतौ क्विप्प्रत्ययांते परतः। सम्राट् साम्राज्यं। मकारस्य मकारवचनमनुस्वारनिवृत्त्यर्थं। राजीति किं संयत्। समः इति किं किंराट्। क्वाविति किं संराजितुं संराजितव्यं ६॥

॥आक्रंस्यत इति। क्रमेर्ल्लृटि। आङ् उद्‌गमने इत्यात्मनेपदं॥ ॥मोराजि समः क्वौ॥ ॥सम्राडिति। सत्सूद्विषेत्यादिना क्विप् व्रश्चादिना षत्वं साम्राज्यमिति। क्विबंतो राजतिरादिनात्प्यञ्। अधिकसंभवेपि क्विबंतो राजतिस्तावदस्ति स तत्रापि भवति। क्विबंतावस्थायामेव वा प्रागेव वृष्यन्तं तस्य नेमत्त्वं संपद्यति। गमः क्वावित्यत्र गमादीनामिति वचनाल्लोपः। ह्रस्वस्य तुक्। किंराडिति। किंक्षेपे इति समासः ६॥ ॥

१५०

रोः सुपि॥ ॥यथः स्विति। यत्र सकारद्वयं पठ्यते तत्र वा शरीति विसर्जनीयस्य सकारः। सर्पिष्षु इति। यत्र विसर्जनीयः पठ्यते तत्र नुम्विसर्जनीयशर्व्य
वायेपीति प्रसपसकारस्य षत्वं। षकारद्वयपाठे तु पूर्ववद्विसर्जनीयस्य सत्वे परस्य पूर्ववदेव षत्वं पूर्वस्य ष्टुत्वं। सप्तमीबहुवचनं गृह्यत इति। न
प्रत्याहारः सुपीत्यनुवृत्तेः। नहि सप्तमीबहुवचनादन्यः सुप्स्वरादिरस्ति। तेन पयोभ्यामित्यादौ विसर्गो न भवति किं तर्हि नियमार्थः। यद्यपि सिद्धि
स्तथापि रोनियमार्थ इति। रोरेव सुपीति। विपरीतस्तु नियमो न भवति रोः सुप्येवेति। हलोनंतराः संयोग इत्यादेर्निर्देशात्॥ ॥भोभगोअघोअपूर्वस्य योऽशि॥ ॥

रोः सुपि॥ ॥हइत्येतस्य रेफस्य सुपि परतो विसर्जनीयो भवति। पयः सु पयःसु सर्पिष्षु हविः षु। सुपीति सप्तमीबहुवचनं गृह्य
ते न प्रत्याहारः। सिद्धे सत्यारंभो नियमार्थः रोरेव नान्यस्येति गीर्षु पूर्षु चतुर्षु॥ ॥भोभगोअघोअपूर्वस्य योऽशि॥ ॥भोभगोअघोर
से वं पूर्वस्य अवर्णपूर्वस्य च रोर्यकारादेशो भवति अशि परतः भो अत्र भगो अत्र अघो अत्र भोरत्रेति भगोरत्रेति अघोरत्रेति। अ
पूर्वस्य क आस्ते क आस्ते ब्राह्मणा ददति पुरुषा ददति। भोभगोअघोअपूर्वस्येति किं अग्निरत्र वायुरत्र। अशग्रहणमुत्तरार्थं ॥

उत्तरत्र रो सुप्रो तोगार्ग्यस्य हलि सर्वेषामिति च यलोपः। अशग्रहणमनर्थकमसत्त्वाभावात्। अशो स्वः स्वर्भवति। तत्र च पूर्वत्रासिद्धमिति यत्वस्या
सिद्धत्वाद्विसर्जनीयेन भाव्यं। कृते विसर्जनीये स्थानिवद्भावात्तद्ग्रहेणो न ग्रहणमस्मात्प्रसंग इति चेन्न। अतत्स्थानिकत्वात्। अत्र हि रोर्यो रेफस्तस्य वि
सर्जनीयस्य स्थानी न यपुनाहरेव। किं च। यत्वस्यात्यस्यरोर्यो रेफः स एव स्थानी न न यपुनाहरेवतस्मादल्विधित्वादपि नास्ति स्थानिवद्भावः संहि
ताधिकारात्रावसाने यत्वं न भविष्यति तस्मादशग्रहणमनर्थकमत आहाशग्रहणमुत्तरार्थमिति॥ ॥छ छ॥ ॥छ॥ ॥

ऽका·प०३ एतदेवुक्तमनन्किं हलि सर्वेषामिति। ह्रस्वयतेर प्रत्यय इति। सपुनर्विचू। नक्विप् क्वि पिहि एकदेशविकृतस्यानन्यत्वाद् ह्वतिग्रहणेन ग्रहणाद्
काम्याप्रसारणं स्यात् लोपो व्योर्वलीति वलोपः कस्मान्न भवति। लोपस्य स्थानिवद्भावो नास्ति पदान्तविधौ प्रतिषेधात्। वकारस्य पदान्तत्वा
त्। नैष दोषः। भावसाधनस्त्र विधिशब्दस्तत्रश्च पदान्ते विधीयमाने स्थानिवत्वनिषेधः न च लोपः पदान्तस्याभावरूपत्वात्। अथेति। यदि ह
लि सर्वेषामित्यत्राशग्रहणस्य प्रयोजनं तत्रैव वक्ष्यमहशीति। नात्किं हल्ग्रहणं कृत्वा शग्रहणेन तद्विशेष्यत इति प्रश्नार्थः। एवकारो भि

हलि सर्वेषामित्ययं लोपोऽशि हलि यथा स्यादिह माभूत्। ह्वर्षं ह्वश्वतीह्वश्ह्वह्वत माचष्ट इति णिच ह्रस्वयतेर प्रत्ययः ह्रस्वकरो॥
अथोत्तरत्रैव हशग्रहणं कस्मान्न कृतं। उत्तरार्थं। मोनुस्वार इति हल्मात्रे यथा स्यात्। व्योर्लघुप्रयत्नतरः शाकटायनस्य लोपः शा
कल्यस्येत्येतद्वह्रस्वकरोतीत्यत्र माभूदिति शग्रहणं कृतं। एतस्मिन्नेव पुनरत्र प्रातरत्र॥ ॥व्योर्लघुप्रयत्नतरः शाकटायनस्य॥ ॥
वकारयकारयोः पदान्तयोः भोभगोअघोअवर्णपूर्वयोर्लघुप्रयत्नतरस्यादेशो भवति अशि परतः शाकटायनस्याचार्यस्य मते
न। लघुप्रयत्नतरत्वमुच्चारणे स्थानकरणशैथिल्यं। भोयत्र भोअत्र भगोयत्र भगोअत्र अघोयत्र अघोअत्र कयास्ते कआस्ते। असा
पूर्वयोर्लघुप्रयत्नतरस्यादेशो भवति अशि परे। इह असमाउ इह त्वमुच्चारणे स्थानकरणशैथिल्यं। भोयत्र भोअत्र भगोयत्र भगो
अत्र अघोयत्र अघोअत्र कयास्ते कआस्ते असावुद्धर असाउद्धर द्वावत्र द्वाअत्र असावादित्यः असाआदित्यः। शाकटायन
ग्रहणं विभाषार्थं तेन यदा लघुप्रयत्नतरेण न भवत्यादेशस्तदापि यवोः पक्षे श्रवणं भवति ५
अक्रमः। तत्र हपग्रहणमेव कस्मान्न कृतमिति। उत्तरार्थमिति। यदि तत्र हशग्रहणं क्रियेत मोनुस्वार इत्यत्र पुनर्हल्ग्रहणं कर्त्तव्यं हल्मात्रे य
था स्यादिति। सर्वथा द्वयोर्ग्रहणयोर्न मुच्यामह इति भावः। तथाप्यत्राशग्रहणानुरोधेन प्रयोजनेन वक्ष्यमाणं तदाह व्योर्लघुप्रयत्नतर इति॥ ॥ राम०
व्योर्लघुप्रयत्नतरः॥ ॥अतिशयेन लघुप्रयत्नो लघुप्रयत्नतरः। वर्णोच्चारणे हेतुरात्मधर्मः प्रयत्नः। उदाहरणेषु अन्तर्यतो वकारस्य वका
रो यकारस्य यकारः किं पुनरिदं लघुप्रयत्नतरत्वमित्याह लघुप्रयत्नतरत्वमिति। स्थानं तात्वादि। जिह्वाया अग्रोपाग्रमध्यमूलानि करणा
नि। प्रयत्नस्य लघुत्वेन तानि शिथिलानि लघूनि भवन्ति ५ ॥

ढोढेलोपः॥ ॥अकार उच्चारणार्थः। ढकारमात्रं निमित्तं। तेन लेढा लेढी लाढ्वादावपि भवति। लीढमित्यादौ हो ढः झषस्तथोर्धोऽधः ष्टुत्वं
तो नेन ढलोपः। ननु चासिद्धं ष्टुत्वं तत्कथमत्र लोपस्तत्राह ष्टुत्वमिति। उच्यते चेद् ढे परतो ढस्य लोपो भवतीति। तत्र ष्टुत्वस्यासिद्धत्वे निर्विष
यमेतत्स्यात्। ननु च यत्रैकोऽसन्निकोऽढकारः श्वलिड्ढौकत इत्यादौ सावकाशो स्यादत आह श्वलिड्ढौकत इत्यत्रेति। जश्त्वे कृत इति। एकपदा
श्रयत्वादन्तरङ्गत्वात् पूर्वत्रासिद्धमिति ढलोपस्यासिद्धत्वात् पूर्वं जश्त्वं। ननु व निर्विषयत्वाड्ढलोपो जश्त्वं बाधेत मेत्याह न चेति। कुत इत्याह तस्य ही
ति। कथं पुनर्लीढादिरवकाशः यावता यथा श्वलिड्ढौकत इत्यत्र जश्त्वे कृते कार्यिणोऽभावस्तथा लीढादावपि ष्टुत्वस्यासिद्धत्वान्निमित्तस्या
भावः। अथ तु वचनसामर्थ्यात् ष्टुत्वस्यासिद्धत्वं बाध्यत इतरत्रापि जश्त्वं बाधनीयं वक्ष्यमोवा विशेषो तत्राह तत्र हीति। अयमभिप्रायः। लो

ढोढेलोपः॥ ॥ढकारस्य लोपो भवति ढकारे परतः। लीढं मूढं मूढां पयघपिपढां धिकारस्तथापि तस्यासंभवाद्यदा तस्य ढकार
स्यायं लोपो विज्ञायते। ष्टुत्वस्यात्रासिद्धत्वमाश्रयाद् इष्टम्। श्वलिड्ढौकत इत्यत्र जश्त्वे कृते कार्यी नास्ति। न च ढलोपो जश्त्वं बाधेत त
स्य हि लीढादिर्विषयः संभवति। तत्र हि श्रुतिकृतमानन्तर्यमस्ति शास्त्रकृतं यदानन्तर्यं तद्बाध्यते। श्वलिड्ढौकत इत्यत्र न श्रुतिकृ
तमानन्तर्यं नापि शास्त्रकृतमिति अविषयोऽयं ढलोपस्य॥ ॥रोरि॥ ॥रेफस्य लोपो भवति रेफे परतः। नीरक्तं दूरक्तं अग्नीरथः प
टूरथः पुनारक्तं वासः प्रातारा जक्रयः। पदस्येत्यत्र विशेषणं षष्ठीनस्थाने षष्ठी तेनापदान्तस्यापि रेफस्य लोपो भवति। जर्गृढं
दूजर्गृढीः। पास्पर्ढीर्यास्पा इति॥ ॥छ॥ ॥

पेन तावदसिद्धत्वमवश्यं बाध्यं तत्र लीढमित्यादावेकमेव पूर्वत्रासिद्धमित्यसिद्धत्वमतस्तदेव बाध्यते। श्वलिड्ढौकत इत्यत्र तु ढलोप
स्य जश्त्वापेक्षया बहिरङ्गत्वात्परत्वाच्च द्विविधमसिद्धत्वमिति तन्न बाध्यते। ततो जश्त्वे कृते न श्रुतिकृतमानन्तर्यं नापि शास्त्रकृतं जश्त्व
स्यासिद्धत्वाभावादिति ढलोपस्य श्वमविषय इति॥ ॥रोरि॥ ॥किमिदं सानुबन्धकस्य रोर्ग्रहणमाहोस्विद्रेफस्य। कुतः संशयः। तु
ल्यात्र संहिता रोः रिः रीति। किं चातो यदि सानुबन्धकस्य ग्रहणं सिद्धमिन्दूरथः अग्नीरथः। इदं तु न सिध्यति नीरक्तं दूरक्तमिति। अथ रेफ
स्य ग्रहणं सिद्धं नीरक्तं दूरक्तमिति इदं तु न सिध्यति अग्नीरथः इन्दूरथ इति निरनुबन्धकग्रहणे न सानुबन्धकस्येति। नैष दोषः। वर्णग्रह
णे सर्वत्रैषा परिभाषा प्रवर्त्तते। पदस्येत्यत्र विशेषणं षष्ठीति। एतच्च यदस्य पदादित्यत्रैव व्याख्यातं तेन किं सिद्धं भवतीत्याह तेनेति। स्थान
षष्ठ्यां तु रेफेणापदस्य विशेषणाद्रेफान्तस्य पदस्य लोपेन भवितव्यं। अजर्घा इति। एकाचो बशो भष् इत्यत्रैतद् घुसादित्वं पास्पर्द्धेः रेफस्येति। अप

८का०५०२ ॥खरवसानयोः॥ ॥पयश्चापि यस्येति विशेषणात्षष्ठी स्यात्तदा कर्कशः स्याद्वावयपदांतस्यापि रेफस्य विसर्जनीयः स्यात् । स्थानषष्ठ्यां तु रेफेणाप
द्विशेषितेरेफांतस्य पदस्यालोंत्यस्य विसर्जनीयविधानान्न कश्चिद्दोष इति मन्यमान आह रेफांतस्येति । खरि परतोवसाने चेति । परत्वेन तत्त्वे ख
संबध्यते नावसानेनासंभवात् । येन वर्णेन विरम्यते स एवावसानं स्याद्धि रविर्णास्यानुच्चारणात् । तत्र पदांतस्य रेफस्य येन वर्णेन विरम्यते स नावस
ानेन संभवति । इतरस्तु नरवसानमभावरूपं । न चाभावेन पौर्वापर्यं संभवति । तस्मात्खरवसानयोरित्येकापि सप्तमी विषयभेदाद्भिद्यते खरि पर
सप्तमी अवसाने विषयसप्तमीति । अयमाह वर्णेषूच्चरितप्रध्वंसिषु बुद्धिस्थितेषु पौर्वापर्यमस्ति न त्वभावेनापि संभवति । तस्मादुभयत्रा

॥खरवसानयोर्विसर्जनीयः॥ ॥रेफांतस्य पदस्य खरि परतोवसाने च विसर्जनीय आदेशो भवति । वृक्षश्छादयति प्लक्षश्छा
दयति वृक्षश्चिनोति प्लक्षश्चिनोति वृक्षष्ठीकते प्लक्षष्ठीकते वृक्षस्तरति प्लक्षस्तरति । अवसाने । वृक्षः प्लक्षः । खरवसानयोरिति किं
अग्निर्नयति वायुर्नयति । नर्कुटं भवंता कुटं नृपतेः पुत्रं नायं समित्समित्स त्र वृद्धेर्बहिरंगलक्षणत्वात्तदाश्रयस्य रेफस्य ब
हिरंगत्वं तेनासिद्धं बहिरंगमंतरंग इति असिद्धत्वाद्विसर्जनीयो न भवति ४ ॥ ॥श्री४॥ ॥श्री४॥ ॥

पिपरसप्तमीति । उदाहरणेषु खरि विसर्जनीयस्य सत्वं चवर्गे श्चुत्वं टवर्गे ष्टुत्वं । नार्यत्समिति । पञ्चुत्तरपदात्पयः । वृद्धेर्बहिरंगलक्षणत्वादिति ।
बहिर्भूतत द्धिताये क्षत्वाद्वृद्धेर्बहिरंगत्वं । तदाश्रयस्य रेफस्येति । तदाश्रयत्वं तु तयोः सह विधानात् । उरण्रपर इत्येतद्धि गुणवृद्धिविधिशिरे
कतामापद्य रपरत्वं विधत्ते तेन वृद्धेर्यन्निमित्तं तदेव रेफस्यापि अमस्तस्याबहिरंगत्वं । विसर्जनीयस्तु खरमात्रमाश्रित्य भवन्नंतरंगः । ननु बहि
रंगपरिभाषा वारऊडित्यत्र ज्ञापितत्वान्नदेशात् ततः किं । तस्यां कर्तव्यायां विसर्जनीयः पूर्वत्रासिद्धमिति सिद्धः । सा कथमंतरंगमपश्यं
ती बहिरंगस्यासिद्धत्वमापादयति । नैष दोषः । कार्यकालं संज्ञापरिभाषं न तत्र च परिभाषान्तरं बहिरंगपरिभाषाया अप्यत्र प्रकरणे प्र रामं
वृत्तिरविरुद्धा ४ ॥ ७ ॥ ॥

पुमः खय्यम्परे ॥ ॥ पुंसः सकारात्पूर्वविशिष्टो यो भागः तस्यायं निर्देशः। सकारस्य संयोगान्तलोपे कृते तस्यैव कार्यित्वात्। अमिति प्रत्याहारस्य
ग्रहणं न द्वितीयैकवचनस्य व्याप्त्या प्रत्याहारेणाह्वचर्यात्। पुंश्चलीति। पचादौ चल इति पाठान्ङीप्। पुंश्चलीति षष्ठीसमासः। पुंस्कामेति।
पुमांसं कामयत इति शीलिकामिभिक्षाचरिभ्यो णः इति णः। तस्मात् सकार एवादेशो वक्तव्य इति। कुप्वोः xकxपौ चेत्यत्रैतन्न ऊह्यम्। द्विसका
रकनिर्देशपक्षे त्विति। यदा पूर्वसूत्रे द्विसकारको निर्देश इति पक्षस्तदेत्यर्थः। सः इत्यनुवर्तत इति। ननु चरि अपि ग्रहणतः सोऽपि प्राप्नोतीत्यत

पुमः खय्यम्परे ॥ ॥ पुमिति लुप्तषष्ठीकं पदम्। अमि परतः। पुंश्चलीयं स्कामा पुंस्पुत्रः पुंस्कंवलः। पुंश्चली पुंस्कामा
पुंस्पुत्रः पुंस्कंवलः। पुंस्काम इत्येवमादिषु विसर्जनीयस्य कुप्वोः xकxपौ चेति प्राप्नोति तस्मात्सकार एवादेशो वक्तव्यः।
द्विसकारनिर्देशपक्षे तु पूर्वस्मादेव सूत्रात्स इत्येतदनुवर्त्तते। कृत्वं त्विह न संभवति संबंधानुवृत्तिस्तस्येति। खयी
ति किम्। पुंदासः पुंगवः। अम्पर इति किम्। पुंक्षीरं पुंक्षुरः। परग्रहणं किम्। पुमाख्युः पुमाचारः॥ ॥ श्री ॥ ॥ छ ॥

आह कृत्वं त्विति। असंबंधे कारणमाह संबंधानुवृत्तिस्तस्येति। रु इति कर्त्तोऽनुवृत्तौ यस्मात् सौ स्वसंबंधिना षः संवैष तमनुवर्त्तते न च
ह्यागत तस्मादित्यर्थः। पदान्तं बध्यत इति संबंधं यस्मादिह स्वसंबंधिना संबद्धमेवानुवर्त्तते तस्मादित्यर्थः। कृत्वं रुत्वं त्विहानुवर्त्तमानम
पि न तु वसोः संबुद्धाविति स्वेन संबंधिना संबद्धमेवानुवर्त्तते तस्य प्रयोजनं संबंधानुवर्त्तते रणोः संबंधो माभूदिति। पुंदासादयः षष्ठीस
मासाः। पुंगव इति गोरतद्धितलुकीति टच्समासान्तः। परग्रहणे क्रियमाणे खय्यपि परतो योऽम् तत्रैव स्यात्पि विज्ञायेत तेन पुमाख्युः पुमाचा
र इत्यत्रैव स्यात्॥ ॥ छ ॥ ॥ छ ॥ ॥

८ का॰ प॰ ३ नश्छव्यप्रशान्॥ ॥प्रशान्वर्जितस्येति। छत्रेत्वप्रशानिषष्ठ्यर्थे प्रथमा। टीकृतिर्गमर्थोनुदात्तेन। स्पृहः स्वङ्ग्रहणाप्रदेशास्तत्र कुशलः त्सरु
कः। आकर्षादिभ्यः कन्॥ ॥दीर्घादटि समानपादे॥ ॥एकपर्यायः समानशब्दः। समानपाद इत्युच्यते तत्रेदं न सिध्यति। यज्ञामदेयं ज्रियान्दे
नदेवाँ ईलामहा इति। छोंरस्त्वाऽऽविष्यति॥ ॥नॄन्पे॥ ॥षष्ठ्यर्थे प्रथमा। एवमुत्तरत्रापि। परः सकार उच्चारणार्थः यकारमात्रं निमित्तं॥ ॥

॥नश्छव्यप्रशान्॥ ॥नकारस्य पदस्य प्रशान्वर्जितस्य रुर्भवत्यम्परे छवि परतः भवाँश्छादयति भवांश्छादयति भवाँश्चिनोति भवाँष्टी
कते भवाष्टीकते भवाँस्तरति भवांस्तरति। छवीति किं भवान्करोति। अप्रशानिति किं प्रशान्छादयति प्रशान् चिनोति। अम्पर इत्येव भ
वान्त्सरुकः॥ ॥उभयथर्क्षु॥ ॥नकारान्तस्य पदस्य अम्परे छवि परत उभयथा भवति रुर्वा नकारो वा अस्मिन्विषये प्रयोगे तस्मिं
स्त्वा दधामि तस्मिंस्त्वा दधामि। ऋक्ष्विति किं तांस्त्वं वोदस्मु खाहिज्ञान्॥ ॥दीर्घादटि समानपादे॥ ॥नरु इति वर्तते। नकारस्य दीर्घादु
त्तरस्य रुर्भवत्यटि परतस्तौ चेन्निमित्तनिमित्तिनौ समानपदस्थौ। ऋक्ष्विति प्रकृतत्वादृक्पाद एव गृह्यते। देवाँ अच्छा दीद्यत। महाँ
इन्द्रो य ओजसा। महाँ असि। दीर्घादिति किं अहन्नहिं। अटीति किं इष्मान्क्षत्रियान्। समानपाद इति किं यातुधानाननुपस्पृश। उभ
यथेत्येव आदित्यान्हवामहे॥ ॥नॄन्पे॥ ॥नॄनित्येतस्य नकारस्य रुर्भवति पकारे परतः। अकार उच्चारणार्थः। नॄँः पाहि नॄँः पाहि
: नॄँः प्रीणीहि नॄँः प्रीणीहि। प इति किं नॄन्भोजयति। उभयथेत्यपि केचिदनुवर्तयन्ति नॄन्पाहि इत्यपि यथा स्यात्॥ ॥स्वतवान्पायौ
॥ ॥स्वतवान्नित्येतस्य रुर्भवति पायुशब्दे परतः। स्वतवाँः पायुरग्ने। स्वतवाः पायुरग्ने॥ ॥कानाम्रेडिते॥ ॥कानित्येतस्य रुर्भवत्या
म्रेडिते परतः। कांस्कानामन्त्रयते। कांस्कान्भोजयति। अस्य ककस्कादिषु पाठो द्रष्टव्यः। तेन कुप्वोः ×क×पौ च न भवति। समः सुटि संस्तो वा
सकारो नुवर्तते स एवात्र विधीयते पूर्वेषु तु योगेषु संबंधानुवृत्तेरस्य नाम्रेडितसंबंधः। आम्रेडित इति किं कान्पश्यति ३

स्वतवान्पायौ॥ ॥तुरुढौसौत्रो धातुः ततोसुन्। स्वं तवो यस्यासौ स्वतवान्। हकुस्ववः स्वतवसां छंदसीति नुम्॥ ॥कानाम्रेडिते॥ ॥कान्का
नीति वक्तव्ये आम्रेडितग्रहणं यत्र द्विर्वचनं तत्रैव यथा स्यात्। इह मा भूत्। कान्कान्पश्यतीति। एकोत्र किमशब्दः प्रश्ने द्वितीयः क्षेपे। समः सुटी रगा०
सस्तो वा सकारो नुवर्तते इति। यद्येवं पूर्वेष्वपि योगेषु स एव प्राप्नोति सत्यं आहपूर्वयोगेष्विति ३ ॥ ॥ ॥७॥ ॥७॥ ॥

आतोऽटि नित्यं॥ ॥केचिदिति। तैत्तिरीयाः। अनुस्वारमधीयत इति सूत्रकारादरात्। नियमग्रहणमनर्थकमात्रं भ्रमामभ्यासे इत्युक्तो विधिः सिद्धः॥
अस्यार्थे प्रयोजनं नियमो यथा स्यादाततएवादिरिक्ष्यघोषात इति। केमर्थकान्नियमो भवतीति विधेयं नास्ती नियमस्त्वाह इह वाप्तिविधेयं किं। नित्यो नु
नासिकः॥ ॥अनुनासिकात्॥ ॥अस्य शब्दो त्राध्याहर्तव्य इति। अत्र सप्ताहारे यथा शब्दस्य श्रुतत्वात्र तद्येषे पर्यायेणानुनासिकादिरिति षष्ठ्यां
च मीमांस्यात परश शब्दश्च दिग्योगलक्षणा मार्थ्यं इति निर्णये पूर्वस्मिन् कल्पे रोः पूर्वस्मादनुनासिकाद्व्यवयतोऽनुस्वारो विज्ञायेत नैवतस्मात्स्पष्टयते। इत्यस्मिं

आतोऽटि नित्यं। ॥आटि परतो रोः पूर्वस्याकारस्य स्थाने नित्यमनुनासिकादेशो भवति॥ दीर्घादटि समानपाद इति सत्त्वं वर्तते ततः पूर्वस्या
नुनासिकविकल्पे प्राप्ते नित्यार्थं वचनं। देवाँ अच्छा दीद्यत। महाँ इन्द्रो य ओजसा। महाँ असि। केचिदनुस्वारमधीयते छान्दसो वर्णव्य
त्ययो द्रष्टव्यः। आ न इति किं। ये वा वनस्पतीरनु। अटीति किं। भवाँश्छादयति। भवाँश्चरति। नित्यग्रहणं विस्पष्टार्थं॥ ॥अनुना
सिकात्परोऽनुस्वारः॥ ॥अत्र शब्दोऽत्राध्याहर्तव्यः तदपेक्षया चेयमनुनासिकादिति पंचमी अनुनासिकाद्योऽन्यो वर्णो रोः पू
र्वो यस्मान्नुनासिको न कृतः ततः परोऽनुस्वार आगमो भवति। वस्पति समः सुटि संस्कर्ता संस्कर्तुं संस्कर्तव्यं। पुमः खय्यम्परे
पुंस्कामा पुंस्पुत्रः पुंस्फलः। केचित्तु परशब्दमेवान्यार्थं वर्णयन्ति अनुनासिकात्परोऽनुनासिकादन्यत्र अनुस्वारो भवति। य
स्मिन्पक्षेऽनुनासिको नास्ति तत्रानुस्वार आगमो भवतीत्यर्थः। कस्यागमो भवति रोः पूर्वस्येति यत्रेतो। आदेशानामादेशो न भ
विष्यति॥ ॥श्री४॥ ॥
स्त्वनुनासिकादन्योऽनुस्वारो भवतीत्यर्थो भवति तत्र चानर्थकं परग्रहणं न ह्यनुस्वारोऽनुनासिकापेक्षया अन्यत्वं व्यभिचरतीति तस्मात् स्वशब्दो
ध्याहार्यः स च परशब्दापेक्षया पंचम्यंते। ध्याहार्यः। पूर्वस्येत्येतेन च संबन्धात्तु वृत्तेन परशब्देनेन योगात् सं च पंचम्यंतं विपरिणाम्यते एवं स्थिते तेषो र्थः
संपद्यते तं दर्शयति अनुनासिकाद इति। कः पुनरस्माद्विशेषस्यानुनासिको न कृत इति। अनुस्वार आगमो भवतीति। दिला धागम
लिंगाभावेऽपि परशब्देनानुस्वारस्य देशविशेषसंपादनादागमत्वं यथा न बाध्यते पूर्वस्येति॥ ॥७॥ ॥७॥ ॥

एका॰पृ॰२

॥समः सुटि॥ ॥मोनुस्वार इत्यनुस्वारिग्रहणमेव वचनं न। संस्कर्त्तेति। संपर्युपेभ्यः करोतौ भूषण इति सुट्। समो मकारस्य रुत्वं तस्य विसर्ज्ज
नीयः तस्य वा शरीति विकल्पेन प्राप्ते पक्षान्तरं मकारो भवतीति तथा दर्शितं। कथं पुनरस्मिन् सूत्रे मकारो निर्दिश्यत इत्याह समः सुटीति द्वि
मकारको निर्देश इति। स च सुटः मकारो संदेहाभावात्त्र व्यतिरेकेणाद्विमकारकत्वं वस्तुतस्तु त्रयः मकाराः एको विभक्तिसंबंधी द्वितीय
आदेशस्तृतीयः सुट्संबंधी। यदि तर्हि मकार आदेशो विधीयते अनुनासिको न प्राप्नोति। यस्मादत्र ग्रहणं रुत्वमिह संयोगप्र
तिपत्त्यर्थमिसुक्तं। नैष दोषः। अत्र रुप्रकरणे यद्विधीयते तदुपलक्षणार्थं तत्र रुग्रहणं। एतेन पूर्वस्य त्रेरोः पूर्व इति व्याख्यानं। तदत्र सत्वे कृते पश्चा

॥समः सुटि॥ ॥रुरिति वर्त्तते। समित्येतस्य रुर्भवति सुटि परतः संहितायां विषये। संस्कर्त्ता। संस्कर्त्तुं। संस्कर्त्तव्यं। संस्कर्त्ता
संस्कर्त्तुं संस्कर्त्तव्यं। अत्र रोर्विसर्ज्जनीये कृते वा शरीति पक्षे विसर्ज्जनीयः प्राप्नोति स च व्यवस्थित विभाषात्वादिष्यते नेति
सकार एवात्र भवति। एतस्मिन्नेव वा सूत्रे सकार आदेशो निर्दिश्यते सः सुटीति द्विसकारकोयं निर्देशः। समः इति किं
उपस्कर्त्ता। सुटीति किं। संस्कृतिः संभवति। कश्चिदाह संपुंकानां सत्वं वचनं विधौ सत्वं निष्प्रसंग इति संस्कर्त्ता पुंस्कामा का
स्कानिति २ ॥ ॥श्रीः॥ ॥

पूर्वस्यानुनासिकस्तदा सत्वस्यासिद्धत्वाद्रुत्वाभावात् न चिवेति द्विर्वचने शरोसरीति णाक्षिके लोपे द्विमकारकस्त्रिमकारको वा प्रयो
गः पदात्वनुस्वारस्तदा योगवाहानां प्रसाहार उपदेशवोदना त्रेपच हल्वाद्रोहरीति वा लोपे द्विसकारक एकसकारको वा प्रयोगः पक्षा
त्वनुस्वारस्य हल्त्ववदच्त्वमपीष्यते तदा ततः परस्य द्विर्वचनं य पक्षे सकारत्रयमपि भवति। तदेवं पंचरूपाणि भवंति। अनुनासिकपक्षे द्वौ
सकारौ त्रयो वा अनुस्वारपक्षे द्वावेक स्त्रयो वा। पंचस्वपि पक्षेषु शरः खय इति वा ककारस्य द्विर्वचने कृते दश रूपाणि भवंति। समो वा लोपमे रा॥०
के एके आचार्याः समो विकल्पेन लोपमिच्छंति। अत्राप्यनुनासिकानुस्वारौ भवतस्तत्रानुनासिकपक्षे सकारस्यानचि चेति द्विर्वचनेपा
क्षिके च लोपे एक सकारत्वमपि कदाचिद्भवति तत्रापि ककारस्य यक्षे द्विर्वचमिति द्वादशरूपाणि भवंति २

॥मतुवसो रु संबुद्धौ छंदसि॥ ॥युवोरनाकाविति वन्मतुवसोरिति निर्देशः। अनुबंधपरिहाणेन वामकारांतस्य च सो ग्रहणं। निपातनाच्चाल्पा
च्तरस्य परनिपातः। रुरित्यविभक्तिको निर्देशः। मरुत्व इति। अयरुत्रिवत्वं। नसो मत्वर्थ इति भसंज्ञा। हरिवो मेदिनमिति। छंदसीर इति वत्वं। सं
योगांतलोपो रोरुत्वे सिद्धो वक्तव्य इति वचनात् हशि चेत्युत्वं। वन इति। क्वनिब्वनियोः सामान्येन ग्रहणं। अनुबंधानिर्देशात् अनुबंधकपरि
भाषाया अनुपस्थानात्। क्वनिपोपि ग्रहणं। प्रातरित्व इति। प्रातरेतीत्यस्मादन्येभ्योपि दृश्यंत इति क्वनिप्। ह्रस्वस्य तुक्। अवशब्दस्य चेति। सर्वथेति द्र
ष्टव्यं पर्थके लोसमर्थे भाषायामभावात्। उपसंख्यानं प्रसक्तं च छंदसि निपातनविज्ञानं इति। एतदेव विवृणोत्यथवेति। अवशब्दश्चैतन्निपातमेव विज्ञेय

मतुवसो रु संबुद्धौ छंदसि॥ ॥पदस्येति वर्त्तते। मत्वंतस्य वस्वंतस्य च पदस्य रु इत्ययमादेशो भवति संबुद्धौ परतः छंदसि विषये।
मत्वंतस्य तावत्। इंद्र मरुत्व इह पाहि सोमं। अग्ने कुर्मीह हरिवो मेदिनं त्वा। मरुतो स्य संतीति हरयोस्य संतीति मतुप्। मतुप्रत्यये हलुङ्यादि
लोपे संयोगांतस्य लोपे कृते नकारस्य रुर्भवति। वस्वंतस्य खल्वपि मीढ्वस्तोकाय तनयाय। इंद्र साह्वः। क्वसोर्निपातनं दाश्वान् सा
ह्वानिति। मतुवसोरिति किं। ब्रह्मन्स्तोष्यामः। संबुद्धाविति किं। एवं विद्वानग्निमाधत्ते। छंदसीति किं। हे गोमन् हे पयस्विन्।
वन उपसंख्यानं कर्त्तव्यं। यस्त्वायंतं वसुना प्रातरित्वः। इत्वः प्रातः पूर्वस्यैक्वनिपि रूपं। विभाषा भवद्भगवदघवतामोच्चावस्य।
छंदसि भाषायां च भवत् भगवत् अघवत् इत्येतेषां विभाषा रुर्वक्तव्यः। अवशब्दस्य च ओकारादेशः। हे भोः। हे भोः। हे भवन्।
हे भगोः। हे भगवन्। हे अघोः। हे अघवन्। निपातविज्ञानाद्वा सिद्धं। अथ वा भो भगो अघो इत्येते यथा दृश्यो निपाता द्रष्टव्याः। असंबु
द्धावपि हि द्विवेचनबहुवचनयोरपि दृश्यंते। भो देवदत्त यज्ञदत्तौ। भो देवदत्त यज्ञदत्त विष्णुमित्राः। स्त्रियामपि दृश्यंते भो ब्राह्मणि।
सेहि ताधिकारश्च नरत्रोपयुज्यते तत्र भिन्नपदस्थो निमित्तनिमित्तनिमित्तनिमित्तिनौ नश्च अप्रशान्निति॥ ॥

मित्याह असंबुद्धावपि हीति। स्त्रियामपीति। भो ब्राह्मणीति। विभक्तिनिमित्तेषु कार्येषु लिंगविशिष्टपरिभाषा नोपतिष्ठत इत्युक्तं न चाविभक्तौ
लिंगविशिष्टग्रहणादिति। तेन भवतीशब्दस्य रुत्वोत्वे न स्यातां। अथापि स्यातामेव मप्यपीकारस्य रुत्वे अवशब्दस्य चोकारे रूपं न सिध्यतीति तस्मा
दसंबुद्धौ स्त्रियां च दर्शनान्निपाता एवेति विज्ञेयं। निपातत्वं च विभक्तिस्वरप्रतिरूपकत्वेनेति। तन्वसत्त्वस्मिन्नुपसंख्याने भोरसादिकः शब्दो विभ
क्तांतो नास्ति यत्प्रतिरूपकाएते स्युः तस्मात् सोशब्दान्ते निपाताः भो भगो अघो इत्यत्र सत्त्वे निर्दिष्टाः चादिषु गाषु न्यापदितमाः। तदेवं प्रसक्तमात
मुपसंख्यानं। अन्ये त्वाहुः इतराण्यपि दृश्यंत इति भवदादियोगे
विधीयमानात् सिलादयस्ततो भोः इत्यादावपि यथा स्युरिति वार्त्ति
म इति। अन्ये तु भवदादेरपरिगणितत्वान्निपाता एव भोरसादयो
न विभक्तिमन्यंते॥ ॥७॥ ॥ ॥

।।अत्रानुनासिकः।। ।।पूर्वत्वमिदमापेक्षिकं ह्रस्वत्वं च यत् निहितं न वर्तते परे तत्पूर्वत्वं संभवति योरनुनासिकस्य च सह विधानात्तत
स्तावस्य ह्विं धीयते। तदपेक्षमेव पूर्वत्वं विज्ञापयतीत्याह परस्य स्थान इति। अथात्र ग्रहणं किमर्थमत्र ह्प्रकरणे यथा स्यात् अधिका
रत्वेन सिद्धं अधिकारे हि सति ह्रस्वानुनासिकयोः सह विधानात्तत्र प्रसंगो न त्वादात्र ग्रहणमिति। अवधारणमत्र इष्टं
करणेव सहेति। न त्वधिकारत्वेन सिद्धमित्युक्तमत आह अधिकारेति। अस सत्र ग्रहणे अनुनासिकाधिकारस्य परिमाणं

।।अत्रानुनासिकः पूर्वस्य तु वा।। ।।अधिकारोयं इत उत्तरं यस्य स्थाने ह्विंधीयते ततः पूर्वस्य वर्णस्य
वानुनासिकादेशो भवति। इस ऐतत् इधिक्तं तवेदि तवां व सति। समः सुटि संस्कर्त्ता संस्कर्त्तु संस्कर्त्तुं संस्कर्त्ताम्
संस्कर्त्ताम्। अत्र ग्रहणं ह्ग्रहणेन सह संनियोगप्रतिपत्त्यर्थं। अधिकार परिमाणपरिज्ञाने ह्यसति टोटे लोप इत्ये
वमाद्यापि वक्ष्यमनुनासिकआशंकोन १ ।। ।।श्री४।। ।।श्री४।। ।। ।।

न ज्ञायेत एतावत्सु योगेष्वस्य व्यापार इति ततश्च ह्प्रकरणस्य त्राप्यस्याधिकारः संभाव्येतेत्यर्थः। तु शब्दः परस्मात्कार्यिणः
पूर्वस्य विशेषणार्थः परस्य निमित्तं ह्रस्वं पूर्वस्य तु वानुनासिक इति। वावचनमनर्थकं ज्ञापकार्थं सिद्धपदत्रयमुत्तरत्र सूत्रे य रामः०
स्यानुनासिको न विहितस्तस्मात् द्वोः पूर्वस्मात्परमनुस्वारं शास्ति ज्ञापते विकल्पेनायं भवतीति। न हि नित्ये सिन्धिर्घीसयोः
पूर्वः संभवति यस्यानुनासिको न विहितः १

।तत्राद्येनावेवहोषो योर्वर्णयोः पक्ष्ययोः ढिसं ढिसामिसाहो प्रसंगः कृशिष्यतीत्यादो चाप्रसंगइतितस्मादंसः पक्ष्यआश्रीयते।यद्
देशप्रत्यययोरितिषष्ठीभेदेनसंबध्यतइत्याहि।अत्रचज्ञापकं।यदयमुत्तरसूत्रेद्विमिग्रहणंकरोतितज्ज्ञापयत्यादेशसमानाधिकर
णाषष्ठीनअधिकरोति।अन्यथाद्विसेरादेशत्वादेवतस्यसकारस्यानेनैवषत्वसिद्धेरनर्थकंतत्स्यात्।यत्त्वसात्पदाद्योरितिषत्वप्र
तिषेधंशास्तितज्ज्ञापयतिप्रत्ययेः वयवषष्ठीनसमानाधिकरणेति।अन्यथासीतिसकारस्याप्रत्ययत्वात्तत्वस्यप्राप्त्यभावात्
नर्थकंतत्स्यात्।ननुचादेशप्रत्येतिषत्वापेक्षयान्याथ्यानषष्ठीप्रत्ययस्येतिसकारापेक्ष्यावयवषष्ठीतिसह विवक्षाभावाद्द्वंद्वानुप
पत्तिः।नैषदोषः।पूर्वोक्तज्ञापकद्वयात्सहविवक्षाया अभावेपिद्वंद्वोभविष्यति।यदिप्रत्ययावयवस्यषत्वमुच्यते।इंद्रोमावक्तत्
देवासक्ष्रदित्यत्रषत्वंनप्राप्नोतिप्रत्ययएवात्रसकारोननुप्रत्ययस्यावयवोः तत्राह इंद्रोमातक्ष्रदित्यादि।इहाशेः सरन्।अपस्र
मित्यत्रषत्वंभवति।तस्येवतुक्रुब्भ्रज्जमदिभ्यःकिरितिविहितस्यषत्वंनभवतिकुसरं।धूसरं।तथावृनचरीत्यादि।षत्वंनभवति।कुसरं
।धूसरं।तथावुनाविहितस्यककारस्यत्रभवतिवर्सतसीमित्यत्रनभवतिबहुलवचनात्प्रत्ययसंज्ञायाअभावाद्वा॥ ॥शासिवसि॥ ॥
अन्वशिषदिति।सर्त्तिशास्त्यर्तिभ्यश्चेत्यादिनाङ्लेरङ्।शासइदङ्हलोरितिइत्ति।वजादित्वात्संप्रसारणंवसतिक्षुधोरिट्।जक्षुरिति।लिघ
सतरस्यामित्यदुर्वेऽस्त्यादेशः।गमहनेत्युपधालोपः।अक्षन्निति।अदेर्लुङ्।लुङ्सनोर्घस्लृमंत्रेघसेत्यादिनाम्लेर्लुक्।युक्तंशा
सिवस्योरत्वादेशार्थत्वंचननिमित्तंघसेस्त्वयुक्तमादेशत्वादित्यतआह घसिरपिघस्यादेशइति।आदेशोपः सकारइतितत्रास्थितमितिमा
वः।पत्वनादेशो घसिः तस्येहग्रहणंनभवतिविरलप्रयोगत्वात् १८

स्तौतिण्योरेव॥ ॥षत्वभूतऽइति। षत्वं प्राप्ते कृतषत्वस्यार्थः। आदेशसकारस्येति। प्रत्ययसकारस्त्वसंभवान्न संबध्यते। सुष्वापयिषतीति। षु
ति स्वाप्योरित्यभ्यासस्य संप्रसारणं। सिषेक्षतीति। सिचिश्च्णो। सुसूषत इति षूङ् प्राणिप्रसवे। पिरिस्पेपदयादेतुश्चरणोरस्य स्वरूपं। पटिमि
ङ्गसस्यारंभो नियमार्थः सकारस्तर्हि किमर्थस्तत्रादेव कारकरणामिति। अथ विपरीते वधारणे को दोष इत्यत आह स्तौतिण्योः षण्येवे
ति। इह च स्यादेवेति। षण्येवेत्यनेन त्ववधारणेन प्रत्ययांतरे स्तौतिण्योः षत्वं भवत्येव न तु षात्वं तरस्य षणीनन्तश्चाभिहितदोषह्य
प्रसंगः। सिषेवेति। षणीत्यनुच्यमाने प्रत्ययमात्रे नियमः स्यादभ्यासस्य यदि षत्वं भवति स्तौतिण्योरेवेति। ततश्च सिषेवेत्यादौ न स्यात्।
को विनते नुरोध इति। विनतमिति षत्वणत्वयोः प्रातिशाख्येषु प्रसिद्धिः। एकवर्णमिनो कारं विनते मेति नः पर इति यथा। अनुरुध्यते

स्तौतिण्योरेव षण्यभ्यासात्॥ ॥स्तौतेर्ण्यन्तानां च सति षत्वभूते आभ्यामादिर्णाउत्तरस्यादेशसकारस्य मूर्द्धन्यादेशो भव
ति। तुष्टूषति। ण्यंतानां। सिषेवयिषति सिषंजयिषति सुष्वापयिषति। सिद्धे सस्यारंभो नियमार्थः। स्तौतिण्योरेव षसयभ्या
सात् यथा स्यात् अन्यस्य मा भूत्। सिसिक्षति। सुसूषति। एवकारकरणमिष्टतोवधारणार्थं। स्तौतिण्योः षण्येवेति हि विज्ञाय
माने तुष्टावेत्यत्र न स्यात्। इह च स्यादेव सिसिक्षतीति। षणीति किं। अन्यत्र नियमो मा भूत् सिषेच। को विनते नुरोधः अविन
ते नियमो मा भूत् सुषुप्सतीति प्रासति। कः सानुबंधे नुरोधः षकारमात्रे नियमो मा भूत् सुषुपिषइंड्। स्वयेलिंटि थ्यासस्य
इति रूपं॥ ॥४॥ ॥
आनुकूल्येन प्राप्यत इत्यनुरोधः प्रयोजनं। कृतषत्वस्य निर्देशः किं प्रयोजनमित्यर्थः सुषुप्सतीति। रुदविदेत्यादिना स
नः कित्वं वचिस्वपीत्यादिना संप्रसारणं। सतीमुच्यमाने सन्मात्रे नियमः स्यात्। ततश्चयथा षत्वभूते सनिधात्वं तरस्य षत्वं न भवति एव
मिहाषत्वभूतेपि न स्यात्। कः सानुबंधे नुरोध इति नकारोत्रानुबंधः नकारानुबंधवतोग्रहणे किं प्रयोजनमित्यर्थः। णत्वस्य तु प्रयोजनं
नष्टछतित स्यल स्णणप्राप्तत्वात्। सुषुपिषइ मिति। स्वये निर्दिष्टौदसत्वा छ्यस्यपो बहुलमिति यासस्य थासः सेत्यसंयोगाल्लिट् इति कित्वे
त्वात्पूर्वं संप्रसारणं द्विर्वचनं। कादिनियमादिट् इडत्रष्टेपरतो यादेशः। लोपः शाकल्यस्येति यलोपः। अत्र नियमाभावादभ्यासात्परस्य

॥सिचो यङि॥ ॥परिसेसिच्यत इति। अत्राभ्यासस्य सकारस्य उपसर्गात्सुनोतीत्यादिना प्राप्तिः। धातुसकारस्य त्वादेशसकारत्वात्स्था
दिष्वभ्यासेनेत्येतस्माद्। ननु चोपसर्गात्प्रतिषेधविषये षत्वमारभ्यते तेन यथैव पदादिप्रतिषेधं बाधते एवं सिचो यङीत्येतमपि बा
धेत तत्राह उपसर्गाद्यप्राप्तिरिति। येन नाप्राप्ते तस्य बाधनं भवति नाप्राप्ते च पदादिलक्षणे प्रतिषेधे उपसर्गात्षत्वमारभ्यते।
सिचो यङीत्येतस्मिंस्तु प्राप्ते वाप्राप्ते च। अथवा पुरस्तादपवादा अनन्तरान्विधीन्बाधन्ते तेन मध्ये निति। अनेनैतद्दर्शितं स्थादि

॥सिचो यङि॥ ॥सिचः सकारस्य यङि परतो मूर्द्धन्यादेशो न भवति। सेसिच्यते। परिसेसिच्यते। उपसर्गाद्यप्राप्तिः
सा पदादिलक्षणमेव प्रतिषेधं बाधते न सिचो यङीति तस्मादयं प्रतिषेधः सर्वत्र भवति। यङीति किं। अभिषिषिक्ष
ति॥ ॥सेधतेर्गतौ॥ ॥गत्यर्थे वर्त्तमानस्य सेधतेः सकारस्य मूर्द्धन्यादेशो न भवति। अभिसेधति गाः। प
रिसेधति गाः। चाक्रयतीत्यर्थः। गताविति किं। शिष्यमकार्यात्प्रतिषेधति॥ ॥प्रतिस्तब्धनिस्तब्धौ च॥ ॥प्रतिस्तब्ध
निस्तब्धशब्दयोर्मूर्द्धन्याभावो निपात्यते। प्रतिस्तब्धः। निस्तब्धः॥ ॥सोढः॥ ॥सहिः सोढभूतो गृह्यते तस्य सका
रस्य मूर्द्धन्यादेशो न भवति। परिसोढा परिसोढुं परिसोढव्यं। निसोढा निसोढुं निसोढव्यं। विसोढा विसोढुं विसोढव्यं। सोढ
ग्रहणं किं। परिषहते निषहते विषहते १९

ष्वभ्यासेन चेत्यनेन यथाभिषिषिक्षतीत्यत्र स्तौतिण्योरेवेति नियमं बाधित्वा षत्वं भवति तथैनमपि प्रतिषेधं बाधित्वा धातुसकारस्य प्रस
ज्यत इति॥ ॥सेधतेर्गतौ॥ ॥उपसर्गादिति प्राप्तिः प्रतिषिध्यते॥ ॥प्रतिस्तब्ध॥ ॥स्तम्भेरिति प्राप्तिः प्रतिषिध्यते॥ ॥सोढः॥ ॥सो
ढभूतो गृह्यत इति निष्ठान्तस्य प्रथमा निर्देशाशङ्कामपाकरोति। परिसोढेति। परिनिविभ्य इति प्राप्तेः प्रतिषेधः १९ ॥ ॥ ॥

स.का.प.३

स्तंभुसिवु॥ ॥अत्राद्यस्यस्तंभेरितिप्राप्तिः उत्तरयोस्तुपरिनिविभ्यः सेवसितेति।अभ्यतस्तंभदिति।प्राक्सितादड्व्यवायेपिस्यादिष्वभ्यासे
नचेतिप्राप्तिः।पर्यसीषिवदित्यत्रापि सिवादीनांवाड्व्यवायेपीतिप्राप्तिः।उपसर्गादितिवक्तव्यं किमर्थमित्याहउपसर्गाद्याप्राप्तिरिति॥ ॥
सुनोतेः स्यसनोः॥ ॥अत्रेमाधि[redacted]इतिकरणोहेतोयस्मात्तोतिरणेरेवेतिनियमादभ्यासात्प्राप्तिः स्यादिष्वेवाभ्यास

स्तंभुसिवुसहांचङि॥ ॥स्तंभुसिवुसहइत्येतेषांसकारस्यमूर्द्धन्यादेशोनभवतिचङिपरतः।स्तंभु।पर्यतस्तंभत्व्यतस्तं
भत्अतस्तंभत्।सिवु।पर्यसीषिवत्न्यसीषिवत्न्यसीषिवत्असीषिवत्।सह।पर्यसीषहत्न्यसीषहत्असीषहत्।स्तं
भुसिवुसहांचङ्युपसर्गादितिवक्तव्यं।उपसर्गाद्याप्राप्तिस्तस्याः प्रतिषेधोयथास्यादभ्यासाद्याप्राप्तिस्तस्यामाभूदिति
तत्प्रापैवोदाहृतं॥ ॥सुनोतेः स्यसनोः॥ ॥सुनोतेः सकारस्यस्यसनोः परतोमूर्द्धन्यादेशोनभवति।अभिसोष्यतिपरि
सोष्यति।अभ्यसोष्यत्पर्यसोष्यत्।सनिकिमुदाहरणं।सुसूषति।नेतदस्ति।अत्रस्तौतिण्योरेवषण्यभ्यासादितिनियमा
न्नभवति।इदंतर्हि अभिसुसूषति।एतदपिनास्ति स्यादिष्वभ्यासेनचाभ्यासस्येतिनियमादुपसर्गादप्राप्तिरेव।इदंतर्हिसु
सूषतेः क्विप्प्रत्ययः अभिसुसूः इत्युदाहरंनीति।अत्रहिसनूषत्वभूतोनभवतीतिअभ्यासात्प्राप्तिरस्तीति।स्यसनोरितिकिं
सुषाव॥ ॥
स्येतिनियमादुपसर्गादप्यप्राप्तिः तस्मादभिसुसूरित्युदाहरंतिअत्रवाकथंषत्वप्रसंगोतआह अत्रहीतियथाचात्रसनूषत्वभूतोनभ
वतितथासनोतेरनर्थकत्वोक्तं।अभ्यासात्प्राप्तिरिति।अभ्यासग्रहणादुपसर्गात्प्राप्तेरसंभवादभ्यासेनव्यवहितत्वान्नधातुसकारस्यप्रसं ११५०
गः नाप्यभ्यासस्यसकारस्यस्यादिनियमेनक्वाचन्निमित्तत्वात् एवंचाभिग्रहणामतंत्रंसुसूरित्येवोदाहर्तव्यं॥ ॥१ ५॥ ॥

॥स्थादिष्वभ्यासेन॥ ॥ट्वेतेवाकोऽस्थादिष्वभ्यासेन अवायेऽपि षत्वं भवति। अभ्यासस्य च षत्वं भवति तेष्वेव स्थादिष्विति। तत्राद्यं विध्यर्थं द्वितीयं नियमार्थं। अषोपदेशार्थमिति। षोपदेशे तु परिष्वा सती सादेशो मा भा न्यल क्षणो नैव सिद्धं। अभिषिषेणयिषतीति। सेनया अभियातुमिच्छतीति विग्रहे समस्यापपाशेत्यादिना णिच्। टिलोपस्ततः सन् द्विर्वचनं ह्रस्वः। एचइग्घ्रस्वादेशे। अभ्युत्पन्नः सेनाशब्दः। यद्वा महनेन वर्तनं इति सेना। महस्य सः संज्ञायामिति सादेशः यद्वा तु सिनोतेर्नैप्रत्यये सेनेति व्युत्पाद्यते तदायमषोपदेश एवेति। अभित ह्याविति। आदेश सकारस्याप्यभ्यासषत्वं न सिद्ध्यति इत्याकोऽभ्यागात्। अभिषिषिक्षतीति। षघप्रत्ययमादेशसकारः इणाः परस्तथाप्यभ्यासमये ष्षत्वं न सि

॥स्थादिष्वभ्यासेन चाभ्यासस्य॥ ॥प्राक्सितादिति वर्तते। स्थासेनयसेधसिचेति वक्ष्यति। स्थादिषु प्राक्सितंसशब्दात् द्वृनादभ्यासेन अवायेऽपि मूर्धन्यादेशो भवति अभ्यासस्य चेसे चेतत् द्वितयं। अभ्यासेन अवायमेव वचनं। अषोपदेशार्थं। अभिषिषेणयिषति परिषिषेणयिषति। अवर्णान्ताभ्यासार्थं च। अभितष्ठौ परितष्ठौ। अणिप्रतिषेधार्थं च। अभिषिषक्षति। अभ्यासस्येति वचनं नियमार्थं स्थादिष्वेवाभ्याससकारस्य मूर्धन्यादेशो भवति। तस्मात्र अभिसुसूषति

अभिसिसासति १० ॥ श्री॥ ॥

ध्वतिस्तौतिण्योरेव षणीति नियमात् अतः षणि परतः सिषिङ्क्षुषत्वं नियमेन व्यावर्तितं तदुपसर्गात्प्राप्तं न भवति। अथाभ्यासेति किमर्थं यावताभ्यासेनेत्यत्र क्रियापेक्षायां प्रकरणाद्भवाय इति संबध्यते तच्चापि शाहसनिहितमेव प्रकृतमिति अवाये षत्वं भविष्यति पूर्वसूत्रवत् नार्थोऽभ्यासस्येत्यनेन। आह। अभ्यासस्येति वचनं नियमार्थमिति। नियमस्य स्वरूपं दर्शयति। स्थादिष्वेवेति। विपरीतस्तु नियमो न भवति स्थादिष्वभ्यासस्यैवेति यदि स्यादभ्यासेन अवाये षत्वविधानमनुपपन्नं स्यात्। अभिसुसूषतीति। सुप्रेरणे सन् इग्रहगुहोश्चेति इट् निषेधः। अत्र धातुसकारस्य स्तौतिण्योरेवेति नियमात् षत्वं। अभ्याससकारस्य तस्मान्नियमा

त्षत्वाभावः १०

उपसर्गात्सुनोतिसुवति॥ ॥षुञ् अभिषवे स्वादिः षूप्रेरणे तुदादिः। षोंतकर्मणि दिवादिः। ओतः श्यनीति लोपः। ष्टुञ् स्तुतौ अदादिः। उतो वृद्धिर्लु
कि हलि। ष्टुभ स्तंभे। अनुदात्तेत्। एतेषां षित्पाठनिर्देशोपदुःढि॰ वृत्यर्थः अभिसोषवीतीत्यादि। ष्ठा गतिनिवृत्तौ। सेनयतिरर्णेतः। शपा निर्देशो
न नार्थः। प॰ ङो सेमभवात्। षिधु गत्यां षिधू शास्त्रे माङ्गल्ये च भौवादिकौ। तत्रसेधतेर्गताविति प्रतिषेधादन्यत्र षत्वं। शपा निर्देशोपदुःढि॰ वृ

उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसंजस्वंजां॥ ॥उपसर्गस्थान्निमित्तादुत्तरस्य सुनोतिसु
वतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसंजस्वंज इत्येतेषां सकारस्य मूर्द्धन्यादेशो भवति। सुनोति। अभिषुणोति परिषु
णोति। अभ्यषुणोत् पर्यषुणोत्। सुवति। अभिषुवति परिषुवति। अभ्यषुवत् पर्यषुवत्। स्यति। अभिष्यति परिष्यति। अ
भ्यष्यत् पर्यष्यत्। स्तौति। अभ्यष्टौत् पर्यष्टौत्। अभिषेधति परिषेधति। अभ्यषेधत् पर्यषेधत्। अभिषिषिक्षति परिषिषि
क्षति। सिच। अभिषिंचति परिषिंचति। अभ्यषिंचत् पर्यषिंचत्। अभिषिषिक्षति परिषिषिक्षति। संज। अभिषजति। परि
षजति। अभ्यषजत् पर्यषजत्। अभिषिषंक्षति परिषिषंक्षति। स्वंज। अभिष्वजते परिष्वजते। अभ्यष्वजत पर्यष्वजत। अ
भिषिष्वंक्षते परिषिष्वंक्षते। सेध इति विकरणनिर्देशः सिध्यतिनिवृत्त्यर्थः। उपसर्गादिति किं। दधि सिंचति मधु सिंचति। नि
गताः सेचका अस्माद्देशान्निःसेचको देश इति। नायं सिचेरुपसर्गः। अभिसावकीयतीत्यत्रापि न सुनोतिं प्रति क्रियायोगः किं त
र्हि सावकीयतिं प्रति। अभिषावयतीत्यत्र सुनोतिमेव प्रति क्रियायोगो न सावयतिमिति षत्वं भवति॥ ॥सदिरप्रतेः॥ ॥सदि स
कारस्योपसर्गस्थान्निमित्तादप्रतेरुत्तरस्य मूर्द्धन्यादेशो भवति। निषीदति विषीदति। न्यषीदत् व्यषीदत्। निषसाद विषसाद।
अप्रतेरिति किं। प्रतिसीदति॥ ॥स्तंभेः॥ ॥स्तंभेः सकारस्योपसर्गस्थान्निमित्तादुत्तरस्य मूर्द्धन्यादेशो भवति। अभिष्टभ्नाति
परिष्टभ्नाति। अभ्यष्टभ्नात् पर्यष्टभ्नात्। अभितष्टंभ परितष्टंभ। अप्रतेरित्येतदिह नानुवर्त्तते तेन इहापि भवति प्रतिष्टभ्नाति।
र्थः देवादिकनिवृत्त्यर्थश्च षिधु संराद्धाविति। षिच क्षरणे तुदादिर्मुचादिः। षंज संगे। षंज परिष्वंगे अनुदात्तेत्। दंशसंजस्वंजां शपीति
नलोपः। सिवादीनां वड्‌ व्यपि भवति अभिषिषिचीतीत्यादि। एतेषामड्व्यवायेऽभ्यासव्यवायेऽपि यथासंभवं षत्वं॥ ॥ ८ ॥ ॥

८

राम०

॥सिवादीनां॥ ॥सिवादयः प्रत्यासत्तेः पर्वस्त्रं संनिविष्टा गृह्यन्ते। उभयत्र विभाषेयं तु स्तंभुपोः प्राक्सितादिति शेषाणां प्रेरितत्तेषामप्रा
प्ते॥ ॥अनुविपर्यभिनिभ्यः॥ ॥स्यन्दू प्रस्रवणे अनुदात्तेत्। अनुस्यन्दते मत्स्योदके इति। मत्स्यश्चोदकं च मत्स्योदके जातेरप्रा
णिनामिति सनेन पत्रसर्वाण्यव पचव पदानि अप्राणिवाची निर्गतं कवद्भावः। इह तु मत्स्यशब्दस्य प्राणिवाचित्वादेकवद्भावाभावः। अ

॥सिवादीनां वाड्व्यवायेपि॥ ॥सिवादीनामड्व्यवायेपि परिनिविभ्य उत्तरस्य सकारस्य वा मूर्द्धन्यादेशो भवति
। पर्यषीव्यत पर्यसीव्यत। न्यषीव्यत न्यसीव्यत। व्यषीव्यत व्यसीव्यत। पर्यषहत पर्यसहत। न्यषहत न्यसहत। व्यष
हत व्यसहत। पर्यष्कुरुत पर्यस्कुरुत। पर्यष्टौत पर्यस्तौत। न्यष्टौत न्यस्तौत। व्यष्टौत व्यस्तौत। पर्यष्वजत पर्यस्वजत।
न्यष्वजत न्यस्वजत। व्यष्वजत व्यस्वजत॥ ॥अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु॥ ॥अनु वि परि अभि नि इत्ये
तेभ्य उत्तरस्य स्यन्दतेः सकारस्याप्राणिकर्तृकस्य वा मूर्द्धन्यादेशो भवति। अनुष्यन्दते तैलं अनुस्यन्दते। विष्यन्दते विस्य
न्दते। परिष्यन्दते परिस्यन्दते। अभिष्यन्दते अभिस्यन्दते। निष्यन्दते निस्यन्दते। अप्राणिष्विति किं। अनुस्य
न्दते मत्स्योदके। प्राण्यप्राणिविषयस्यापि स्यन्दतेरयं विकल्पो भवति अनुष्यन्दते मत्स्योदके अनुस्यन्दते अप्राणिषु
इति प्रसज्यप्रतिषेधो न भवति किं तु पर्युदासोयं॥ ॥वेः स्कन्देरनिष्ठायां॥ ॥वेरुपसर्गादुत्तरस्य स्कन्देरनिष्ठायां सकारस्य
वा मूर्द्धन्यादेशो भवति। विष्कन्ता विस्कन्ता। विष्कन्तुं विस्कन्तुं। विष्कन्तव्यं विस्कन्तव्यं॥ अनिष्ठायामिति किं। विस्कन्नः २२

त्राप्राणिष्विति प्रसज्यप्रतिषेधः तेन प्राण्यप्राणिसमुदाये प्रिप्राणपत्तौ तिप्रतिषेधो भवति। असे तु पर्युदासे संभस्यमानाभवि
तमप्यमेत्रात्र षत्वेनेस्याङ्कः। इह यर्थादिस्त्र हरणांशमप्रमकर्तुं एवं वसाधि। अन्चप्रिष्यार्थे तत्ताचकारात्परिनिभ्यश्च ११ ॥

स्का॰पा॰ ३

परेश्च॥ ॥पृथग्योगकरणं सामर्थ्यादिति। अन्यथा विपरिभ्यां स्कन्देरनिष्ठायामिसेवद्ब्रूयात्॥ ॥वेस्कभ्नातेः॥ ॥स्कंभिः सौत्रो धातुः॥
॥इणः षीध्वंलुङ्॥ ॥इणन्ताद्ङ्गात्कारस्य सवेत्याध्वमादीनामिनितथा हि सन्ति च्योषीढ्वमित्यादौ वचनसामर्थ्यात् धीशब्देन मवापस्त्रा
अपणीयः स्यात्। अच्योढ्वमिति। धिचोति सलोपः। इण्ग्रहणं कवर्गनिवृत्त्यर्थमिति। प्रकृतं हीण्ग्रहणं कवर्गेणासंबद्धमिति [illegible]
तदनुवृत्तौ तत्संप्रत्युद्धरिः स्यात्। पक्षीध्वमिति। चोः कुरिति कुत्वे कृते टत्वप्रसंगः। यक्षीध्वमिति। व्रश्चादिना षत्वे कृते षमेः कासी

परेश्च॥ ॥परस्तस्य स्कन्देः सकारस्य वा मूर्द्धन्यादेशो भवति। परिष्कंता परिस्कंता। परिष्कंतुं परिस्कंतुं। परिष्कंतव्यं प
रिस्कंतव्यं। निष्ठायामपि भवति परिष्कन्नः परिस्कन्नः। पृथग्योगकरणं सामर्थ्यादिति निष्ठायामिति नानुवर्त्तते॥ ॥परि
स्कंदः प्राच्यभरतेषु॥ ॥परिस्कंद इति निपात्यते प्राच्यभरतेषु प्रयोगविषयेषु। पूर्वेणाम् ऊर्ध्वे प्राप्ते तदभावो निपात्यते। परि
स्कंदः। प्राच्यभरतेष्विति किं। पूर्वेणात्र विकल्पः परिष्कंदः परिस्कंदः॥ ॥स्फुरतिस्फुलत्योर्निर्निविभ्यः॥ ॥स्फुरतिस्फुल
त्योः सकारस्य निस् नि वि इत्येतेभ्यः परस्य वा मूर्द्धन्यादेशो भवति। निष्फुरति निस्फुरतीति निस्फुरति। विष्फुरति विस्फुरति। निष्फु
लतीति स्फुलति। निष्फुलति निस्फुलति। विष्फुलति विस्फुलति। वेः स्कभ्नातेर्नित्यं॥ ॥वेरुत्तरस्य स्कभ्नातेः सकारस्य नि
त्यं मूर्द्धन्यादेशो भवति। विष्कंभिता विष्कंभितुं विष्कंभितव्यं॥ ॥इणः षीध्वंलुङ्लिटां धोङ्गात्॥ ॥मूर्द्धन्य इति वर्त्तते। इणन्ता
त्तादङ्गादुत्तरेषां षीध्वंलुङ्लिटां धकारस्य मूर्द्धन्यादेशो भवति। च्योषीढ्वं प्लोषीढ्वं। लुङ्। अच्योढ्वं अप्लोढ्वं। लिट्। चकृढ्वे वछृढ्वे।
इणग्रहणं कवर्गनिवृत्त्यर्थं। पक्षीध्वं यक्षीध्वं। षीध्वंलुङ्लिटामिति किं। स्तुध्वे अस्तुध्वं। अङ्गादिति किं परिवेविषीध्वं। अङ्गादिति
किं परिवेविषीध्वं। अर्थवद्ग्रहणादपि सिद्धमेतत्तु नाश्रितं॥ ॥
तिकलं। स्तुध्व इति। लटस्त्वं। समुदायस्त्व अस्तुध्वमिति
। लङ्। परिवेविषीध्वमिति। निहल्व्याश्रो। जुहोत्यादिः स्वरितेत। निजां त्रयाणां गुणः श्लौ विसम्यासस्य गुणः। लिङः सलोपोऽनंत्यस्ये
ति सीयुटः सकारलोपः। अत्र धातुषकारस्य ईध्वं शब्दस्य च यः समुदायस्तदात्मकः षीध्वंशब्दोऽस्तिन त्वसावंगादुत्तरः। षकारान्तं ध्वश
ब्दं नत्तु वेवी स्वेनाव न चोदयति। अर्थवद्ग्रहणादपाजिपरिहरति। एतत्विति। एतदर्थवतो ग्रहणमत्र नाश्रितं। किंकारणं न किंचिन्ना श्रि

॥विभाषेटः॥ ॥अत्रेणश्च इणः इति विशेषणं सोपि षीध्वमादीनां तेषि धकारस्येति दर्शयन्नाह इणः यस्मादिट् इत्यादि। तत्र षीध्व
मो लिट्श्च श्रुतिकृतमानंतर्यं शास्त्रकृतं तु न संभवति। इट इत्यनुकृत्वा अङ्गस्येणो न ग्रहणात्। अत एवानयोः मासविभाषेयं। तथा च
वल्लुङ्प्यलविढ्मारोधिचेति लुमेस्तनिसिच सकारे। इणांतमङ्गाद्ध्वमिजातमातः पर्वस्य निसर्गविधेः प्रसङ्गः। एवं च यथानाकिनि
णांतइष्टमेधिढ्वमित्यादिषु निसटत्वं यदि त्विणंताद्विहितस्य टत्वं तथानतेटत्वमधिढ्वमित्यत्र। तथा। लिहि हो ग्धिन ह्रोढत्वं
लधत्वेषु सत्त्वापि॥ इणंताद्विहितः षीध्वमिति टत्वं प्रसज्यतोतष्येणोल्लुङ्ः गादेशो विहितेध्वमिकर्मणि। अगाध्वमुपमेनेन

॥विभाषेटः॥ ॥इणः परस्मादिट उत्तरे षां षीध्वंलुङ्लिटां यो धकारस्तस्य विभाषा मूर्धन्यादेशो भवति। लविषीढ्वं ९८
लविषीध्वं लुङ्। अलविढ्वं अलविध्वं। लिट्। लुलुविढ्वे लुलुविध्वे। इणः इत्येव आसिषीध्वं। अथेह कथं भवितव्यमुप सि
दिदीपिढ्वमिति। केचिदाहुः इणंतादंगादुत्तरस्यानंतर्यमिहापुरस्य विहितमिति न भवितव्यं टत्वेनेति। अपरेषां ट कौ
र्शनं अंगादिति तत्स्वमते इणः इति वर्तते तत्स्वयकारादेव इणः परो नंतरः इति पक्षे भवितव्यं टी

त्र टत्वं प्रसज्यते। एवं प्रुवोवविः वसीध्वमिति। इष्यते सर्वमेवेनरितिचेन्नाप्रवणिह। तस्मात्मास विभाषैव सर्वत्र ध्वमिति स्थितं त
था च नेत्रिरीपके नानरुड्। अनुवन्यप्रयमज्ञानिद्वातयातानाद्विसा अनुवन्य प्रयमज्ञानिद्वमिति टत्वं प्रयुक्तं। अस्मेत्तिरो विभाषा
याव समाशालाक्रौबलीवर्दसायनतघनिलिजिमित्यात मंगमि हरष्यत इति वदंतस्तेषधिध्वमित्यादौ टत्वं नेच्छंति। तेषामप्यधिढ्वमिस
त्र भवतेवनसीध्वमित्यादौ वनभवति। आसिषीध्वमिति। आसउपवेशने। कथं भवितव्यमिति। किमत्रानेनविकल्पेन भवितव्यं
उतनति प्रश्नार्थः। उपादिदीपेढ्वं इति दीङ् क्षये लिट् ध्वं। क्रादिनियमादिट्। दीङोयुट्चि क्ङितीति युट्। युयस्य वहितमिति। स
मुदाय भक्तो हि युट्। तमिव न व्यवद्ध्यात्। इटं तु व्यवदधात्येव। न भवितव्यं टत्वेनेति। अनेन विकल्पेनेति भावः। पूर्वेणापुनिर्ण
ग्रामोत्येव। अपरेषामिति। अस्मिन्पक्षे विकल्प एव भवति २३

२का॰प॰३ समासेऽङ्गुलेः॥ ॥सङ्ग इति षष्ठ्यां स्थाने प्रथमा। एवमुत्तरेष्वपि योगेषु। संजनं संगः। अस्येत्वं अङ्गुलेः संग इति संबुध्यंतमुदाहरन्ति॥ ॥भी
रोः स्थानं॥ ॥भीरोः स्थानमिति पूर्ववत्संबुद्ध्यंतं षष्ठ्यं तं वा। समासेऽङ्गुलिभीरुभ्यां संगस्थाने इत्युच्यमाने भ्यामित्यधिकं प्राप्नोतीति तस्मा
द्योगविभागः॥ ॥अग्नेः स्तुत॥ ॥अग्निष्टुदिति। संपदादित्वात् क्विप्। करणे क्विप्। यत्राग्निः स्तूयते सोऽग्निष्टुत् क्रतुविशेषः। यत्रेदं
भवति। अपि वा सर्वेषु देवताशब्देष्वग्निमेवाभिसंनमेदिति। अग्निष्टोम इति। सोमयागस्य सप्तमसंस्थाः स्तूयते सोऽग्निष्टुत् क्रतुविशेषः।

समासेऽङ्गुलेः संगः॥ ॥अङ्गुलिशब्दादुत्तरस्य संग सकारस्य मूर्द्धन्यादेशो भवति समासे। अङ्गुलिषंगा यवागूः। अङ्गुलि
संगो नगः। पालयति। समास इति किं अङ्गुलेः संगः॥ ॥भीरोः स्थानं॥ ॥भीरुशब्दादुत्तरस्य स्थान सकारस्य मूर्द्ध
न्यादेशो भवति समासे। भीरुष्ठानं। समास इत्येव भीरोः स्थानं॥ ॥अग्नेः स्तुत्स्तोमसोमाः॥ ॥अग्नेरुत्तरस्य स्तुत् स्तोम
इत्येतेषां सकारस्य मूर्द्धन्यादेशो भवति। अग्निष्टुत्। अग्निष्टोमः। अग्नीषोमौ। अग्नेर्दीर्घात्सोमस्येष्यते इह न भवति।
अग्निसोमौ माणवकाविति। तथा ज्योतिरग्निः सोमो लताविशेषः अग्निसोमौ तिष्ठतः अग्निसोमौ पश्य। समास इत्ये
व अग्नेः सोमः॥ ॥ज्योतिरायुषः स्तोमः॥ ॥ज्योतिस् आयुस् इत्येताभ्यामुत्तरस्य स्तोम सकारस्य मूर्द्धन्यादेशो भवति
समासे। ज्योतिष्टोमः। आयुष्टोमः। समास इत्येव ज्योतिः स्तोमं दहति॥ ॥मातृपितृभ्यां स्वसा॥ ॥मातृपितृ इत्ये
ताभ्यामुत्तरस्य स्वसृ सकारस्य मूर्द्धन्यादेशो भवति। मातृष्वसा पितृष्वसा॥ ॥
यत्रेदं भवति। अपि वा सर्वेषु देवताशब्देष्वग्निमेवाभिसंनमेदिति। अग्निष्टोम इति। सोमयागस्य सप्तसंस्थाः तत्राद्या संस्थोच्यते अग्ने
र्दीर्घादिति दिवमादं इत्येतत्वमित्यर्थः। तेनैव दीर्घस्य विधानात्। अग्निसोमौ माणवकाविति। अत्र माणवके संज्ञात्वेन विनियुक्ता ११५०
वग्निसोमशब्दाविति दीर्घाभावात् षत्वाभावः। ज्योतिर्लतयोरपि देवतात्वाभावाद्दीर्घाभावात् षत्वं न भवत्येव। अग्निसोमौ तिष्ठत इति। आम्
नाय स्तुतत्रापि दीर्घषत्वे प्राप्ते अग्नीषोमयोरप्यन्विति॥ ॥ज्योतिरायुषः स्तोमः॥ ॥ज्योतिष्टोम इति। अत्र शर्म्मवायस्त्वधि
कारात् षत्वं। एवमायुष्टोमेऽपि॥ ॥

मातुः पितुर्भ्यां॥ ॥एकदेशविकृतस्यानन्यत्वाद्विसर्जनीयश्शर्परे वा यद्यधिकाराच्च पूर्वेण नित्ये प्राप्ते विकल्पः। मातुः ष्वसेति। विभाषा स्व
सृपत्योरिति षष्ठ्या अलुक्। रेफान्तयोरिदं ग्रहणमिति। तच्चोत्तरपदे स्वसृपूर्वपदस्य पितृत्वाहचर्याद्रेफान्तमेव। मेघेव रेफस्य विसर्जनीयेक
तेन तस्य वा शरीति पक्षे सत्वेकृते। रेफान्तत्वान्न प्राप्नोतिअत आह एकदेशविकृतस्यानन्यत्वादिति। यदि तु सकारान्तयोर्ग्रहणं क्रियेत विस
र्जनीयान्तयोर्न स्यात्। विसर्जनीयान्तयोस्तु ग्रहणेभ्यामिपरतो निर्दे्शो दुर्घटः स्यात्॥ ॥अभिनिसस्स्तनः॥ ॥अभिनिसस्सेतस्मा

मातुः पितुर्भ्यामन्यतरस्यां॥ ॥मातुः पितुरित्येताभ्यामुत्तरस्य स्वसृसकारस्य मूर्द्धन्यादेशो भवत्यन्यतरस्यां समासे।
मातुः ष्वसा मातुः स्वसा। पितुः ष्वसा पितुः स्वसा। मातुः पितुरिति रेफान्तयोर्ग्रहणं एकदेशविकृतस्यानन्यत्वाद्वि
सर्जनीयान्तात्सकारान्ताच्च षत्वं भवति। समासइत्येव वाक्ये मातुः स्वसृस्येव नित्यं भवति॥ ॥अभिनिसः स्तनः श ८५
ब्दसंज्ञायां॥ ॥अभिनिसइत्येतस्मादुत्तरस्य स्तनतेः सकारस्य मूर्द्धन्यादेशो भवति शब्दसंज्ञायां। अन्यमानाया।
अभिनिष्टानो वर्णः। अभिनिष्टानो विसर्जनीयः। विसर्जनीयस्यैषा संज्ञा। शब्दसंज्ञायामिति किं अभिनिष्टानो व ८६
र्णः। अभिनिष्टानो विसर्जनीयः। विसर्जनीयस्यैषा संज्ञा। शब्दसंज्ञायामिति किं अभिनिस्तनति मृदं

दिति। एतेन समुदायो निमित्तं न प्रत्येकमिति दर्शयति। अभिनिष्टानो विसर्जनीय इति। तथा चायस्तंबः घ्नक्षरं चतुरक्षरं वा नाम पूर्व
माख्यातोत्तरं दीर्घाभिनिष्टानान्तं घोषवदाद्यन्तरन्तस्थमिति। घ्नक्षरं चतुरक्षरं वा नाम कुर्वीत कीदृशं नाम पूर्वं नाम प्रातिपदिकमक्रि
यावाचि तत्पूर्वपदं आख्यातोत्तरं क्रियावाच्युत्तरपदं। दीर्घात्परो योभिनिष्टानो विसर्जनीयस्तदन्तं दीर्घान्तं विसर्जनीयान्तं वेत्यर्थः। घो
षवान्वर्ण आदिर्यस्य तद्घोषवदादि। अन्तरन्तस्थं परलवानामन्यतमं मध्ये यस्य तत्तथोक्तं। एवं भूतं नाम कर्त्तुमर्हं। द्रविणोदावी
वोदारत्वाघुराहरणं २४ ॥

२ का॰ प॰ ३

उपसर्गप्रादुर्भ्यां॥ ॥स्व अच् अप् एवैतौ परौ यस्मात्स यच् परः। यचोरिति सप्तमीनिर्देशेनैव सिद्धे परग्रहणं चिंत्यप्रयोजनं। अभिषंतीति। अ रादि
त्वाच्छ्लोपे लुक्। श्नसोरल्लोपः। अनुस्वतमिति। कथं पुनरत्र प्रसंगो यावतां सकारस्यप्रकृतत्वात्तमेव प्रत्युपसर्गत्वमाश्रयिष्यते न चात्र सका
रं प्रत्युपसर्गत्वमस्ति नावन्मात्रस्याक्रियावचनत्वात् तत्किमस्तिग्रहणेन न च प्रादुः शब्दार्थमस्तिग्रहणं तस्यास्त्यस्तिविषयत्वेनानि
यतत्वात्। तदेतदाशंकते तावत्। तथापीति परिहरति। तथापीति। अनुस्वःशब्दः सुप्रादिः चतुर्थ्याद्वचनइत्यनेन तोटकूठजोरन्यतरः

उपसर्गप्रादुर्भ्यामस्तिर्यच्परः॥ ॥उपसर्गस्थान्निमित्तात्प्रादुः शब्दाच्चोत्तरस्यास्तिसकारस्य यकारपरस्याच्परस्य च मू
र्द्धन्यादेशो भवति। अभिष्यात्। निष्यात्। विष्यात्। अभिषंति निषंति विषंति। प्रादुःस्यात्। प्रादुष्यात्। प्रादुः षंति। उपसर्गप्रा
दुर्भ्यामिति किं दधिस्यात् मधुस्यात्। अस्तिरिति किं अनुसृतं परिसृतं। अथात्रास्तिग्रहणे सत्यपि सकारमेव प्रत्युपसर्ग
आश्रीयते प्रादुः शब्दस्य च कृभ्वस्तिष्वेव प्रयोगइत्यन्यत्राप्रसंगस्तथाप्येतन्मनुदाहृत्यमां अनुसतेत्यनुसः अनुस्वः अप
त्यं आनुसेयः। यच्पर इति किं अभिस्तः निस्तः प्रादुस्तः॥ ॥सुविनिर्दुर्भ्यः सुपिसूतिसमाः॥ ॥सुविनिरदुस इत्येत
तेभ्य उत्तरेषां सुपिसूतिसम इत्येतेषां सकारस्य मूर्द्धन्यादेशो भवति। सुपीति कृतसंप्रसारणः स्वपिर्गृह्यते। सुषुप्तः। विषुप्तः।
दुःषुप्तः। सूतीति स्वरूपग्रहणं। सुषूतिः। विषूतिः। निःषूतिः। प्रादुःषूतिः। सुषमं निःषमं दुःषमं। सुपेः षत्वं स्वपेर्माभू
दिति सुष्वापेति केन नाहलादिशेषात्सुपिरिष्टः सर्वप्रसारणांस्थादीनां नियमो नात्र प्राक्सितादुत्तरः सुपिः। अनर्थकोवि
सुषुपुः सुपिभूतो द्विरुच्यते। पूर्वत्रासिद्धीयमद्विर्वचने इति कृते षत्वे द्विर्वचनं २५ ॥
रेल्लोपो कट्ठ्वारल्पकारल्लोपे सकारमात्रस्याक्रियावाचित्वात्षत्वप्रसंगः॥ ॥सुषिनिर्दुर्भ्यः॥ ॥सुपीत्यागंतुकइकारेण न पुनरिका निर्दे
शः यदि स्यात्ततो वचिस्वपीति लक्षणप्राप्तेन संप्रसारणेन धातोरेवायं निर्देशः स्यात्ततश्च यत्रास्यैतद्रूपं तत्र षत्वमिसयमर्थो निर्ल
भ्येत तस्मादागंतुकेनेकारेण प्रयोगस्यस्य कृतसंप्रसारणस्य रूपस्येदमनुकरणं तदाह सुपीति स्वपिः कृतसंप्रसारणो गृह्यत इति। एतच्च

राम॰

।समेसपिसत्वरूपग्रहणामेवनषमष्टमवेक्षमस्तिधातोर्ग्रहणांऽकृत्स्निपोरस्मनतरस्यनतरस्यभावात्। अथकिमर्थस्वपेः सुषुप्सितस्य
त्वमुच्यते। सुपेः षत्वंस्वयेर्माभूत्। सुपेः षत्वमुच्यतेस्वयेर्माभूदिति विस्वप्नो विस्वमस्मितिः। अथक्रियमाणेपिविकृतग्रहणे। विसुष्वापये
तिकेननः। केनहेतुनाविसुष्वापयेस्तत्राभ्यासस्य षत्वंनभवति। लिघम्यासस्योभयेषामितिसंप्रसारणेकृतेसुषिरूपस्यभावात्। प्रागे
वहलादिशेषात्कृतेवातस्मिन्नेकदेशविकृतस्यानन्यत्वादस्तिप्रसंगः। हलादिशेषात्सुपिः द्विर्वचनेकृतेपरत्वाद्धलादिशेषेण
यकारेनिवृत्तेवकारस्यसंप्रसारणंततश्चसुपिरूपस्याकदाचिदप्यभावात्सलाभावः। इष्टएवंप्रसारणं। उक्तंतत्रोभयेषांग्रहणस्यप्र
योजनं। परमपिहलादिशेषंबाधित्वाउभयेषांसंप्रसारणमेवयथास्यादिति। तेनप्रसारणमेवयथास्यादिति। तेनप्रसारण
मेवपूर्वमिष्टं। विशेषतस्त्वत्रेष्टं। अभ्यासपकारस्यहृकारेपिनिवर्त्तेते। नह्यत्रहेतुरस्तियकारेनिवर्त्तितेवकारेवतिष्ठतइतिए
वंतर्हिस्थादिष्वेवाभ्यासस्येतेनस्मादेवनियमादत्रषत्वंनभविष्यति। स्थादीनांनियमोनात्र। किंकारणं। प्राक्सितादुत्तरः सु
पिः। प्राक्सितादितितत्रवर्त्तितेनप्राक्सिताद्येधातवस्तेषामभ्यासस्थादिष्वेवाभ्यासस्यषत्वमितिनियमेनसुनोतिसुवतिस्य
तिस्तोभतयएवनिवर्त्स्यन्ते। सुषिस्त्वयंतामोवधेरुत्तरः। एवंतर्ह्यर्थवद्ग्रहणेनानर्थकस्यसेवमेतस्यनभविष्यति। स्यानेहिद्वि
र्वचनेनसमुदायोर्थवानवयवोत्वनर्थकोद्विःप्रयोगेप्यर्थप्रत्यायनस्यानावर्त्तनाद्धास्यामर्थः प्रत्याय्यतइत्येकस्यानर्थकामेवा
नदेतत्स्याहुअनर्थकोविषुषुपुः। पघनर्थकस्यग्रहणंनभवतिविषुषुपुरित्यत्रनसिध्यति। नेषदोषः। सुपिमन्तोद्विरुच्यते। अ
यमभिप्रायः। एवंधातुरुपसर्गेणयुज्यतेतत्रद्विर्वचनात्परत्वात्संप्रसारणं। परत्वादेवषत्वं। कृतषत्वस्यैवतस्यद्विर्वचनं। ननुप
त्वस्यासिद्धत्वात्पूर्वंद्विर्वचनमेवप्राप्नोतितत्राह पूर्वत्रासिद्धीयमद्विर्वचनइति २५

निनदीभ्यां स्नातेः ॥ ॥ निष्णातः कटकरण इति । तत्र कुशल इत्यर्थः । नदीष्णा इति । नदीस्नाने कुशल इत्यर्थः । कथं स्नतु कुशलमात्रे प्रयुंजते ।
नदीस्नात इति । सुषमादीति योगविभागात् समाधिः ॥ ॥ सूत्रं प्रतिष्णातं ॥ ॥ सूत्रं प्रतेति विषयत्वेन निपातनात् अन्यत्र प्रसक्तिरेव माभूत् ॥ ॥
कपिष्ठलो गोत्रे ॥ ॥ गोत्रमिह प्रवराध्यायपठितं गृह्यते तत्र च वस्तु संतानस्यापदेशहेतुर्यः पुरुषो गोत्रमित्युच्यते । पारिभाषि
कस्य ग्रहणे तु कापिष्ठलिरित्यत्रैव स्यात् यत्र गोत्राभिधायी प्रत्ययः । परिपूर्णगोत्रं न षत्वस्याभिव्यञ्जने न विदिष्टं किं तर्हि दर्शनस्य गोत्रे योद
ष्टः कपिष्ठलशब्दः स साधुर्भवति यत्र तत्र च । त्यागश्रीपतेः तस्य पारिभाषिके पि गोत्रे न दोषः ॥ ॥ प्रष्ठोऽग्रगामिनि ॥ ॥ प्रस्थो हिमवतः

निनदीभ्यां स्नातेः कौशले ॥ ॥ निनदी इत्येताभ्यामुत्तरस्य स्नातेः सकारस्य मूर्धन्यादेशो भवति कौशले गम्यमाने । नि
ष्णातः कटकरणे । निष्णातो रज्जुवर्तने । नद्यां स्नाति नदीष्णाः सुपि स्थ इति योगविभागात् कः प्रत्ययः कौशल इति किं निस्नातः
नद्यां स्नातः नदीस्नातः ॥ ॥ सूत्रं प्रतिष्णातं ॥ ॥ प्रतिष्णातमिति निपात्यते सूत्रं चेत् तद्भवति । प्रतिष्णातं सूत्रं शुद्धमित्यर्थः ।
प्रतिस्नातमित्येवान्यत्र ॥ ॥ कपिष्ठलो गोत्रे ॥ ॥ कपिष्ठल इति निपात्यते गोत्रविषये । कपिष्ठल इति मूर्धः प्रष्ठो गोः प्रष्ठोऽश्वः अग्र
तो गच्छतीत्यर्थः । अग्रगामिनीति किं प्रस्थो हिमवतः प्रस्थो व्रीहीणां ॥ ॥ वृक्षासनयोर्विष्टरः ॥ ॥ विष्टर इति निपा
त्यते वृक्षे चासने चाभिधेये । विपूर्वस्य स्तृणातेः षत्वं निपात्यते । विष्टरो वृक्षः विष्टरमासनं । वृक्षासनयोरिति किं वाक्ये
पी वाक्यविस्तरः । विस्तरं वाचमाह ॥ ॥ छन्दोनाम्नि च ॥ ॥ छन्दोनाम्नि विषये विष्टार इति निपात्यते विपूर्वात्स्तृञः छ
न्दोनाम्नि चेति घञ् विहित इति विष्टर इति प्रकृते पि विष्टार इत्यत्र निपात्यते । विष्टारपङ्क्तिश्छन्दः ॥ ॥ छन्दोनाम्नीति किं परस्य
इति । ब्रजर्थकविधानमित्यधिकरणे कः ॥ ॥ वृक्षासनयोः ॥ ॥ विस्तीर्णत इति विष्टरः । प्रथने वावशब्द इति घञि प्राप्ते अस्मादेव
निपातनात् पुंसि संज्ञायां घः प्रायेण इति घः । उलये तस्मात् टीका अपि लपी सा वाक्यस्य विस्तरः अशब्द इति प्रतिषेधाद् घञ् ॥ ॥
छन्दोनाम्नि च ॥ ॥ विष्टार इति निपात्यत इति । ननु च विष्टर इति प्रकृतं तत्कथं विष्टार इति निपात्यते तत्राह विपूर्वादिति । पदि । तेह छन्दोना
म्नि विष्टार इत्यालं क्रियेत तत्र न विधेयं छन्दोनाम्नि चेति शक्यमकर्तुं । इह वा विष्टार इत्युच्यते तत्र वा छन्दोनाम्नीति कोऽन्यत्र विशेषः ॥ अपरस्त्वा

पूर्वपदात्॥ ॥असमासेपीति। एतच्च सवनादिषु सवने सवन इत्यादीनां पाठादेवावसीयते॥ ॥सुञः॥ ॥अभी षुणा इति। इकः
सुञीति दीर्घत्वं नश्च धातुस्थोरुषुभ्य इति णत्वं। क्वचित्तु ह्रस्वा वेवैतस्य दृश्यते॥ ॥सनोतेरनः॥ ॥गोषा इति। जनसनखनक्रमगमो वि
ट् विड्वनोरनुनासिकस्यात्। क्विबिति इदमपि इष्ट्याबेवास्ति। गोसनिमिति। छंदसि वनसनरक्षिमथामिति। अत्र पः। सिसा न पिषती
ति। यद्यप्यप्राप्तस्य प्रतिषेधवचने प्रयोजनं नास्तीति कृत्वा प्राप्त्यर्थो विज्ञायते। इह तु सिसनिषतीत्यत्रो तिशयेनैव षणीमेतस्मा

पूर्वपदात्॥ ॥पूर्वपदस्थान्निमित्तादुत्तरस्य सकारस्य मूर्धन्यादेशो भवति एकेषां मतेन छंदसि विषये। द्विषंधिः। द्विसं
धिः। त्रिसंधिः। मधुष्ठानं मधुस्थानं। द्विषाहस्रं चिन्वीत। द्विसाहस्रं। असमासेपि यत्पूर्वपदं तदपीह गृह्यते पूर्वपदा
दिति तेन वाक्येपि भवति। त्रिः षमृद्धत्वाय॥ ॥सुञः॥ ॥सुञ इति निपातो गृह्यते पूर्वपदस्थान्निमित्तादुत्तरस्य सुञः
सकारस्य मूर्धन्यादेशो भवति छंदसि विषये। अभी षुणः सखीनां। ऊर्ध्व ऊ षुणः। इकः सुञीति दीर्घः। नश्च धातु
स्थोरुषुभ्य इति णत्वं॥ ॥सनोतेरनः॥ ॥सनोतेर्धातोरनकारान्तस्य मूर्धन्यादेशो भवति। गोषाः। नृषाः। जनसनख
नक्रमगमो विट्। विड्वनोरनुनासिकस्यात्। अन इति किं। गोसनिं वाचमुदीरयत। पूर्वपदादित्येव। सिद्धे नियमार्थमि
दं। तत्र केचित्सवनादिषु पाठाद्गोसनिर्नियमस्य फलं न भवतीति। सिसानयिषतीति प्रत्युदाहरंति। सिसनिषतेः क्विप्प्र
त्ययः। सिसनीरित्यपरे॥ ॥सहेः पृतनर्ताभ्यां च॥ ॥पृतना ऋत इत्येताभ्यां चोत्तरस्य सहेः सकारस्य मूर्धन्यादेशो भव
ति। पृतनाषाहं। ऋताषाहं। केचिद्योगविभागं कुर्वन्ति सहेरिति। ऋतीषहमिति यथा स्यात्। ऋतिशब्दस्य पूर्वपदस्य सं
हितायामेव दीर्घत्वं षत्वं च। अवग्रहे ऋतिसहमित्येव भवति। चकारोनुक्तसमुच्चयार्थस्तेन ऋतषहमिति सिद्धं २८

न्नियमादप्रसंगः षत्वस्य। सिसनीरिति। क्विपि अतो लोपः ततः सुः हल्ङ्यादिलोपः सनः सकारस्य षत्वे च तत्र षत्वस्यासिद्धत्वा
दुत्वं विहिय धायादीर्घ इति दीर्घत्वं। अत्र सन् षभूतो न भवतीति स्तोतिण्योरेव षण्यभ्यासस्य नियमस्यायमविषय इति षत्वं प्रसक्तमस्या
न्नियमान्न भवति एतस्मिंश्च प्रयोजने सति सामर्थ्याभावादप्राप्तस्य नियमाभावात् सिषाणयिषतीति षत्वं भवत्येव॥ ॥सहेः
पृतनर्ताभ्यां च॥ ॥योगविभागमिति। तत्र द्वितीयो योगः पूर्वयोगस्य सर्वो वि

का. प. ३ नरपरस्सपि॥ ॥विसर्जनीयिकाङ्गतौ संज्ञायामिति शिखुलां विसर्ग्गमिति। संप्रवृत्तिविस्मासेऽनुकः परस्य विपाषेतीदं प्रतिषेधः अनिरिनामितिनलो
पः॥ विसर्परति। सर्पिषः ह्रोः कस्तुनुः सवनेसवनेऽसादौ वीप्सायां द्विर्वचनं। किं सद्वयत्रापोणावाहा नामप्रसुणत्वं शर्षु जशभावयतेः
तिवचनात्सुर्मवायेशति बलप्रसंगः। यथानुशर्षपदेशोनकर्त्रिमस्तत्थाहपवरुरिसत्रोक्तं। अभ्यसनियहणामनर्थकंमतिणितलाद
त आह अभ्यसनिग्रहणमिति। ज्ञापनस्य प्रयोजनमाह जलाषाहमिति॥ ॥सासदाघो॥ ॥आदित्यग्रहणं शकाभकर्तुंयदादिति

नरपरस्सपिस्सजिस्सशिस्सहिसवनादीनां॥ ॥पूर्वपदादिति प्राप्तः प्रतिषिध्यते रेफपरसकारस्य सर्पिस्सजिस्सशिस्स
हि इत्येतेषां सवनादीनां च मूर्द्धन्यादेशो न भवति। रपरः। विसर्जनीयकायाः कांजुहोति। विसर्पं कथयति। सर्पिः प्राकृ
र्पिविसृपयः। सृजि। वाचोविसर्जनं। स्पृशि। दिविस्पृशं। स्पृहि। निस्पृहं कथयति। सवनादीनां। सवनेसवने। सुतेसुते। सो
मेसोमे। सवनमुखेसवनमुखे। किंसंकिंसं। गोसनिः। अभ्यसनिः। अभ्यसनिग्रहणं अनिणोपिषत्वमस्तीति ज्ञापना
र्थं तेन तुरायषाहं जलाषाहमित्यत्रापि भवति। क्वचिदेवं मराणापाठः। सवनेसवने। सवनमुखेसवनमुखे। अनुसवनमनु
वसनं। संज्ञायां बृहस्पतिसवः। शकुनिसवनं। सोमेसोमे। सुतेसुते। संवत्सरेसंवत्सरे। किंसंकिंसं। मुसलंमुसलं। गोस
निः। अभ्यसनि॥ ॥सासदाघो॥ ॥सादित्येतस्य परादेश्च सकारस्य मूर्द्धन्यादेशो भवति। सात। अग्निसात। वा
युसात। पदादेः। दधिसिंचति मधुसिंचति॥ ॥

पंचमीनिर्देशः कर्त्तव्यः परापरस्य सकारस्येति। इहापि तर्हि प्राप्नोति अग्निसुवा युसुत्वसुसातिप्रतिषेधो ज्ञापयति स्वादीपसदंनत
स्मात्प्रतिषेधः बहुवचस्तुपरस्य प्रतिषेधो वक्तव्यः। बहुवस्तुपरः सकारः॥ ति। तत्रापमप्यर्थः दधिसिञ्च मधुसिगिसादौ प्रतिषेधः सि   २म०
द्धो भवति न ह्ययं सकारः परादिः गतिकारकोपपदानां कृद्भिः सहसमासवचनं प्राक्सुबुत्पत्तेरिति वचनात्पदात्परस्तु भवति तत्रापि
पूर्वपदस्य पुर्वत्तत्वात्। बहुवचस्तुप्रतिषेधः। बहुवस्तुपरस्य प्रतिषेधो वक्तव्यः। बहुवस्तुपरः सकारः॥ ॥छ॥ ॥छ॥ ॥

गविपुधिभ्यां स्थिरः॥ ॥गविष्ठिरः युधिष्ठिर इति। संज्ञायामिति सप्तमीसमासः। गोशब्दाद्हलंतादच्यीति। यघथवादेशेकृ
तेसंप्रतिहलंतो भवति तथापि उत्सन्निवेलायामहलंतत्वान्निपातनमाश्रितं॥ ॥विकुशमिपरिभ्यः स्थलं॥ ॥विकुपरि इत्येतेषां
कुगतिप्रादय इति समासः। शमीशब्दस्य तु षष्ठीसमासः। ङ्यापोः संज्ञाछंदसोर्बहुलमिति ह्रस्वत्वं। सूत्रे ह्रस्वोच्चारणं ह्रस्वपक्ष
एव षत्वं यथा स्यादित्येतेन प्रयोगे बहुवचनाद्घटाद्ह्रस्वत्वं न भवति तदा षत्वमपि न भवति॥ ॥अंबांबगोभूमि॥ ॥स्थशब्दसकारस्य

गविपुधिभ्यां स्थिरः॥ ॥गवियुधि इत्येताभ्यामुत्तरस्य स्थिरसकारस्य मूर्द्धन्य आदेशो भवति। गविष्ठिरः युधिष्ठि
रः। गोशब्दाद्हलंतादच्येतस्मादेव वचनात्सप्तम्या अलुक्॥ ॥विकुशमिपरिभ्यः स्थलं॥ ॥विकुशमिपरि इ
त्येतेभ्य उत्तरस्य स्थलसकारस्य मूर्द्धन्यादेशो भवति। विष्ठलं। कुष्ठलं। शमिष्ठलं। परिष्ठलं॥ ॥अंबांबगोभू
मिसव्यापद्वित्रिकुशेकुशंकंगुमंजिपुंजिपरमेबर्हिर्दिव्यग्निभ्यः स्थः॥ ॥अंब आंब गो भूमि सव्य अप द्वि त्रि कु
शेकु शंकु अंगु मंजि पुंजि परमे बर्हिः दिवि अग्नि इत्येतेभ्य उत्तरस्य स्थशब्दसकारस्य मूर्द्धन्यादेशो भवति। अंबष्ठः। आं
बष्ठः। गोष्ठः। भूमिष्ठः। सव्येष्ठः। अपष्ठः। द्विष्ठः। त्रिष्ठः। कुष्ठः। शेकुष्ठः। शंकुष्ठः। अंगुष्ठः। मंजिष्ठः। पुंजिष्ठः। परमे
ष्ठः बर्हिष्ठः। दिविष्ठः। अग्निष्ठः। स्था। स्थिन् स्थग्रहणमिति वक्तव्यं। सव्येष्ठाः। परमेष्ठी। सव्येष्ठसारथिः २६

ति। एतेन सूत्रे स्थ इति स्वरूपग्रहणं प्रत्ययमानमिति दर्शयति। यदि ष्ठा न तो धातोरिति तिष्ठतेराकारलोपं कृत्वा षष्ठ्या निर्देशः स्यात्
तदा गोस्थानं भूमिस्थानमित्यत्रापि षत्वं स्यादिति भावः। अंबेवतिष्ठत्वं वष्ठः सुपिस्थ इति कः। ङ्यापोरिति ह्रस्वत्वं। आं
बष्ठ इति संज्ञेयं जनपदविशेषस्याओष्ठ इति। घञर्थे कविधानमिति सधिकरणे कप्रत्ययः। भूमिष्ठादौ सुपिस्थः। सव्येष्ठ इति हल
दंतात्सप्तम्या इत्यलुक्। परिस्थ इति स्वरूपग्रहणं स्थास्थिन् स्थग्रहणान्न प्राप्नोतीतीदमाह स्था। स्थिन्निति। स्थाशब्दः क्विबंतः। सव्ये
ष्ठा इति। इत्वे वकारप्रतिषेध इति वचनात्कस्य एलक्षणो नेत्वं न भवति। गमेरिनिरिति वर्तमाने परमे स्थः किच्चेति किदिनिप्रत्ययः।

८का०प०३

सुषामादिषु च॥ ॥क्वचित्सात्पदाद्यो रिति प्रतिषेधे प्राप्ते क्वचित्स्यादिति एवा प्राप्ते षत्वे सुषामादिषु मूर्द्धन्यो विधीयते। दुष्षामे
ति। विसर्जनीय शर्करवायेपीत्यधिकारात्रत्वं मुशब्दस्येत्यादि। अत्रैवमभिसंबंधः सुशब्दस्य कर्मप्रवचनीयत्वादनुपस
र्गत्वे सति सुषेधः इति याठोपं निस्दुस्शब्दयोस्तु क्रियाविशेषविषयत्वादनुपसर्गत्वे सति निषेधः दुःषेधः इति पाठोपमिति।
सुषामादिषु च॥ ॥सुषामादिषु सकारस्य मूर्द्धन्यादेशो भवति। शोभनं साम यस्य स सुषामा। निष्षामा। दुष्षा
मा। सुषेधः। निष्षेधः। दुष्षेधः। सुशब्दस्य कर्मप्रवचनीयत्वान्निस्दुस्शब्दयोश्च क्रियांतरविषयत्वादनुपसर्ग
त्वे सति सुषेधः इति पाठोपं निस्दुस्शब्दयोस्तु क्रियाविशेषविषयत्वादनुपसर्गत्वे सति निषेधः दुःषेधः इति पाठोपं
सेधतेर्गतावितिप्रतिषेधबाधनार्थं च। सुषंधिः। निष्षंधिः। दुष्षंधिः। सुष्टु दुष्टु तिष्ठते रूपाणि। दिषु एतो सुष्टादिती।
गौरिषक्थः संज्ञायां। ज्ञायोः संज्ञाच्छंदसोर्बहुलमिति पूर्वपदस्य ह्रस्वत्वं। प्रतिष्णिका। प्रतिष्णाशब्दात्संकन्
प्रत्ययः। जललाषाहं नौषेचनं। दुंदुभिषेवणं। एतिसंज्ञायामगात् एकारपरस्य सकारस्य मूर्द्धन्यादेशो भवति इ
रिकोणकारात्परस्य संज्ञायां हरिषेणः। परिषेणः। भानुषेणः। णीतिकिं। हरिसिंहः। संज्ञायामिति किं। पृथ्वी
सेनाऽस्य पृथुसेनः। अगादिति किं। विष्वगसेनः। रएको रित्येव सर्वसेनः। नक्षत्राद्वा। एतिसंज्ञायामगात्मूर्द्धन्यादे
शो भवति। रोहिणिषेणः। रोहिणिसेनः। अगादित्येव शतभिषग्सेनः। अविहितलक्षणो मूर्द्धन्यः सुषामादिषु द्र
ष्टव्यः॥ ॥ह्रस्वात्तादौ तद्धिते॥ ॥ह्रस्वात्परस्यादुत्तरस्य सकारस्य मूर्द्धन्यादेशो भवति तकारादौ तद्धिते परतः। तरप्त
मप्तयप्त्वतल् तसत्यः प्रयोजयंति। तरप्। सर्पिष्टरं। यजुष्टरं। तमप्। यजुष्टमं। तया चतुष्टयेब्राह्मणानां निकेताः
। त्वात् सर्पिष्ट्वं यजुष्ट्वं। तल्। सर्पिष्टाय जुष्टा। तसि। सर्पिष्टः यजुष्टः। त्यप्। आविष्ट्यो वर्द्धते। ह्रस्वादिति किं। गीस्त्वं धूस्त्वं।
तादाविति किं। सर्पिः सात भवति। प्रत्ययसकारस्य सात्पदाद्योरिति प्रतिषेधे सर्पिषः सकारस्य णत्वं। तद्धित इति
तत्र सुशब्दस्य दुः संज्ञायामिति कर्मप्रवचनीयसंज्ञा साचोपसर्गसंज्ञायाः बाधिका आकडारादधिकारात्। निर्दुरोरत्युपसर्गत्वाभा

किं सर्पिस्सात्। सितिइदं तस्य प्रतिषेधो वक्तव्यः। सिद्धमत्र र्गा। छिंधस्त्रां २७॥

राम०

कपावुच्चारणार्थावि ति। ताभ्यां विनानयोरुच्चारयितुमशक्यत्वादिति भावः कीदृशो तर्ह्यादेशा विति आह जिह्वामूलीयेति। इह विसर्जनीयस्य स्था
ने आदेशत्रयं विधीयते तत्र शर्परयोरेव कुप्वोः प्राप्तोति वासः क्षौमम् अद्भिः प्सातमिति। अत्र हि शर्पनीय इति विसर्जनीयोस्ति न च तस्यैवेष्य
ते। पत्र कुपुभ्यां परः शर्परः खर् अस्ति पुरुषः त्सरुक इत्यादौ तत्रसावकाशत्वात्। अशर्परयोस्तु कुप्वोर्न स्यात्। न हि तस्य विसर्जनीयोस्ति
विसर्जनीयस्य स इति सत्वेन निर्वर्तितत्वात्। किंपुनः कारणं सत्वमेव तावद् भवति न तत्र कर्तव्यमेतस्य विधेरसिद्धत्वात् तस्मादत्र सकारः स्था
नी निर्दिष्टः यो विसर्जनीयस्य स इति सत्वस्थाने कुप्वोरादेशत्रयं भवतीति। एवं हि शर्परयोः कुप्वोः सकाराप्रयादेर्विसर्जनीयो विधी
यत इति सकाराभावादादेशाप्रसंगः केवलयोस्त्वादेशप्रसंगस्तस्मात्तस्येति वक्तव्या यदाह वार्तिककारः सकारस्य कुप्वोर्विसर्जनीयजि
ह्वामूलीयोपध्मानीयाः विसर्जनीयादेशे हि शर्परयोरेवादेशप्रसंग इति। अत्र परिहारमाह विसर्जनीयस्य स इत्येतस्मिन्निति। अयमभिप्रा

यः कपावुच्चारणार्थौ जिह्वामूलीयोपध्मानीयावेवात्रादेशो विसर्जनीयस्य स इत्येतस्मिन्नप्राप्त एव वचनमिदमारभ्यत इति तस्ये
वायं बाधकः। वासः क्षौमम् अद्भिः प्सातमित्यत्र पूर्वत्रासिद्धेनास्ति विप्रतिषेधोऽभावादुत्तरस्येति शर्परे विसर्जनीय इत्येतदेव
भवति। केचित्त्वेतिं सूत्रे योगविभागं कुर्वन्ति कुप्वोः शर्परयोर्विसर्जनीयस्य विसर्जनीय आदेशो भवति। किमर्थमिदं कुप्वो
श्चेति वस्य तित्तद्बाधनार्थमिदमिति १० ॥

यः विसर्जनीयस्य स इति सकारस्य स्थानी विसर्जनीय उपात्तः स च द्विविधः संभवति शर्परलक्षणः खरवसानलक्षणश्च। तत्र शर्परल
क्षणस्यासिद्धत्वादितरः सकारस्य स्थानी स एव चेहानुवर्तते तस्य नाप्राप्ते सत्वे इदमारभ्यते सर्वस्य विषयस्य तेन व्याप्तत्वात् शर्परे विस
र्जनीय इत्येतत्तु शर्परयोः कुप्वोः प्राप्तं केवलयोस्त्वप्राप्तमिति न तत्प्राप्तस्य बाधकत्वं भजते योगा इति। स्यादेतत् यथा ... अपवादत्वं परत्वात्तु शर्पर
योरपि कुप्वोरयमेव विधिः प्राप्नोतीति तत्राह पूर्वत्रासिद्ध इति। परिहारान्तरमाह केचित्त्विति। कुप्वोरित्येको योगः। अत्र शर्परे विसर्जनीय इ
ति वर्तते शर्परयोः कुप्वोर्विसर्जनीय एव भवति न ख्यावि ति। किंच पूर्वसूत्रेनेति वक्तव्ये विसर्जनीयविधानं तद् ह्रकारनिवृत्त्यर्थमित्युक्तं
तेन शर्परयोः कुप्वोरस्य विधेरप्रसंग एव १०

सोपदादौ॥ ॥अपदाद्वाविति कुप्वोरेतद्विशेषणं अयेनत्वेकवचनं। पूर्वस्यापमपवादः। पाशकल्पककाम्येष्विति। संभवप्रदर्शनमेतत्तन्नपरि
गणनं अन्यस्यासंभवात्। प्रातः कल्पमिति। अधिकरणशक्तिप्रधानस्यापि प्रातः शब्दस्य शक्तिविषये शक्तिमद्वाचित्वाद् विद्यमानस्यायोगः य

सोपदादौ॥ ॥विसर्जनीयस्य सकार आदेशो भवति कुप्वोः पदाद्योः परतः। पाशकल्पककाम्येषु। याप्ये पाशप्। पयस्पाशं
यशस्पाशं। ईषदसमाप्तौ कल्पप्। पयस्कल्पं यशस्कल्पं। प्रागिवात्कः। पयस्कं यशस्कं। काम्यच्च। पयस्काम्यति यशस्काम्य
ति। अपदाद्वाविति किं पयः कामयते यशः च ति। सोपदादावनव्ययस्येति वक्तव्यं इह माभूत्। प्रातः कल्पं पुनः कल्पमिति।
रोः काम्ये नियमार्थं। रोरेव काम्ये नान्यस्येति नियमार्थं वक्तव्यं यशस्काम्यति। इह माभूत् गीः काम्यति धूः काम्यति। उपध्मा
नीयस्य च। कवर्गे परतः सकार आदेशो भवतीति वक्तव्यं किं प्रयोजनं उब्जिरुपध्मानीयोपधः पठ्यत इति दर्शने अद्भुब्जः समु
द्भ इति यथा स्यात्॥ ॥७१॥ ॥

याद्योपाभूतमहः स्वित्राभूतननन्द्वावयोगः। रोः काम्ये नियमार्थमिति। एतदेव विवृणोति रोरेवेति। गीः काम्यतीति। उत्तरसूत्रेण षत्वं न भव
ति। यदि पुनरत्रैवेट् मुच्येत नैवं शक्यं षत्वमात्रप्रतिषेधेप्यनेन सत्वं प्राप्नोति। उपध्मानीयस्य चेति। अस्यैव विवरणं कवर्गे परत इति। उ
ब्जिरपमित्यादि। यथा पुनरयं दकारोपधः एवं षे तपस्तथाहपवरः स्मिन्त्रोक्तं॥ ॥७॥ ॥७१॥ ॥७१॥ ॥ ॥ राम०

॥इणः षः॥ ॥पूर्वेणासत्वे प्राप्ते दयवादः षत्वं विधीयते। अत्र केचिदाहुः। योयं सोपदाद्वाविति सकारः स एवोत्तरत्र सर्वत्र कुघोः प्रकरणे विधी
यते अनेन तु तस्यैव सकारस्येणउत्तरस्य षत्वं विधीयते न विसर्जनीयस्य अपदाद्वाविति चात्र न संबध्यत इति। सत्तं हि सकारः स्थानी निर्दिष्टः अ
नेनाहप्रकृतोनुवर्त्तते सोपदाद्वाविति। तस्येणः इति च षष्ठी प्रकल्प्यते एवमपि वस्माणोपयोगे विहितस्य सकारस्य षत्वं न प्राप्नोति अस्मि

॥इणः षः॥ ॥अपदाद्वाविति निवर्त्तते। इणउत्तरस्य विसर्जनीयस्य षकारादेशो भवति कुघोः परतः। पाशकल्पक
काम्येषु। सर्पिष्पाशं यजुष्पाशं। सर्पिष्कल्पं यजुष्कल्पं। सर्पिष्कं यजुष्कं। सर्पिष्काम्यति यजुष्काम्यति। अपदाद्वावित्येव। अग्निः
करोति वायुः पचति। कुघोरित्येव सर्पिस्तत्र यजुस्तत्र। इणउत्तरस्येति इणः षः इति वर्त्तते। तत्र यदिणः परो विसर्जनीयस्तस्य ष
कारो भवति अन्यस्य तु सकारः॥ ॥नमस्पुरसोर्गत्योः॥ ॥नमस्पुरस इत्येतयोर्गतिसंज्ञकयोर्विसर्जनीयस्य सकारादेशो
भवति कुघोः परतः॥ नमस्कर्त्ता नमस्कर्त्तुं नमस्कर्त्तव्यं। पुरस्कर्त्ता पुरस्कर्त्तुं पुरस्कर्त्तव्यं। गत्योरिति किं। पूः पुरौ पुरः प श्प . ११

कर्त्तव्ये तेषामसिद्धत्वात् नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति नयोगे योगोः सिद्धः। किं तर्हि प्रकरणे प्रकरणमसिद्धमिति। पदस्यमुपसर्गादस
मासेपीत्यसमासेपि ग्रहणं करोति। कथं कृत्वा ज्ञापकं। अन्तरेणाप्यसमासेपि ग्रहणं विशेषानुपादानात्समासासमासयोः सिद्धं भविष्यति।
न च समासे पूर्वपदात्संज्ञायामग इति नियमार्णत्वस्य निवृत्तिः नियमे कर्त्तव्ये उपसर्गादित्यस्य णत्वस्यासिद्धत्वात्। पश्यति त्वाचार्यः प्र

९का·प·३

करणेप्रकरणमसिद्धमितितत्तोः समासेपिग्रहणंकरोतितत्राहि सहनियमेन सर्वमेवणत्वप्रकरणमेकमितिनियमेकर्त्तव्येउपसर्गादितिण
त्वस्यसिद्धत्वान्नियमेनव्यावृत्तिः स्यादितिकर्त्तव्यसमासेपिग्रहणं· तदेवंसकारस्यषत्वंविधीयतेनविसर्जनीयस्य· उत्तरत्रचसत्वमे
वानुवर्त्ततेनषत्वमितिअपभयपियक्षोनिर्द्देषएव· किंतुषष्ठीप्रकल्पंतज्ञापकाश्रयणंचेतिप्रतिपत्तिगौरवप्रसंगाद्धत्रिकारेणाना
श्रितः। कस्तर्हितस्यपसः उत्तरत्रद्वयमप्यनुवर्त्ततेसकारः षकारश्चेति। यद्येवंसर्वत्रद्वयमपिप्राप्नोति। अथषकारएवानुवर्त्ततेनम
स्पुरसोर्गत्योरित्यादौयत्रानिणः परोविसर्जनीयस्तत्रापिषकारएवशप्नोति। नैषदोषः इणः षइतिसमुदायस्यस्वरितत्वंप्रतिज्ञायते।
यदाहेणः षइतिवर्त्ततइतितेनषत्वंतावदिणिविषयेनभविष्यति। एवमपिषत्वविषयेसत्वमपिप्राप्नोति। नाषकारेणतस्यबा
धनाच्चकारकरणाच्च। यदियरमनुवृत्तिसामर्थ्यात्तत्प्रसंगः। तदपिन। उत्तरार्थमप्यनुवृत्तिसंभवात्। तदिदमुक्तंपरस्याःपरो
विसर्जनीयस्तस्यषकारआदेशोभवत्यसन्यस्तुसकारइति। किमर्थंपुनरिदमारभ्यतेयावतासत्वमेवात्रप्रकरणेविधीयतां।
तस्यत्वादेशसकारत्वाद्धिर्वोरितिषत्वंभविष्यति। नसिध्यति। अपदांतस्येतितत्रवर्त्ततेयदांताध्येयमारंभः॥ ॥नमस्पु
रसोर्गत्योः॥ ॥अतः प्रसृतयदादावितिनिवृत्तं। नमःशद्वस्यसाक्षात्प्रभृतीनिचेतिविभाषागतिसंज्ञा पुरःशद्वस्यतुपुरोऽव्य
यमिति। पुरः पश्येति। मृगालनमग्रणयोः। आजभासेस्यादिनाक्विप्। तदंताच्छस। तस्यशसंततांदर्शयितुम्ः पुराविस्यनयो
हपस्यामः ११ ॥श्री॥ ॥छ॥ ॥

राम०

इदुदुपधस्य चाप्रत्ययस्य ॥ ॥ इदुतावुपधे यस्य स इदुदुपधः समुदायस्तस्य यो विसर्जनीय इति वैयधिकरण्येन संबंधः अप्रत्ययस्येत्येतदपि
अधिकरणमेव । निर्दुर्बहिराविष्प्रादुश्चतुष्प्रादुरिति । अस्यैवानंतरभवतोऽप्रतिषेधस्य स्वरूपमाणत्वान्नेदं परिगणनं नेष्टं तर्हि सिंहमवमर्दनं । चतुष्कपा
लमिति । तद्धितार्थे द्विगुः संस्कृतं भक्षा इत्यणो द्विगोर्लुगनपत्य इति लुक् । चतुष्कंटकमिति । बहुव्रीहिः । मातुः करोतीत्यादि वोध्यं । अत्र हि
मातृ अस् इति स्थिते ऋत उदिति उकारो भवन्न पौनुभयोः एकादेशः स चोभयनिमित्त आदि समर्थः । एकादेशशास्त्रं वा निमित्त + स्थानेऽतिनायेनापरो
भवति तत स्थानेऽसस्येति प्रत्ययसकारस्य लोपे कृते रेफस्य विसर्जनीयः सोयं प्रत्ययविसर्जनीयो भवति । परिहरति । कस्कादिष्विति । एकादेशनिमि
त्तादिति कर्मधारयः । तेनयेकारस्य तस्मादित्यर्थः । भ्रुम्भ्रुकुंसोरिति । अमुसन्त्रावेतौ विनिमित्त इति षेधव अनेन तत्र पुंसः प्रतिषेधेन तार्थः यत्वं कस्मात्र ॥

इदुदुपधस्य चाप्रत्ययस्य ॥ ॥ इकारोपधस्योकारोपधस्याप्रत्ययविसर्जनीयस्य षकार आदेशो भवति कुप्वोः परतः ॥ निर्दुर्बहिराविश्च ॥
तुष्प्रादुः । निस् । निष्कृतं निष्पीतं । दुस् । दुष्कृतं दुष्पीतं । बहिस् । बहिष्कृतं बहिष्पीतं । अविस् । आविष्कृतं आविष्पीतं । चतुर् । चतुष्क
पालं चतुष्कंटकं । प्रादुर् । प्रादुष्कृतं प्रादुष्पीतं । अप्रत्ययस्येति किं । अग्निः करोति वायुः करोति । मातुः करोति पितुः करोति । अत्र
रात्सस्येति सलोपे कृते रेफस्य यो विसर्जनीयस्तस्याप्रत्ययविसर्जनीयत्वात् षत्वं प्राप्नोति । कस्कादिषु भ्रातुष्पुत्रग्रहणं ज्ञापकं ए ४१
कादेशनिमित्तात् षत्वप्रतिषेधस्य । पुंमुहुसोः प्रतिषेधो वक्तव्यः । पुंस्कामा मुहुस्कामा । नेष्कुल्यं दोष्कुल्यं । नी ३ ष्कुलद ३ ष्कु ४२
लइ सत्र बहिरंगलक्षणायो वृद्धिप्लुतयोरसिद्धत्वात् षत्वं प्रवर्त्तते ॥ ॥ तिरसोऽन्यतरस्यां ॥ ॥ तिरसो विसर्जनीयस्यान्यतरस्यां
सकार आदेशो भवति कुप्वोः परतः । तिरस्कर्त्ता तिरस्कर्तुं तिरस्कर्त्तव्यं । तिरः कर्त्ता तिरः कर्तुं तिरः कर्त्तव्यं । गतेरित्येव । तिरः कृत्वा का
भवति । विसर्जनीयाभावात् । उक्तं हि इमं पुंकानां सत्वमिति । नत्रसत्वस्यासिद्धत्वादुत्वाभावाद्विसर्जनीयाभावः । नचावश्यसत्वं वक्तव्यं हि विधौ
विसर्जनीयस्य षत्वप्रतिषेधोपि कुप्वोः ककपौ चेत्येव विधिः प्राप्नोति । मुहुः कामो यस्याः सा मुहुःकामा तत्र कुप्वोः ककपौ चेत्येव एव विधिर्भ
वति । क्वचित्तु मुहुस्कामेति सत्वं पठ्यते सोऽपपाठः । नह्यत्र सत्वसंभवः सत्र वार्त्तिकयोरनिबद्धत्वात् । नेष्कुल्यमिति । आह्लादरणादित्वा
त्प्लुतः । नी ३ ष्कुलद ३ ष्कुलेति । गुरोरनृतस्यादिना प्लुतः । बहिरंगलक्षणयोरिति । बहिर्भूततद्धितापेक्षत्वाद् वृद्धिर्बहिरंगा । प्लुतोपि दू
राद्धूतादिकमर्थं ताकांक्षापेक्षत इति बहिरंगः ॥ ॥ तिरसोन्यतरस्यां ॥ ॥ जिरो न द्वाविति निरः शब्दस्य गतिसंज्ञा । तिरः कृत्वेति । अ

ए.का.प.२

द्वित्रिश्चतुरितिकृत्वोर्थे॥ ॥त्रमपत्रविभार्षयं। चतुरित्यस्याप्रत्ययविसर्जनीयत्वादिदुपधस्यचेतिशप्रे इत्त्यपोरप्राप्ते। इमुसोः सामर्थ्ये इत्ये
नेननात्रसिद्धिर्निशंकनीया। इसः प्रत्ययस्यतत्रग्रहणात्। कृत्वोर्थ इति किमिति। सुजंतं कृत्वोर्थं न अभिचरतीतिप्रश्नः। चतुरशब्दस्य सुज
न्तत्वे प्रमाणं नास्तीत्युत्तरं। यदि तु साहचर्यं अव्यस्यापकं तदा तदर्थमपिकृत्वोर्थग्रहणं न कर्त्तव्यं। क्रियते च तत् ज्ञापकार्थं एतज्ज्ञापयति
नसर्वत्र साहचर्यं अवस्यापकमिति। किं सिद्धं भवति। दीधवेवीटामित्यत्र धातुसाहचर्य्याभावात् आगमस्येटो ग्रहणं भवति। द्वित्रिश्चतुरितिकिं
पंचकृत्वः करोतीत्यत्र सत्वं माभूत्। नेतदस्ति प्रयोजनमित्याह। इदुदुपधस्येत्यस्यानुवृत्तेरीसत्वामित्यादि। कृत्वोर्थो विषयो यस्य तत्र
योक्तं कृत्वोर्थपदं वर्त्तते तस्य्यो। विसर्जनीयस्येत्येवं विशेष्यमाणस्येत्यर्थः। यदि तु कृत्वोर्थग्रहणेन विसर्जनीयो विशेष्येत न दाचतुरो नस्या

द्वित्रिश्चतुरितिकृत्वोर्थे॥ ॥द्विस् त्रिस् चतुर् इत्येतेषां कृत्वोर्थे वर्त्तमानानां विसर्जनीयस्य षकारादेशो भवत्यन्यतरस्यां
कुप्वोः परतः। द्विष्करोति द्विः करोति। त्रिष्करोति त्रिः करोति। चतुष्करोति चतुः करोति। द्विष्पचति द्विः पचति। त्रिष्पचति त्रिः पच
ति। चतुष्पचति चतुः पचति। कृत्वोर्थ इति किं। चतुष्कपालं चतुष्कं। रुक्तं पूर्वेण नित्यं षत्वं भवति। इदुदुपधस्येत्यस्यानुवृत्तेरीस
त्वं। कृत्वोर्थविषयेण च पदेन विसर्जनीये विशेष्यमाणे द्वित्रिश्चतुरिति शक्यमकर्त्तुं। कृत्वसुजर्थे षत्वं ब्रवीति कस्माच्चतु
ष्कपालेमा। षत्वं विभाषया भून्न तु सिद्धं तत्र पूर्वेण॥ सिद्धे प्रत्ययविधाने च तुरः षत्वं यदापि कृत्वोर्थविषयेण च पदेन विसर्ज्जे
लुप्ते कृत्वोर्थीये रेफस्य विसर्जनीयो हि। एवं सति लिदानीं द्वित्रिश्चतुरिसनेन किं कार्यं॥

ता एतच्च श्लोकेषु मन्त्री करिष्यति। एवं श्लोकवार्त्तिककारमतेन द्वित्रिश्चतुर्ग्रहणं प्रत्याख्यातं तानेव श्लोकाननुदाहरति। कृत्वसुजर्थ इ
ति। कस्माद्धेतोः कृत्वसुजर्थे षत्वं ब्रवीति कृत्वोर्थग्रहणस्य किं प्रयोजनमित्यर्थः। अत्रायं वक्ष्यमाणोभिप्रायः। प्रयोजनमाह चतुष्क
पाल इति। वोदयितास्याभिप्रायं प्रकाशयति न तु सिद्धमिति। न च्चित्यभ्युपगमे मत्वत्वेन न च तुष्कपाले विभाषा तथापि नित्यं षत्वं सिद्धं
कथं। अनेन मुक्तेरिदुदुपधस्य चेति षत्वं भविष्यति। परिहरति सिद्धे प्रत्ययमिति। सिद्धे प्राप्त इत्यर्थः। कथं प्राप्तिरित्याह लुप्ते इति। चतुरस्
इति स्थिते रात्सस्येति सुचो लोपे रेफस्य विसर्जनीयः। सोयमप्रत्ययविसर्जनीयो भवति। यदि सुचो रुत्वं पूर्वस्माद्रोरीति लोपः। रोर्विसर्जनीयः
तदा प्रत्ययविसर्जनीयो भवति। किं तु दूलोप इति दीर्घः प्राप्नोति। रुत्वस्यासिद्धत्वात् पूर्वमेव च लोपेन भवितव्यं। एवं च कृत्वोर्थग्रहणं

राम॰

कथमित्याह। न्योहीति। इतरोपत्तिद्विरादिग्रहणे दोषं दर्शयति। अक्रियमाण इति। विसर्जनीयो विशेष्येतेति। तस्य कार्यित्वेन प्राधान्यादिति
भावः। संभावने लिङ्। विशेष्यते। विसर्जनीयश्चेदोष इत्यत आह चतुर इति। नष्येदिति। अनंतरोक्तविशेषणाच्चतुरो न सिध्यतीति कस्मादिस्यो
हरेफस्येति। क्रियमाणे तु द्विरादिग्रहणे नायं दोष इत्याह तस्मिंस्त्विति। इतरयोर्विशेषाभावाच्चतुरो विशेषणं युक्तमित्युक्तं। प्रत्यासत्त्या
नवाधाह प्रकृतं पदमिति। यदुक्तं कार्यित्वेन प्रधानभूतो विसर्जनीय इतितन्न। सोपि प्रकृतस्य पदस्य विशेषणं तेन च तदंतविधिर्विस
र्जनीयांतस्य पदस्य षत्वमिति। तत्रार्थादल्लोपस्येति विसर्जनीयस्य भवतीत्येतावता। पदमेव तु कार्यित द्विरुक्तं तदंतमितिति तस्या
पातिः अपि शब्दोवधारणेन तस्यैवेत्यर्थः। एवं श्लोकवार्त्तिककारेणासत्यां तेद्विरादिग्रहणे दत्रिकारः स्यादपि तु माहएवमिति। प

। अमोहि नेदुदुपधः कृत्वोर्थः कश्चिदप्यस्ति। अक्रियमाणे ग्रहणे विसर्जनीयस्तदा विशेष्येत। चतुरो न सिध्यति त
थारेफस्य विसर्जनीयो हि। तस्मिंस्तु क्रियमाणे युक्तं चतुरो विशेषणं भवति। प्रकृतं पदं तदंतं तस्यापि विशेषणं स्यात्
। सत्वक्रियमाणे द्विस्त्रिश्चतुर्ग्रहणे वतुः ग्रहस्य कृत्वोर्थे पि वर्त्तमानस्य पूर्वेणा नित्यं सत्वं स्यात् पूर्वत्रासिद्धे नास्ति

विप्रतिषेधो ऽभावदुत्तरस्येति १३ ॥

वेणेति। इदुदुपधस्य चेत्यनेन। षत्वं नित्यं स्यादिति। अस्य तु द्विस्त्रिः शब्दावकाशः। न च परत्वादयमेव विधिः। सिध्यतीत्याह पूर्व
त्रासिद्ध इति। श्लोकवार्त्तिककारस्य त्वयमभिप्रायः। प्रकरणे प्रकरणमसिद्धं न योगे योगः तेनास्यासिद्धत्वं न भवतीति। अथवा इ
दुदुपधस्य कृत्वोर्थस्ते नैप्राप्ते षत्वस्यारंभादपवादत्वमिति। अपवादो वचनप्रामाण्यादिति नासिद्धत्वमिति। अथ सुच एव
लेवकस्मान्नोक्तं किमनेन महता प्रबंधेन। एवमुच्यमाने सुचा विसर्जनीयो विशेष्येत सुचो यो विसर्जनीय इति न तस्य चतुरो
न स्यात्। एवं तर्हि सुजंतस्येति वक्तव्यं सुजंतस्य यो विसर्जनीय इति। एवमपि पदस्येत्यनुवृत्तेर्यत्र सुजंतं पदं तत्रैव स्यात् द्विष्क
रोतीति इह न स्यात् परमद्विष्करोतीति। पक्ष्यसंनत त्सुजंतं तस्मात्सुचोः विहितत्वात्। यत्र सुजंतं द्विरिति न तत्पदं उत्तरपदत्वेवाप

द्वादिविधायाः प्रतिषेधात् १३ ॥

१का०प०३

इसुसोः सामर्थ्ये॥ ॥तिष्ठत्वित्यादि॰ अत्र सर्पिरित्यस्य तिष्ठत्वित्यनेन संबंधः पिबेत्यस्य तूदकमित्यनेनेति परस्परसंबंधाभावाद् सामर्थ्यं॰ सामर्थ्य
मिह व्यपेक्षेति॰ अवधारणमत्र द्रष्टव्यं व्यपेक्षैवेति॰ प्रयोजनं न पुनरत्र वक्ष्यते॰ न पुनरेकार्थीभाव इति॰ अत्राप्यवधारणं द्रष्टव्यं॥ उभयं चेति द्विव
स्यति॰ ननु च सामर्थ्यशब्दः सामान्यशब्दः न च सामान्यशब्दः प्रकरणादिकमंतरेण विशेषेवतिष्ठते तत्कथं व्यपेक्षैव सामर्थ्यं गृह्यते न पुनरेकार्थी
भाव इत्युच्यते उभयं तु कस्मान्न गृह्यते अत आह॰ उभयं वेति॰ नेत्येव॰ उभयमपि गृह्यत इति यत्र द्विधिनेयेत्यर्थः अयं भावः परविधित्वादेवम
र्थपरिभाषेयं स्यान्नात्र सामर्थ्यलक्षे पुनः सामर्थ्यग्रहणादिष्टस्य व्यपेक्षालक्षणस्यैव सामर्थ्यस्य परिग्रहो नेतरस्य नाप्युभयोरिति॥ ॥
नित्यं समासेनुत्तरपदस्थस्य॥ ॥परमसर्पिः कुंडिकेति॰ ननु च अर्चिशुचिहुसृपिछदिछर्दिभ्य इसिः जनेरुसिः अर्तिपृवपियजितनिधनि

इसुसोः सामर्थ्ये॥ ॥इसन्तस्य उसन्तस्य च यो विसर्जनीयस्तस्य षकार आदेशो भवति सामर्थ्ये सति कुप्वोः परतः सर्पिष्करोति सर्पिः
करोति। यजुष्करोति यजुः करोति। सर्पिष्पिबति सर्पिः पिबति। सामर्थ्य इति किं तिष्ठतु सर्पिः पिब त्वमुदकं। सामर्थ्यमिह व्यपेक्षा
न पुनरेकार्थीभावः उभयं वा॥ ॥नित्यं समासेनुत्तरपदस्थस्य॥ ॥समासे इसुसोर्विसर्जनीयस्यानुत्तरपदस्थस्य नित्यं ष
कार आदेशो भवति कुप्वोः परतः। सर्पिष्कुंडिका। धनुष्कपालं। यजुष्पात्रं। सर्पिष्पानं हविष्फलं। अनुत्तरपदस्थस्येति किं
परमसर्पिः कुंडिका परमधनुः कपालं। पूर्वसूत्रेण विकल्पोप्यत्र न भवति। एवं देवानुत्तरपदस्थस्येति वचनमेव ज्ञापकं इसुसोः
प्रत्ययग्रहणीय यस्मात्स विहितस्तदादेस्तदंतस्य ग्रहणमिति स्वयं नियमो नास्तीति तेन न वाक्येपि परमसर्पिष्करोति परमसर्पिः करोती
ति इसुसोः सामर्थ्य इत्येतद्भवति। व्यपेक्षा वत्र सामर्थ्यमाश्रितमिति समासेन भवति॥ ॥

वपिभ्यो नित् इति एवं सर्पिर्यजुरि
त्यादय इसुसंता उणादयः तेन तत्र प्रत्ययग्रहणपरिभाषया सर्पिरादीनामेवेसुसंतत्वं न परमसर्पिरादीनां तत्कथमत्र प्रसंगः अवश्यं चोणा
दीनामप्यत्र इसुसन्निपक्षे एवाश्रयणीयः अनुत्पन्नपक्षे हि आशिषा सर्पिषा यजुषा दोषत्वं न सिध्यति अप्रत्ययसकारत्वात्॰
तस्मादनर्थकमनुत्तरपदस्थग्रहणमत आह॰ एतदेवेत्यादि॰ ज्ञापनस्य प्रयोजनमाह तेनेति। अथ पूर्वसूत्रेणासमासेपि विकल्पः कस्मा
न्न भवतीत्यत आह व्यपेक्षा चेति। केचित्तु नित्यं समासे इत्येको योगः अनुत्तरपदस्थस्येति द्वितीयः तेन योगविभागेन सर्वेषां तत्प्राप्ति
रनुत्तरपदस्थस्य प्रतिषिध्यत इति वदंतः पूर्वत्र द्विविधेपि सामर्थ्ये समाश्रितेन न दोष इत्याहुः॥ राम०

॥अतः कृकमिकंस ॥ कृकमीति धातुग्रहणं। उत्तरस्त्रस्त्रस्यग्रहणं। अयस्कार इति कर्मण्यण्। अयस्काम इति। शीलिकामीत्या
दिना णप्रत्ययः। अयस्कंसः षष्ठीसमासः। कंसग्रहणमनर्थकं कमिग्रहणेनैव सिद्धत्वात् कंसशब्दो हि रत्नवद्दिहृनिकभिन्नः
सर्वतिकमेरेव मुत्पाद्यते। ज्ञापनार्थं तु सत्त हापयति उणादिषु नावश्यमुत्पत्तिकार्यं भवतीति। अयस्कुम्भीति। कुम्भशब्दो ज्ञातिलक्ष
णो ङीष्। अयस्पात्रीति। पात्रशब्दष्ट्रन्प्रत्ययान्तः षित्वान्ङीष्। अयस्कुशेति। नात्रायो विकारो विवक्षितस्तस्मन्नयट् दादिसूत्रेण

॥अतः कृतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य। अकारादुत्तरस्यानव्ययविसर्जनीयस्य समासेऽनुत्तरपदस्थ
स्य नित्यं सकार आदेशो भवति। कृकमिकंसकुम्भपात्रकुशाकर्णीइत्येतेषु परतः। कृ। अयस्कारः पयस्कारः। कमि। अयस्का
मः। कंस। अयस्कंसः पयस्कंसः। कुम्भ। अयस्कुम्भः पयस्कुम्भः। अयस्कुम्भी पयस्कुम्भी अत्रापि भवति प्रातिपदिकग्रहणे लिं
गविशिष्टस्यापि ग्रहणमिति। पात्र। अयस्पात्रं पयस्पात्रं। अयस्पात्री पयस्पात्री। कुशा। अयस्कुशा पयस्कुशा। कर्णी। अ
यस्कर्णी पयस्कर्णी। पुनस्कर्णीइत्ययं तु कस्कादिषु द्रष्टव्यः। अत इति किं। गीः कारः। तपरकरणं किं। भाः करणं भास्क
रइत्ययं तु कस्कादिषु द्रष्टव्यः। अनव्ययस्येति किं। स्वः कारः पुनः कारः। समास इत्येवायमः करोति यशः कामयते। अ
नुत्तरपदस्थस्येत्येव परमपयः कारः परमपयः कामः १४ ॥
ईषत्न भवति अयस्कर्णीति। अपरवककर्णी यस्याः सा अयस्कर्णी। नासिकोदरेत्यादिना ङीष्। श्रुनस्कर्णीइत्ययं त्विति। सत्रेली कामांतस्य
ङीषत्न भवति अयस्कर्णीति। अयस्पात्री। कर्णीशब्दस्यानिर्देशादृशप्रसंगः। भाः करणमिति षष्ठीसमासः। भास्कर इत्ययं त्विति। दिवाविभेत्यादिना टप्रत्ययः। जपादित्वस्तु तस्मि
न्सत्रे वा चेद्भास्कारांतेति प्रत्ययसंनियोगेन सत्वं निपात्यत इति। स्वः कारः पुनः कार इति द्यं तेन मयूरव्यंसकादित्वात्समासः॥

॥१४॥ ॥१४॥

रका॰प॰३

अधःशिरसी॥ ॥इत्येतयोरिति। सूत्रेतुषष्ठीस्थानेप्रथमा। पद इतिस्वरूपस्य ग्रहणं नतुप्रत्ययः तस्य तस्य समासाधिकारादेवसिद्धत्वात्। तदाह पदशब्दे परत इति। मयूरव्यंसकादित्वात्समासः इति अधस्पदमित्यत्र। शिरस्पदमित्यत्र षष्ठीसमासः॥ ॥कस्कादिषुच॥ ॥कुप्वोःकपौ चेत्यस्यापवादः। यथायोगमिति। इणः परस्य षत्वमन्यस्य सत्वमित्युभयथा यथायोगार्थः। कस्क इति। स्वांतस्य किमो वीप्सायां द्विर्वचनं कौतस्कुत

अधःशिरसीपदे॥ ॥अधस्शिरस् इत्येतयोर्विसर्जनीयस्य समासेनुत्तरपदस्थस्य सकारआदेशो भवति पदशब्दे परतः। अधस्पदं शिरस्पदं। मयूरव्यंसकादित्वात्समासः। समास इत्येव। अधः पदं शिरः पदं। अनुत्तरपदस्थस्येत्येव। परमाधःपदं परमशिरःपदं॥ ॥कस्कादिषुच॥ ॥कस्क इत्येवमादिषु च विसर्जनीयस्य षकारः सकारो वा यथायोगमादेशो भवति कुप्वोःपरतः। कस्कः। कौतस्कुतः। ततआगत इत्यण्। भ्रातुष्पुत्रः। शुनस्कर्णः। सद्यस्कालः। सद्यस्क्रीः क्रीणातिरयं संपदादित्वात्क्विबंतः। तत्रभवः क्रतुः साद्यस्कः। कांस्कान्। कानाम्रेडित इति रुत्वं। सर्पिष्कुंडिका धनुष्कपालं यजुष्पात्रं इत्येतेषां पाठ उत्तरपदस्थस्यापि षत्वं यथास्यादिति पारायणिका आहुः। भाष्येतु नेति समासेनुत्तरपदस्थस्येत्यत्र परमसर्पिःकुंडिकेत्येव प्रत्युदाहरणं। पयस्कांडः। अयस्कांतः मेदस्पिंडः। अविहितलक्षणस्तूपचारः कस्कादिषु द्रष्टव्यः

इति। कुतःशब्दस्य पूर्ववद्द्विर्वचनं तस्मात्तत आगत इत्यण्। अव्ययानां भमात्रे टिलोपः। भ्रातुष्पुत्र इति। अनोविघोषोतिसंबंधेष्पर इत्युक्। शुनस्कर्ण इति। षष्ठ्या आक्रोश इत्यलुक्। पारायणेनद्वीक्षंतिमवहरंतीति पारायणिकाः पारायणं द्विविधं धातुपारायणं नामपारायणमिति। भाष्येत्विसादिनाः नंतरोक्तमर्थं निराकरोति। अविहितलक्षणइत्यादिनाः कृतिगणोयमिति दर्शयति। विसर्जनीयस्थानिकयोः सकारषकारयोरुपचार इति संज्ञा॥ ॥ रामं०

शाकोरितिवर्त्ततेतत्र कवर्गीयसांसंभवादिणाइतिसंबध्यतेतत्रयदीणात्उपसर्गोविशेष्येत इणंतादुपसर्गादितिइदन्तस्मात् निष्षुणोतिदुष्षु
णोमीतितस्मादुपसर्गोणोणाविशेषणीयः उपसर्गस्येणाइतिनिरुपसर्गादितिपंचमीतत्कथमित्यविशेष्यते। नत्रूमोवैयधिकरण्येनविशे
ष्यतइतितास्थ्यात्ताच्छब्द्यं उपसर्गादिणाः उपसर्गस्थादिणाइति। तत्रधार्मवायस्माश्रितत्वान्निसोपिपरस्यषत्वंभवति। नदिदमुक्तमुप
सर्गस्थान्निमित्तादिति। इषिसिंचतीतिस्मासदाघोरितिप्रतिषेधएवात्रभवति। तदेवादम्बायां। निःसेवकइति। निरयमुपसर्गएवनत्क
थमिदंप्रत्युदाहरणमत आह नार्थमितिचेदुपसर्गादितियत्क्रियायुक्ताः प्रादयस्तंप्रतिगत्युपसर्गसंज्ञेभवतः। अभिषावकीयतीति।
सावकशब्दादाचारेक्युलन्तात्क्यङ्। तस्याभिनायोगः। सुनोतिनायोगेनुभवसेव। अभिषावकमिच्छतिअभिषावकीयतीतिएषनेष्यतेहिति
जर्थेनप्रेषादित्तोपसर्गस्ययोगोनप्रकृत्यर्थेनेतिषत्वाप्रसंगेतस्मादाहाभिषावयतीत्यत्रेति। अभिषवविषयाप्रयुक्तिर्नत्वप्रयुक्तेऽभि
नायोगाइत्यर्थः। यदातुप्रयुक्तेऽभिनायोगस्तदानैवषत्वंभवति। किंतुप्रकृत्यर्थेनासंसृष्टस्यप्रयुक्तिमात्रस्याभिनायोगः कीदृशइ
तिचिंत्यं॥ ॥सदिरप्रतेः॥ ॥सदिरितिषष्ठ्यर्थेप्रथमा। निषसादेति। सदिः स्वंजोः परस्यलिटीतिप्रतिषेधादभ्यासात्परस्यन
भवति॥ ॥स्तंभेः॥ ॥स्तंभिः सौत्रोधातुः। अभिष्टभ्नातीति। स्तंभुस्तुंभुस्कंभुस्कुंभुस्कुञ्भ्यः श्नुश्चेति श्नाप्रत्ययः। अनिदिता
मितिनलोपः। अप्रतेरित्येतदिहनानुवर्त्ततइति। यद्यनुवर्त्तेतपूर्वसूत्रएवस्तंभिग्रहणंकुर्यात्किंयोगविभागेन। अस्तिप्रयोजनं।
किं। अवाच्चालंबनाविदूर्ययोरितिवक्ष्यति तत्स्तंभेर्यथास्यात् एतेर्माभूत्। नैतदस्ति। एकस्मिन्नपियोगेयथास्यात् तंबनाविदूर्ययोः।
सएवानुवर्त्तिष्यतेस्तंभेरेवचतेसंभवतः २१ ॥

८का०प०३ अवाच्चालंबना॥ ॥आलंबनमाश्रयणं विदूरं विप्रकृष्टं तदन्यदविदूरं तस्य भावश्राविदूर्यं अतएव निपातनान्नञर्थः ष्यञ्‌ गुणवचनब्राह्म
णादित्वात् प्यञ्‌। अवष्टभ्येतिल्यबन्तादिकमवलम्बनेस्यार्थः। अवष्टब्धेति आसन्नेत्यर्थः। अवस्तब्धइति अस्पष्टमित्यर्थः॥ ॥वेश्च स्वनो भोजने॥ ॥
उदाहरणेषु स्वार्थपरित्यागेन भोजनमात्रे स्वनिर्वर्त्तत इति शंकामपनयति। अभ्यवहारक्रियाविशेष इति। तमेव विशेषं दर्शयति यत्रेति। विष्वणा
अवाच्चालंबनाविदूर्ययोः॥ ॥अवशब्दादुपसर्गादुत्तरस्य स्तंभेः सकारस्य मूर्द्धन्यादेशो भवति आलंबने आविदूर्ये च। आ
लंबनमाश्रयणं। अविदूरस्य भाव आविदूर्यं आलंबने तावत् अवष्टभ्यास्ते अवष्टभ्य तिष्ठति। आविदूर्ये। अवष्टब्धा सेनाऽव
ष्टब्धा शरत्। आलंबनाविदूर्ययोरिति किं। अवस्तब्धो वृषलः शीतेन। अनिमित्तार्थोयमारंभः॥ ॥वेश्च स्वनो भोजने॥ ॥
वेरुपसर्गाद्वा चोत्तरस्य भोजनार्थस्य स्वनतेः सकारस्य मूर्द्धन्यादेशो भवति। विष्वणति अवष्वणति। व्यष्वणत् अवाष्वणत्। विष
ष्वाण अवषष्वाण। अभ्यवहारक्रियाविशेषोभिधीयते यत्र स्वननमस्ति। भोजन इति किं। विस्वनति मृदंगः अवस्वनति वीणा
॥ ॥परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वंजां॥ ॥ परिनिवि इत्येतेभ्य उपसर्गेभ्य उत्तरेषां सेव सित सय सिवु सह
सुट् स्तु स्वंज इत्येतेषां सकारस्य मूर्द्धन्यादेशो भवति· परिषेवते निषेवते विषेवते अनुषेवते अपषेवत परिषिषेवे विषिषेवे निषिषे
वे विषिषेवे विषिषेवे· सित· परिषितः निषितः विषितः सय· परिषयः निषयः विषयः। सिवु· परिषीव्यति निषीव्यति विषीव्यति·
सह· परिषहते निषहते विषहते· सुट्· परिष्करोति· स्तु· परिष्टौति निष्टौति विष्टौति· स्वंज· परिष्वजते निष्वजते विष्वजते· स्त्वस्वं
जिग्रहणमुत्तरार्थं अड्व्यवायेविभाषायथास्यात्॥ ॥श्री०॥ ॥
तीतिसशब्दं भुंक्त इत्यर्थः॥ ॥परिनिविभ्यः॥ ॥सेवतिर्भ्वादिष्वनुदात्तेत्। सित इति षिञ्‌ बंधने क्तांतः। सय इति स्वेरजंतः। षिवु तंतु रा०म०
संताने दिवादिः। षह मर्षणे अनुदात्तेत्। सुडिति सुट्कात्पूर्वस्येत्यस्य ग्रहणं। स्तुस्वं ज्जौ उक्तार्थौ। तयोरुपसर्गात्सुनोतीत्यादिनैव सिद्धेप
र्यादिपूर्वयोरुत्तरसूत्रेण अड्व्यवायेविकल्पार्थं वचनं॥ ॥छ छ॥ ॥छ छ॥ ॥छ॥ ॥

अधः शिरसी॥ ॥इत्येतयोरिति। सत्रेतु षष्ठी स्यात्॥ छंदसि वा॥ ॥अपस्पात्रमिति। असमासोपसमासेऽप्यतः कृकमीकंसादिना नित्यं सत्वं प्राप्नोति। अस्य विकल्पस्यासिद्धत्वात्। असमासे चास्य विकल्पस्य चरितार्थत्वात्। पदि वा प्रकरणे प्रकरणाम सिद्धमिति पक्षे समासे प्युदाहरणं क्रियते नेन मुक्ते तेन नित्यं प्राप्नोति। तस्मात् समास एवायं। समासे तु यदि विकल्पो दृश्यते सच्छंदस त्वेनोपपाद्यः। विश्वतस्पात्रमिति। अत्रानपत्यादतः कृकमीकंसस्यापसंगः। उरुणस्कार इति। अस्मादेन सादेशः। नश्च धातुस्थोरुषुभ्य इति णत्वं। कारशब्दो घञन्तः। अत्राऽसमासत्वादप्रसंगः। अग्निः प्रविद्वानिति। अत्र षत्वप्रसंगः उपक्रमे तु सकार आदेश उपलभ्यते। परुषः परुष इति वीप्सायां द्विर्वच

॥छंदसि वाऽऽम्रेडितयोः॥ ॥छंदसि विषये विसर्जनीयस्य वा सकार आदेशो भवति कुप्वोः परतः प्रशाद्द्वमाम्रेडितं च वर्ज यित्वा। अपस्पात्रं अपयापात्रं। विश्वतस्पात्रं विश्वतः पात्रं। उरुणस्कारः उरुणः कारः। अपाम्रेडितयोरिति किं। अग्निः प्र विद्वान्। परुषः पुरुषः परि। हरिकेशः पुरस्तात्। पावक इत्येवमादिषु सर्वे विधयः छंदसि विकल्पंत इति सत्वं न भव ति॥ ॥कः करत्करति कृधि कृतेष्वनदितेः॥ ॥कः करत करति कृधि कृत इत्येतेषु परतः अनदितेर्विसर्जनीयस्य सकार आदेशो भवति छंदसि विषये। कः। विश्वतस्कः। करत्। अपस्करत्। करति। ययस्करति। कृधि। उरुणस्कृधि। कृत। सस्कृत।
अनदितेरिति किं। यथा नो ऽदितिः करत् १५ ॥
वोऽस्यंगमंगं पस्पष्णहं परुष्पहर न् नुब्रुष्या विशस्त्रेसाद्यस्लुकस्कादिषु दृष्टमा। ऽरु
रिकेशः पुरस्तादित्यादेरत्रोपयोगं न पश्यामः कथमत्रैवसत्रेवाग्रहणात्। सत्वाषत्वयोर्भावाभावो प्रतिपादितो। किमत्र सर्वे विधयश्छंदसि विकल्पं तरस्य तेन॥ ॥कः करत्करति॥ ॥करिति कृञो लुङ्। मंत्रे घसेत्यादिना च्लेर्लुक्। तिपि गुणः। तिपो हल्ङ्यादिलोपः। बहुलं छंदस्यमाङ्योगेऽपी त्यडभावः। करदिति कृञ एव लुङ्। कृमृदृरुहिभ्यश्छंदसीति च्लेरङ्। करतीति लट्। अस्य नेन शप्। कृधीति कृञो लोटः सेर्हिः। बहुलं छंदसीति श पो लुक्। श्रुशृणुपृकृवृभ्यश्छंदसीति हेर्धिरादेशः। कृतमिति कृञ एव क्तः। सकार आदेश इति षत्वस्याप्युपलक्षणमेतदिति। तथाचादिति प्रतिषेधः। विश्वतस्करिति। अनपत्यादसमासत्वाच्चातः कृकमीकंसस्याप्रसंगः। इत्येषु त्वसमासत्वादप्रसंगः। शंनः करतीति यथा नः श्रेयसः करदित्यादौ छांदसत्वात्सत्वाभावः। तथा कृधीत्यत्र सकारः कारकशब्दे परतस्त्रैपादिके सत्वे न भवति। तन्म आमनसः कृधि स्वाहा। उरु

क्षपापनः कृधिष्ठतंमस्यासेर्णचनः कृधिकृत्वे १५ ॥

पंचम्याः॥ ॥अध्यर्थ इति परे इदं विशेषणं। हिमवतस्परि। हिमवत्तउपरीत्यर्थः। असत्येनपंचम्याः स्थानेपंचम्याः प्रयोगः। युयोजिउद्धृतमिति। अत्रपरिः सर्वतोभावेवर्त्तते॥ ॥पातौच॥ ॥क्वचित्सध्यतेयातावितिधातुनिर्द्देश इति। अस्मेतदुदाहरणायथीलोचनया

पंचम्याः परावध्यर्थे॥ ॥पंचम्याविसर्जनीयस्यसकारआदेशोभवतिपरौपरतोऽध्यर्थेछंदसिविषये। दिवस्परिप्रथमंजज्ञे। हिमवतस्परि। पंचम्या इति किं। अहिरिवभोगैः पर्येति बाहुं। परावितिकिं। एभ्योवाएतल्लोकेभ्यः प्रजापतिः समैरयत्। अध्यर्थ इति किं। दिवस्पृथिव्याः पर्योजउद्धृतं। आध्यर्थउपरिभावः॥ ॥पातौचबहुलं॥ ॥पातौचपरतः पंचम्याविसर्जनीयस्यबहुलंसकारादेशोभवतिछंदसिविषये। दिवस्पातु। नचभवतिपरिषदः पातु॥ ॥षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु॥ ॥षष्ठ्याविसर्जनीयस्यसकारआदेशोभवतिपतिपुत्रपृष्ठपारपदपयः पोष इत्येतेषुपरतश्छंदसिविषये। वाचस्पतिंविश्वकर्माणमूतये। पुत्रदिवस्पुत्रायसूर्याय शंसत। पृष्ठ। दिवस्पृष्ठेधावमानंसुवर्णं। पार। अगन्मतमसस्पारं। पद। इडस्पदेसमिध्यसे। पय। सूर्यंचक्षुर्दिवस्पयः। पोष। रायस्पोषंयजमानेषु। षष्ठ्या इति किं। मनुः पुत्रेभ्योदायंव्यभजत्॥ ॥इडायावा॥ ॥षष्ठीविसर्जनीयस्यइडाशब्दसंबंधिनोवासकारआदेशोभवतिपत्यादिषुपरतश्छंदसिविषये। इडायास्पतिः इडायाः पतिः। इडायास्पुत्रः इडायाः पुत्रः। इडायास्पृष्ठं इडायाः पृष्ठं। इडायास्पारं इडायाः पारं। इडायास्पदं इडायाः पारं। इडायास्पदं इडायाः पदं। इडायास्पयः इडायाः पयः। इडायास्पोषः इडायाः पोषः॥ ॥अपदांतस्यमूर्द्धन्यः॥ ॥अपदांतस्यमूर्द्धन्य इति चैतदधिकृतंवेदितव्यं आपादपरिसमाप्तेर्यदितऊर्ध्वमनुक्रमिष्यामः अपदांतस्यमूर्द्धन्योभवतीत्येवंतद्वेदितव्यं। वक्ष्यति। आदेशप्रत्यययोः सिषेव। सुष्वाप। अग्निषु वायुषु। अपदांतस्येतिकिं। अग्निस्तत्रवायुस्तत्र। यद्यस्येत्यपिद्वेलोऽन्तानुकरणंमन्यंते॥ ॥षष्ठ्याः पतिपुत्र॥ ॥वाचस्पतिमिति। तत्पुरुषेकृतिबहुलमित्यलुक्॥ ॥अपदांतस्य॥ ॥मर्द्धिमवोमूर्द्धन्यः शरीरावयवाद्यत्। येवाभावकर्मणोरितिप्रकृतिभावान्नलोपाद्भुत इति टिलोपाभावः। सुष्वापेति॥ लिट्यभ्यासस्योभयेषामितिसंप्रसारणंग्रहणाक्रियेत। उत्तरेषुयोगेषुपुनः षग्रहणंकर्त्तव्यं। मूर्धन्यग्रहणेतुक्रियमाणेनदोषोभवति॥

१८०

सहेः साडः सः॥ ॥साड्रूपस्येति। साडिति सहेरूपं ग्राम्यस्य सर्थ्यः। जलाषाडिति। भजो ण्विः। छन्दसि सहः। उपधाया वृद्धिः। ढत्वं जश्त्व चर्त्वे अन्येषाम
पि दृश्यत इत्युपपदस्य दीर्घः सकारस्यान्तरतमो मूर्द्धन्यः षकारः सहेः रिति किमिति। अस्मत्र साड्‌शब्दस्य सेभवं मन्यमानस्य प्रश्नः। सहादेने
ति। अडोऽत्वाभ्यिकलो ग्रलो। तस्यापत्यं साडिरिति मिसौ उरस्यात्र तु साड्‌ शब्दस्यानर्थकत्वात् प्रसङ्गोऽमत्वात द्धितांतः प्रत्युदाहृतः नत्र हियस्येति
लोपे कृते साड्‌शब्दोऽर्थवान् भवति। न च पस्येति लोपस्यासिद्धत्वात् पूर्वत्रासिद्धेन स्यानिवदिति वचनात्। एवमपि घत्व कुत्वेरसिद्ध इत्येका
देशस्यासिद्धत्वात् साड्‌शब्दस्याभावः। तस्मात्सहडेनवर्त्तत इति पाठः। यस्मिन्नामिड शब्दो वर्त्तते स मडः यथाम्र इति तस्यापत्यं साडिः। न

॥ ॥सहेः साडः सः॥ ॥सहेर्धातोः साड्रूपस्य यः सकारस्तस्य मूर्द्धन्यादेशो भवति। जलाषाट् तुराषाट्। एतना
षाट्। सहेरिति किं। सहडेनवर्त्तत इति सडः तस्यापत्यं साडिः। साड्‌ग्रहणं किं। यत्रैतद्रूपं तत्र यथा स्यादिह मा भूत् तु
राषाहमिति। स इति किं। आकारस्य मा भूत् १६ ॥

न्वत्रापि बहिर्भूतत्वाद्धितायेत्वा वृद्धिरंतरंगा वृद्धिः। कृतनर्हि स्याज्जलाषाडिति। नन्वत्रापि बहिर्भूततरामपेक्ष्याबहिरंगैव वृद्धिः। अथवा
त्र वचनाद्भवति। इहापि प्राप्नोति तुराषाहमिति। तुरासाहं पुरोधाये स्यादौ तु णिविरेवमूग्यः प्रागेव षत्वं। आकारस्य मा भूदिति। अंत्यस्य
मा भूदिति तु नोक्तं डकारस्य डकारवचने प्रयोजनाभावात्। अथाप्यनेनान्तरतममूर्धन्यार्थवचनं स्यादेवमप्यपदान्तस्येत्यस्य न भ
विष्यति। नन्वेवमप्यलोन्त्यस्येत्यस्मिन्न्बाधिते सर्वादेशो मूर्द्धन्यः प्राप्नोति। किमुच्यते आकारस्य मा भूदिति। उच्यते। अनंत्यविका
रेऽन्त्यसदेशस्येत्याकारस्याकारः प्राप्नोति १६ ॥

र का॰प॰३

इण्कोः॥ ॥इणिति परेणैव णकारेण प्रत्याहारः कुरिति कवर्गस्य ग्रहणं तयोः समाहारद्वन्द्वे एकवचनं। नुमागमस्तु सत्यपि नपुंसकत्वेन
कृतः अनित्यमागमशासनमिति कृत्वा। वाह्विति। चोः कुरिति कुत्वे कवर्गस्य सकारः। वर्गग्रहणं शास्विवस्विघसीनां चेत्यत्र वकारस्यापि
ग्रहणार्थं जक्षतुरिति अन्यथा चर्त्वस्यासिद्धत्वान्न स्यात्। अथ वचनसामर्थ्याच्चर्त्वस्यासिद्धत्वमाश्रीयेत तर्हि वर्गग्रहणस्य प्रयोजनं। द्
स्यतीति। ननु चनाद्रस्तला विसर्जनाग्रहीतसवर्णानामवग्रहणमित्यसकृदुक्तं तत्तथ्यं यथा कुमारीशेत इत्यत्रैकारशकारशकारयोः साव

इण्कोः॥ ॥इण्कोरित्येतदधिकृतं वेदितव्यं। इतउत्तरं यदनुक्रमिष्यामः इणः कवर्गाच्चेत्येवं तद्वेदितव्यं। वक्ष्य
ति। आदेशप्रत्यययोः सिषेव सुष्वाप अग्निषु वायुषु कर्तृषु भर्तृषु गोषु नौषु गीर्षु धूर्षु वाक्षु त्वक्षु। इण्को
रिति किं दास्यति। अग्नौ॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥छ॥ ॥

र्ण्यमप्रतिषिद्धं तथा आकारहकारयोरपि। ततः किं हकारे णोणाकारस्य ग्रहणात्षत्वप्रसंगः। नैष दोषः। हकारो विवृतः आकारो
विवृततरः। एवं हि पठन्ति। विवृतकरणाः स्वराः तेभ्य ए ओ विवृततरौ ताभ्यामैऔ ताभ्यामप्याकारः संवृतो ऽकार इति। एवं च हकारश्च
कारमुपवयस्यास्यिसादयोर्निर्देशादुपपद्यते। अमाविति। अदसो सुलोपश्च। तदोः सः सावित्यादेशसकारो षत्वं न लभिणकोः परः॥ ॥

१११०

॥सदिस्वंज्योः परस्य लिटि॥ ॥लिटि द्विर्वचने कृते द्वौ सकारौ भवतः तत्र सदेः स्यादिष्वभ्यासेन चेति वचनात्सीदः प्रतेरिति षत्वप्रसंगः स्वंजेरप्युपसर्गात्सुनोतीत्यादिना । परिषिस्वजे इति कथं पुनरत्र नलोपः यावता संयोगान्तत्वान्नात्र लिटः कित्वमस्ति अत आह स्वंजेरिति । एतच्चेह्यत्र भवति । भाष्ये सत्र व्याख्यातं । स्वंजिग्रहणं च वार्त्तिकदर्शनात्सूत्रे प्रक्षिप्तं यथाह सदे लिटि प्रतिषेधे स्वंजेरुपसंख्यानमि

॥सदिस्वंज्योः परस्य लिटि॥ ॥सदि स्वंजि इत्येतयोर्लिटि परतः परस्य सकारस्य मूर्द्धन्यादेशो न भवति । अभिषसाद परिषसाद । अभिषस्वजे परिषस्वजे । अभिषस्वंजे परिषस्वंजे । स्वंजेः संयोगान्तादपि विभाषा लिटः कित्वमिष्यते इति पक्षेनुषंगलोपः॥ ॥निव्यभिभ्योड्व्यवाये वा छंदसि॥ ॥नि वि अभि इत्येतेभ्य उत्तरस्य सकारस्याड्व्यवाये छंदसि विषये वा मूर्द्धन्यादेशो न भवति । न्यषीदत्पिता नः । न्यसीदत्पिता नः । व्यषीदत्पिता नः । व्यसीदत्पिता नः । अभ्यषीदत्पिता नः । अभ्यसीदत्पिता नः । सदिस्वंज्योरितीह नानुवर्त्तते सामान्येन विधानं तेनान्यदपि भवति । न्यष्टौत् न्यस्तौत् । व्यष्टौत् व्यस्तौत् । अभ्यष्टौत् अभ्यस्तौत्॥ ॥छ॥ ॥इति वामनकाशिकावृत्तावष्टमस्याध्यायस्य तृतीयः पादः ३० ॥ ॥श्रीराम॥ ॥श्री॥ ॥श्रीः॥ ॥श्री॥ ॥

ति॥ ॥निव्यभिभ्योड्व्यवाये वा छंदसि॥ ॥प्रकरणेन प्राप्तस्य षत्वमात्रस्य प्रतिषेधः । न्यष्टौदिति उतो वृद्धिर्लुकि हलि । अभ्यस्था विश्वाः पृतना अराजीरित्यप्युदाहरणम्॥ ॥छ॥ ॥इति श्रीहरदत्तमिश्रविरचितायां पदमंजर्यामष्टमस्याध्यायस्य तृतीयः पादः ३० ॥ ॥

रषाभ्यां नो णः समानपदे॥ ॥निमित्तयोरादेशो चाकारउच्चारणार्थः॥ समानं च तत्पदं च समानपदं निमित्तनिमित्तिनोश्चा
धमाधारनिर्देशः तदाह समानपदस्थौ चेदिति। एकपर्यायः समानशब्दः निमित्तं रषौ निमित्ती नकारः पद्यप्रसौ प्रागेव सि
द्धस्वरूपस्तथापि तत्स्थानिभवतो णकारस्य यन्निमित्तं तस्मापि ते न मंभवं भोत्वेव णकारएव वा निमित्तीतस्य तु विधानोत्र

रषाभ्यां नो णः समानपदे॥ ॥रेफषकाराभ्यामुत्तरस्य नकारस्य णकारादेशो भवति समानपदस्थौ चेन्निमित्त
निमित्तिनौ भवतः। आस्तीर्णं विस्तीर्णं अवगूर्णं। षकारान्तात्। कुष्णाति मुष्णाति। षग्रहणमुत्तरार्थं। षुत्वे
नैव सिद्धमेतत्। समानपद इति किं अग्निर्नयति वायुर्नयति। अवर्णाच्चेति वक्तव्यं। निम्नगानां वनस्पतीनां। पि
तृणां मातृणां। ऋश्रुतिसामान्यनिर्देशात् सिद्धं। वर्णान्तराचयवधानेपि णत्वं भवतीति शुश्रूषादिषु नृनम
नत्र्योतिग्रहणं ज्ञापकं। अथवा अवर्णादपि णत्वं भवतीत्येतदेवतेन ज्ञाप्यते १ ॥ ॥श्री४ ॥

रकालं समानपदस्थत्वं षग्रहणमुत्तरार्थमिति। अडादिव्यवायेपि णत्वं वक्ष्यतीति तदाहरिषि यथा स्यात्। अथेहार्थमपि कु
र्यान्नभवति अत आह· षुत्वेनैव सिद्धमेतदिति· अवर्णाच्चेति वक्तव्यमिति· रषाभ्यां णत्वमुच्यमानमकारान्नप्राप्नो
तीति वचनं· न च शक्यं वक्तुमवर्णस्याद्रेफाद्व्यवधानमिति· वर्णोऽसत्र रेफः ऋत्र उपात्तः षकारेण साहचर्यात्· न च च
लौकिके शावर्णग्रहणे न गृह्यते॥ ॥

तिणामिति । नतिसृवत । सृइति प्रतिषेधान्नामीति दीर्घत्वाभावः तत्र हि विकर्मंतेत्याह ऋश्रुति सामान्यनिर्देशात् सिद्धमिति । ऋइति
श्रुतेः श्रोत्रेणोपलभ्यमानयोस्तत्रश्रुतौ वर्णात्मिका चावर्णात्मिका व्यक्तिस्तयोर्वर्तते सामान्यं तन्निर्दिश्यते तेन तु वर्णात्मिके व्यक्ति
रित्यर्थः ॥ नन्वेवमपि ऋकारस्त्रयो भागाः अभितो ज्भक्तिर्मध्ये रेफभक्तिर्मात्रा च तुर्भागात्मिकातत श्च परयाज्भक्त्या व्यवधानान्न
प्राप्नोति । अत्र अव्यवाये इत्येवं भविष्यति । न यराज्भक्तिरङ्कुसंनिविष्टा । सा ह्यर्द्धमात्रा च तुर्भागात्मिका अकारभक्तिर्न च तत्स्याः
सवर्णग्रहणेनाप्यच्ग्रहणेन ग्रहणम् । असवर्णत्वात् । न हि तस्याः स्थानं प्रयत्नो वा पृथगस्ति । तस्मात्सामान्यनिर्देशेपि नैव
णत्वं सिध्यति अत आह वर्णभक्त्या चेति । वर्णस्य समुदायस्यावयवभूता याज्भक्तिस्तयेत्यर्थः । ननु च नृनमनग्रहणं कृत्य
र्थं स्यात् नृनमनस्याय त्वं नानिमनिरिति । नैतदस्ति । बहिरंगत्वाद्धि अन्तरंगेण त्वं असिद्धं बहिरंगमन्तरंगे अथ वेति । भक्ति
निर्देशेपि न दोष इत्यर्थः । अपरः प्रकारो मितोऽप्यकाच तुर्भागात्मिके मध्ये शुद्धो रेफो ऽर्द्धमात्रात्मकस्तेन भक्तिनिर्देशेप्य
दोष इत्यर्थः । ननु च परयाज्भक्त्या व्यवधानात् एवं युत्तरसूत्रे योगविभागः अव्यवायेपि णत्वं भवति । ततो ऽट्कुप्वाङ्नुम्भिरिति ।
इदमिदानीं किमर्थं नियमार्थं वर्णात्मकेऽव्यवायेयदि भवति अडादिभिरेवेति । अपदान्तस्य मूर्द्धन्य इत्यधिकारात्त्रस्मात्र
हरोशकाम कर्तुं उत्तरत्र च पदान्तस्येति प्रतिषेधः ॥ ॥ १ ॥ ॥ श्री ४ ॥ ॥ श्री ७ ॥ ॥ ८ ॥ ॥

॥ श्री ४ ॥ ॥ ७ ॥॥

१ का. प. ३

अट्कुप्वाङ्। ॥ रषाभ्यामिति पंचम्या निर्दिष्टा व्यवायेन प्राप्नोतीत्ययमारंभः। पर्याणद्धमिति। नह बंधने पर्याङ्पूर्वः। निष्ठान
होधः। ननु वा अव्यवाय इत्येवात्र णत्वं सिद्धं तत्किमर्थमाङ्ग्रहणमित्यत आह। अव्यवाय इत्येव सिद्ध इति। किं त्विन्नुमोङ्ग्रहणं पद
व्यवायेपीत्यस्य वाधनार्थमित्येतावदुच्यते। बृंहणमिति। बृहि वृद्धौ। इदितो नुम्। नश्चापदान्तस्य झलीत्यनुस्वारः। यद्येवमनु
स्वारः। यद्येवमनुस्वारेणात्र व्यवायो न नुमा तत आह नुम्ग्रहणमनुस्वारोपलक्षणार्थमिति। स न परस्य नुमोनुस्वारविधाना

अट्कुप्वाङ्नुम्व्यवायेपि॥ ॥ अट् कवर्ग पवर्ग आङ् नुम् इत्येतैर्व्यवायेपि रेफषकाराभ्यामुत्तरस्य नकारस्य णकारादेशो भवति। अड्व्यवाये तावत्। करणं हरणं। किरिणा गिरिणा। कुरुणा गुरुणा। कवर्गव्यवाये। अर्केण मूर्खेण। गर्गेण अर्घेण। पवर्गव्यवाये। दर्पेण रेफेण। दर्भेण चर्मणा। आङ्। पर्याणद्धं निराणद्धं। अव्यवाय इति सिद्धे आङ्ग्रहणं पदव्यवायेपीत्यस्य प्रतिषेधस्य वाधनार्थं। नुम्व्यवाये। बृंहणं बृंहणीयं। नुम्ग्रहणमनुस्वारोपलक्षणार्थं द्रष्टव्यं। तेनेह तृंहणं तृंहणीयमित्यत्रानुस्वारव्यवाये नुमभावेपि णत्वं भवति। अनुस्वाराभावे तु सत्यपि च नुमि न भवति॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

त्वात्तेन नुमानुस्वार उपलक्ष्यते। एवमपि यो नुस्वारो नुमः स्थानिको न भवति तद्व्यवायेन प्राप्नोतीत्यत आह तृंहणमिति। तृहि
हिंसार्थः। तृंहणमिति अत आह तेनेति। नावन्नुमः स्थानिको नुस्वार उपलक्ष्यते किं तर्ह्यनुस्वारमात्रं तेनात्रापि भव
तीत्यर्थः। यत्र तर्हि नुम एव श्रवणं नानुस्वारस्तत्र णत्वं भवति वा न वेत्यत आह सत्यपि चेति। यथा नक्षत्रं दृष्ट्वा वाचं वि राम०
सृजेदिति कालविशेषोपलक्षणाय रात्रौ चोदनायां यो दिनान्यास्त्यपि दिवा नक्षत्रदर्शने वाङ् विसृज्यते उपलक्षितस्य
कालस्याभावात्। असत्यपि नक्षत्रदर्शने रात्रौ विसृज्यते तस्य कालस्य भावात्तद्वदिहापि द्रष्टव्यं॥ ॥ ॥ ॥

स्येति। संबंधिशब्दो नियतमेव प्रतियोगिनमुपस्थापयति तद्यथा मातरि वर्तितव्यं पितरि शुश्रूषितव्यमिति न चोच्यते स्वस्यां मा
तरि स्वस्मिन्पितरीति अथ च संबंधादेतद्गम्यते या यस्य माता यस्य पिता तस्मिन्निति। पूर्वपदमुत्तरपदमिति च संबं
धिशब्दावेतौ। पूर्वपदमपेक्ष्योत्तरपदं भवति उत्तरपदं चापेक्ष्य पूर्वपदं। तत्र संबंधादेतद्गन्तव्यं यत्प्रति पूर्वपदं यत्तेन तद्भवति
तस्य स्वनियम इति किं च प्रत्येतद्भवति उत्तरपदं। अपूर्तं हि दोषः अग इति नियमस्यैव प्रतिषेधः प्राप्नोति। तेनैकतारका
त्ता तन्नगाणलस्य तत्र स्वसंज्ञायामसंज्ञायां च गोनाणत्वं प्राप्नोति अत आह अग इति चेति। अग इति योयं प्रतिषेधः स णत्व
स्य न नियमस्य अत्र हेतुर्योगविभाग इति। पूर्वपदात्संज्ञायामित्येको योगः। अग इति द्वितीयः। अनेनैव यावच्च यावन्तो वर्णा

स च नियमः पूर्वपदाभिसंबंधादुत्तरपदस्यैव णत्वं निवर्त्तयति चर्मनासिक इति न तु तद्धित पूर्वपदस्य स्व
रवारपापरणाः मातृभोगीणः करणप्रिय इति। अग इति णत्वप्रतिषेधो न नियमप्रतिषेधो योगविभागेन।
अपरे तु पूर्वसूत्रे समानमेव यत्पदं तत्समानपदमिति समानपदग्रहणादाश्रयं तितेषाम प्राप्तमेव णत्व
मतेन विधीयते समासे हि पूर्वोत्तरविभागात् समानपदत्वमप्यस्तीति ३

त्वप्राप्तिः सामर्थ्यप्रति सिध्यते। योगविभागसामर्थ्यात्। अपरे चेत्यादि। कथं पुनः समानमेवेत्यवधारणं लभ्यते तत आ
ह समानग्रहणादिति। पदद्वये च कर्म। तत्रापदस्य योर्निमित्तनिमित्तिनोर संभवात्समग्रहणमेकत्वविवक्षार्थं विज्ञाय
ते एवं सिद्धे यत्समानग्रहणं क्रियते तस्यैतत्प्रयोजनं यथैवं विज्ञायेत समानमेव यत्पदमिति। तेषामेवं ब्रुवन्तु वर्णविध्य
र्थमेतद्विज्ञायत इत्याहुस्तेषामिति। विध्यर्थत्वमेवोपपादयति समासे हीति। अयाचितमस्य रक्षारपाणाणा इत्यत्र कथं णत्वं
पावतारवरयशब्दे रवशब्दस्याणापियस्त्वमस्ति तत इस्य त्वादेकस्य समानपदस्थत्वमेव न भवति। नैष दोषः। यत्र ह्युभावपि
निमित्तनिमित्तिनौ समानपदस्थत्वं अभिवरतस्तत्र णत्वाभावः इह तु रेफस्य व्यभिचारेपि नकारस्य समानपदस्थत्वाद्य
भिचाराण्णत्वं प्रवर्त्तते ३ ॥

९ का·प·४

वनंपुरगामिश्रका॥ ॥पनमितिषष्ठ्यास्थानेप्रथमा।उदाहरणेवनगिर्योःसंज्ञायामिति पूर्वपदस्यदीर्घत्वं।अग्रेवणमिति।षष्ठी समासेराजदंतादित्वाद्वनशब्दस्यपरनिपातः।हलदंतादितिसप्तम्या अलुक्।अथ नसंज्ञाननो राजदंतादिषुनिपातनादलुक्॥सि द्धएती।सादि।पुरगादिषुवेतदुअते।अग्रेशब्देत्वसंज्ञायांविध्यर्थमित्यादुः।एतेभ्यएववननकारस्येति।एतेभ्योवननकारस्यैवे त्यपरंतु नियमोनभवति।दीर्घाद्वारणादीर्घादितिषपंनियमोभवतिनचवनादन्यत्रोत्तरपदेदीर्घान्नत्वमेषांसंभवतिपनस्यस्यात्त दीर्घादितेष्वावर्त्तेत॥ ॥प्रनिरंतःशरेक्षु॥ ॥अत्रादितस्त्रिषुसंज्ञायामसंज्ञायामप्राप्तंणत्वंविधीयते।कथं।समासायांताव त्पूर्वपदात्संज्ञायामित्येतद्यथापिनियमार्थमथापित्रिष्वर्थमुभयथापिवनंपुरगेत्यादिसूत्रंनियमार्थपुरगादिष्वेववननका

वनंपुरगामिश्रकासिध्रकाशारिकाकोटराग्रेभ्यः॥ ॥पूर्वपदात्संज्ञायामितिवर्त्तते।पुरगामिश्रकासिध्रकाशारि काकोटराअग्रइत्येतेभ्यः पूर्वपदेभ्यउत्तरस्यवनकारस्यणकारादेशोभवतिसंज्ञायांविषये।पुरगावणं।मिश्र कावणं।सिध्रकावणं।शारिकावणं।कोटरावणं।अग्रेवणं सिद्धेसत्यारंभोनियमार्थः एतेभ्यएवोत्तरस्यवन नकारस्यणकारोभवतिनान्येभ्यइतिकुवेरवणं।तथारवनं।असिपत्रवनं॥ ॥प्रनिरंतःशरेक्षुप्लक्षाम्रकार्ष्य खदिरपीयूक्षाभ्योऽसंज्ञायामपि॥ ॥प्रनिरन्तरशरइक्षुप्लक्षआम्रकार्ष्यखदिरपीयूक्षाइत्येतेभ्यउत्तरस्य वनकारस्यसंज्ञायामसंज्ञायामपिणकारआदेशोभवति।प्रवणं।निर्वणं।अंतर्वणं।शरवणं।इक्षुवणं।प्लक्षव णं।आम्रवणं।कार्ष्यवणं।खदिरवणं।पीयूक्षावणं॥ ॥ रत्येतितस्त्वप्राप्तिषप्राप्तिः असंज्ञायामपितियमेतावद् प्राप्तिःसंज्ञायामेवेतिनियमात्।विधावपिसंज्ञायांविधानादसत्यप्राप्तिरेव।शरादिषुओषधिवनस्पतिवाचिषुसंज्ञायामसं ज्ञायांचोत्तरसूत्रेणप्राप्तस्यविकल्पस्यापवादः।असंज्ञायामपीत्यनुच्यमानेसंज्ञायामित्यधिकारात्तत्रैवस्यात्।निवर्त्तिष्यते संज्ञायामिति।यदिनिवर्त्तेतसंज्ञायांनप्राप्नोतिपुरगादिभ्यएववननकारस्येतिनियमात्।असंज्ञायांतुविधिःस्यात्संज्ञायांसावकाशः संज्ञायामपिपरत्वादयमेवविधिर्भविष्यति।पूर्वत्रासिद्धेनास्तिविप्रतिषेधः।तस्मादसंज्ञायामपीतिवक्तव्यं।प्रवणं।निर्वं

रामं॰

प्रेत्वनमिति। एवं सामानार्थः। इति तो नुम्। अत्रेनादेः सनुम इति णत्वप्रसंगः। एवं समुदायेवाक्यपरिसमाप्तिर्दृष्टा यथा गर्गाः शतं दण्ड्यन्तामिति। अर्थिनश्चराजानो हिरण्येन भवंति न च प्रत्येकं दण्डयंति प्रत्येकमपि दृष्टा यथा देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामिति। न च समुदाये भोजनं दृश्यते। ... प्रत्येक भवतः। तत्रेह परिदृष्टः कुलकाश्रीपतेन कृचित्स्यात्र रिसमस्ते रुपादिभिर्व्यवायः क्वचिदपि न भवति द्वितीये त्वव्याप्तोकेन स्यात् अट्कुप्वाङ्नुम्व्यवायात् अत आह व्यवायोपलक्षणार्थत्वादिति इदं येयदुपलक्षणपोपादीयते तेनैकेनोद्धाप्यांब ड्कुभिरप्युपलक्षितः संगृह्यते। तद्यथा गर्गैः सह न भोक्तव्यमिति मुक्ते प्रत्येकं च सह न भुज्यते समुदितैर पि तथेहापि शकुर्वत्यड्व्यः समस्ता व्यस्ताश्च व्यवायमुपलक्षयितुमिति सर्वत्र भवति। अड्डादिव्यवायेणत्वे व्यवाये

प्रेन्वनं प्रेन्वनीयमिति। व्यवायोपलक्षणार्थत्वाद्दड्डादीनामिह व्यस्तसमस्तानां व्यवायेणत्वं भवति २

पूर्वपदात्संज्ञायामगः॥ ॥ पूर्वपदस्थान्निमित्तादुत्तरस्य नकारस्य णकारादेशो भवति संज्ञायां विषये। द्रुणसः। वार्ध्रीणसः॥ ॥ श्री॥ ॥ श्री॥ ॥ श्री॥ ॥ श्री॥ ॥

प्रतिषेधः। आदर्शेन स्पर्शेनापद्यत्राव्मे नापि व्यवायः यस्त्वटाम्व्यवायस्तदाश्रयेणत्वं प्राप्नोति यत्रत्वनिर्दिष्टे व्यवायस्तत्रैव न स्यात् कृत्स्नमप्नोतीति। नैष दोषः। एषाम्पामिति न त्रतस्यादिति परिभाषोपस्थानादव्यवायेणत्वाप्रसंगे सूत्रमिदमारभ्यमाणमडादिव्यवायएवणत्वमनुजानाति नान्यव्यवाये तस्य निर्दिष्टग्रहणेन निवर्तितत्वात् यदि च निर्दिष्टमिति क्रेरपि व्यवायेणत्वं स्यात् प्रग्रहणमनर्थकं स्यात केवलेन नुमा व्यवायासंभवात् १ पूर्वपदात्संज्ञायामगः॥ ॥ रषाभ्यामिति वर्तते न च तयोः पूर्वपदत्वं संभवतीति सामर्थ्यात्पूर्वपदस्थान्निमित्तादित्ययमर्थो विज्ञायते इत्याह पूर्वपदस्थादिति। रेफषकाराभ्यां पूर्वपदादित्यर्थः तत्र णत्वं न भवति मात्राश्नात्। द्रुणस इति। द्रुरिव नासिका यस्येति वहुव्रीहिः। अजनासिकायाः इति अच्प्रत्ययो नसादेशश्च। वाध्रीणस इति। वध्र्या विकारो वार्ध्री रज्जुः वार्ध्रीव नासिका यस्य सवार्ध्री

णसो मृगविशेषः। तत्र पूर्वपदस्थीपमानत्वादधिकरणत्वासुंवद्वावाभावः। नतुशब्दः प्रिपादिभुवादर्शकः।

अर्पणखेति। नखमुखात्संज्ञायामिति ङीषः प्रतिषेधः। पदान्तु योगो विवक्षितेन संज्ञा अर्पकारशिणावानिपस्माः इति तदा ऊ
पू भवति। णत्वं तु न भवति। णत्वं तु न भवति शूर्पनखी। एवं चाणत्वं ङीप्रोन समवेतः। ततः शूर्पनखी वा कादिति। अग इति श्
मवक्तुं। कस्मान्न भवतीत्यावामपनमग्गपनमिति। निपातनादेतत्सिद्धं अग्गपनादिष्व इति। यथान्यत्रोक्तं सर्वनामसंज्ञा
यां निपातनात्मत्वाभाव इति। पूर्वपदात्संज्ञायामेवेति। विपरीतस्तु नियमो न भवति पूर्वपदादेव संज्ञायामिति। शिवादि

अपेणखा। असंज्ञायामिति किं चर्मनासिकः। अग इति किं अगयनं। केचिदेतन्नियमार्थं वर्णयन्ति। पूर्व
पदात्संज्ञायामेव णत्वं नान्यत्रेति समासपदेपि हि समानपदे निमित्तनिमित्तिनोर्भाण इत्येव णप्राप्तिरिति।

भमुखेणशब्दस्य पाठात्। सिद्धेस्त्यारंभो नियमाय भवति कथमत्रापि सिद्धिरित्याह समासपदेपिहीति। यद्यपि पूर्वपदस्थं
निमित्तमुत्तरपदस्थो निमित्तीति भिन्नपदस्थत्वमप्यस्ति तथापि समासे कृते तल्लोपाविभक्तिरूपस्य ग्रन्थे तत्पा समुदाय
स्य पदसंज्ञायां सत्यां तस्मिन्समानेपि पदे भावादस्त्येव पूर्वेण प्राप्तिः समानपदत्वे हि तत्राश्रितेन भिन्नपदत्वं प्रतिषिद्धं
तस्मादुपपन्नं नियमार्थत्वं। यद्येवं पयोन्नरपदस्थस्यापि नकारस्य णत्वं नियमेन आवर्त्यते चर्मनासिक इति तथा तद्धित
पूर्वपदस्थस्यापि भावर्त्येतरवरपस्यापत्यं नडादिभ्यः फक्कवारपायणः। मात्रभोगायहितः भोगोत्तरपदात्वः मात्रभोगी
णः करणप्रियमस्य करणप्रिय इत्याह॥

रामः

॥विभाषौषधि॥ ॥अस्संज्ञायामपीत्यनुवर्त्तनेनैतेन संज्ञाः संज्ञयोर्द्वयोर्यं विकल्पः। अस्येनुवृत्तावनुक्तत्वान्नस्याधिकारं ने
च्छंति तेषां संज्ञा विषयेषु गणादिनियमाणत्वेनेन नभवितव्यं। परिलिख्यते यत्वात समाश्रेयं। इह ये पुष्प्यंति फलंति च ते वानस्पत्याः
ये फलं सेवन पुष्पं निते वनस्पतयः उभयेपि ते वृक्षा इत्यभिधानविदः। ततश्च वनस्पति शब्दोपादानेन णत्वविकल्पभाने शि
रीषवणमित्यत्र न स्यात् शिरीषो हि पुष्प्यति फलति च तस्मादिह ग्रहणं कर्त्तव्यं न हिदमाशंक्य तेना वनफली वनस्पतिरित्या
दि। फलमेव यस्य न पुष्पं स वनस्पतिः उदुम्बरादिः पुष्पोपगा वेतसादयः फलोपगा उदुम्बरादयः उभयोपगा आम्रादयश्च वृ

विभाषौषधिवनस्पतिभ्यः॥ ॥ओषधिवाचि यत्पूर्वपदं च वनस्पतिवाचि च तत्स्थान्निमित्तादुत्तरस्य वननकार
स्य विभाषा णकारो भवति। ओषधि वा विभक्त्यावत्। दूर्वावणं। दूर्वावनं। मूर्वावणं मूर्वावनं। वनस्पतिभ्यः। शि
रीषवणं शिरीषवनं। बदरीवणं बदरीवनं। द्व्यक्षरत्र्यक्षरेभ्य इति विकल्पं। इहमाभूत्। देवदारुवनं भद्रदारुवनं।
इरिकादिभ्यः प्रतिषेधो वक्तव्यः। इरिकावनं तिमिरकावनं। फली वनस्पतिर्ज्ञेयो वृक्षाः पुष्पफलोपगाः। ओ
षध्यः फलपाकान्ता लतागुल्माश्च वीरुधः। यद्यपि वृक्षवनस्पत्योर्भेदस्तथापि इहाभेदेन ग्रहणं इष्टम्। ४

क्षाः। अंतात्स्यंतादि सत्रेडोऽन्यश्रपि वृक्षपतत्ववनादुः। फलपाकेन विनाशीयासां ताः ओषध्यः शाल्यादयः। लताः प्रतानव
त्यो मालत्यादयः। गुल्माः ह्रस्वस्कंधा स्तंबाः बहुकांडयंत्राः वीरुध इति यद्यपि वृक्षवनस्पत्योर्भेदः स्यपिन इति शंकां परिहर
ति ऋतमेदेन ग्रहणं इष्टमिति। अत्र खलु यिद्युक्त्वबन्धक्ति वचन इत्यत्र भाष्यकारवचनं लिंगं। उक्तं हि तत्र अस्ति वचनेर
ति किं। शिरीषाणां मदूरभवो ग्रामः शिरीषाः तस्य वनं शिरीषवनमिति वनस्पतित्वं नातिदिश्यते। यद्यतिदिश्येत विभा
षौषधिवनस्पतिभ्य इति णत्वं प्रसज्येतेति। यदि चोक्तो भेदः इहाश्रितः स्यात् शिरीषाणामवनस्पतित्वाद्वनस्पतित्वा

का॰पा॰४ अह्नोः रं तात्॥ ॥पूर्वाह्न इति। अह्नः पूर्वो भाग इति पूर्वापरेत्यादिसूत्रेण समासः। राजाहः सखिभ्यष्टच्। अह्नोह्न एतेभ्य इत्य
ह्नादेशः। निरह्न इति। निर्गतो ह्न इति प्रादिसमासः। शेषं पूर्ववत्। दीर्घाह्नी शरदिति। वह्वाह्नी हिरण्यते नञ्ज भवति टच्। विधौ तत्पुरु
षाधिकारात्। अनउपधालोपिनोन्यतरस्यामिति ङीप्। अल्लोपो नः। अकारांतस्य ग्रहणात् सूत्रेण णत्वं न भवति यदि तु नकारां

अह्नोदंतात्॥ ॥अदंतं यत्पूर्वपदं तस्मान्निमित्तादुत्तरस्मादह्न नकारस्य णकार आदेशो भवति। पूर्वा
ह्णः। अदंतादिति किं निरह्नः दुरह्नः। अह्न इत्यकारांतग्रहणात् दीर्घाह्नी शरदित्यत्र न भवति॥ ॥
॥श्रीराम॥ ॥श्रीराम॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥

तस्य तु ग्रहणं प्रकरणाद्वित्वापत्तेः। सर्वत्र सूत्र प्रकरणेष्वानी प्रथमया निर्दिष्टं पूर्व तेवनं वा ह्नलपानमिति। पद्यापुवादिषु पा
ठादस्य णत्वाभावः। अवश्यकर्तव्यम् भ्र युवादिषु पाठः प्रातिपदिकांतेति विकल्पेन णत्वं माभूदिति। अंतग्रहणं ज्ञापकमत्र
प्रकरणे नपदव्यवधानेन णत्वं नापि तदंतविधिर्भवतीति। तेन रषाभ्यामित्यत्र तदंतविधिर्न भवति॥ ॥ ॥ ॥ राम॰

वाहनमाहितात्॥ ॥उह्यतेऽनेनेति वाहनं शकटादिकं करणे ल्युट्। अस्मादेव निपातनादुपधावृद्धिः। आहितमारोपितमुच्यते। यदा वाह-
नारोपितं केवलं स निर्दिष्टं तदा नत्वं प्राप्नोतीति तदपीष्यते। यदा दाहितो वस्थितमो ऽर्थ इति। वक्ष्यमिति। न वा भूतकालस्याविवक्षितत्वात्।
स्वस्वामिभावनिवृत्त्यर्थे नोह्यानायामादित्तामिति भूतकालो न विवक्ष्यते तेनाहितादाधायिष्यमाणं स्वभविष्यति। केवलं स्वस्वामिभाव

वाहनमाहितात्॥ ॥आहितवाचिनः पूर्वपदं तस्मात्परस्य वाहनकारस्य णकारादेशो भवति। इक्षुवाहणं
शरवाहणं। दर्भवाहणं। वाहनेन यदारोपितमुच्यते तदाहितमुच्यते। आहितादिति किं दाक्षिवाहनं दाक्षिस्वामिकं वाहनमि-
त्यर्थः॥ ॥पानं देशे॥ ॥पानकारस्य पूर्वपदस्थान्निमित्तादुत्तरस्य देशाभिधाने णकारादेशो भवति। पीयत इति पानं कृ-
त्यल्युटो बहुलमिति कर्मणि ल्युट्। क्षीरपाणं येषां ते क्षीरपाणा उशीनराः। मनुष्याभिधानेन देशाभिधानं गम्यते। सुरापाणाः
प्राच्याः। सौवीरपाणा बाह्लीकाः। कषायपाणा गांधाराः। देश इति किं दाक्षीणां पानं दाक्षिपानं॥ ॥वा भावकरणयोः
॥ ॥भावे करणे च यः पानशब्दः तदीयस्य नकारस्य पूर्वपदस्थान्निमित्तादुत्तरस्य वा णकारादेशो भवति। क्षीरपाणं वर्त्त-
ते क्षीरपानं वर्त्तते। कषायपाणं कषायपानं। सुरापाणं सुरापानं। करणे। क्षीरपाणः कंसः कषायपानः। णोप्रकरणे गि-
रिनद्यादीनामुपसंख्यानं। गिरिणदी गिरिनदी। चक्रणितंबा चक्रनितंबा। चक्रणदी चक्रनदी ५

विवक्षायामेव न भवति। यथा प्रत्युदाहरणे उक्तं दाक्षिस्वामिकमित्यर्थ इति। दाक्षेर्योऽपि पक्षे वा स्वत्वेन विवक्षितं तेन स्वामित्वेन तत्र णत्वं भ-
वत्येव॥ ॥पानं देशे॥ ॥क्षीरं पानं येषामिति कर्तरि षष्ठी। उशीनरादयः शब्दा देशशब्दाः पुरुषेषु वर्त्तन्त इति भवति देशाभिधानं। दा-
क्षीणां पानमिति। अत्रापि कर्मसाधन एव पानशब्दः॥ ॥वा भावकरणयोः॥ ॥गिरिनद्यादीनामिति। संज्ञायां प्राप्ते ऽसंज्ञायाम-
प्राप्ते त्वसंज्ञायां विभाषेयमित्याहुः ५ ॥ ॥

प्रातिपदिकांत॥ ॥माषवापिणाविति वडुलमाभीक्ष्ण्य इति णिनिः माषवापाणीति। माषान्वपंतीति कर्मण्यण्। जश्शसोः शिः न
पुंसकस्य झलचः इति नुम्। इह कस्मान्न भवति गर्गाणां भगिनी गर्गभगिनीति। भगिन्निति यस्य प्रातिपदिकस्यांते नकारः संस्तिप्राग्निरि
सत आह पूर्वपदाधिकारादिति। एतच्च पूर्वपदात्संज्ञायामग इत्यत्रैव व्याख्यातं। किमिदानीं न भवति गर्गभगिनीति भवति विवक्षि
तरेशास्त्रान्तरेणानित्यं नत्वमनेनेत्याह पदात्विति मात्रभोगीणावदिति। एतद्यितत्रैव व्याख्यानं। पद्युत्तरपदं प्रातिपदिकं त्यक्ते

प्रातिपदिकांतनुम्विभक्तिषु च॥ ॥प्रातिपदिकांते नुमि विभक्तौ च यो नकारस्तस्य पूर्वपदस्थान्निमित्तादुत्तरस्य
णकारादेशो भवति। प्रातिपदिकांते। माषवापिणौ माषवापिनः। नुमि। माषवापाणि माषवापाणि। विभक्तौ
व्रीहिवापेण व्रीहिवापेन। पूर्वपदाधिकारादुत्तरपदस्य प्रातिपदिकस्यापोत्येन कारस्त्तस्येदं णत्वमिष्यते। तेनेह
हि न भवति। गर्गाणां भगिनी गर्गभगिनीति। पदात्वेवं गर्गाणां भगो गर्गभगः सोऽस्यास्तीति गर्गभगः सोऽस्यास्ती
ति गर्गभगिणीति। तदा मात्रभोगीणावन्नित्यं णत्वेन भवितव्यं। माषवापिणी माषवापिनीत्यत्र तु गतिकारकोपप
दानां कृद्भिः समासवचनं प्राक्सुबुत्पत्तेरिति कृदन्तेनैव समासे सति प्रातिपदिकस्यांत्रपदस्यांतो नकारो भव
ति। तथा च नुम्ग्रहणं सहि समुदायभक्तत्वादुत्तरपदस्यांतो न भवति एवादीनां प्रतिषेधो वक्तव्यः आर्यपूना।
क्षत्रियएना। प्रपक्वानि। परिपक्वानि। दीर्घाह्नीशरत्॥ ॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

माषवापिणीत्यत्र णत्वं न प्राप्नोति यदुत्तरपदभूतं प्रातिपदिकं तदन्तस्यैव ज्ञापकमाह तथा चेति। कथमेतज्ज्ञापकमित्याह सहि
ति। अंगस्य नुम्विधीयते ततश्च तदङ्गभक्तो नुम्। तद्ग्रहणेनैव गृह्यते तेनोत्तरपदग्रहणेनापदिव पर्ति चन प्रातिपदिकं गृह्यते तेनोत्तरप
दमेव तत्रोनुम्ग्रहणमकर्तव्यमेव स्यात् समासप्रातिपदिकांतस्यैव सिद्धत्वात्। आर्यपूनेति विशेषणसमासः। श्वयुवमघोनामतद्धिते
इति संप्रसारणं। प्रपक्वानीति। गतिसमासः। अत्र कुमति चेति निर्त्यं णत्वं प्राप्नोति। दीर्घाह्नीशरदिस्यम पित्वाद्विषु द्रष्टव्यमस्तुर्ण॥ राम०

॥एकाजुत्तरपदेणः॥ ॥विकल्पाधिकारनिवृत्तेर्विस्पष्टीकरणार्थमिति। अन्यथायद्यप्यत्रारंभसामर्थ्यान्नित्योविधिः शक्योवित्त
तुंतत्रस्त्रत्वनुवृत्तिः संभाव्येत॥ ॥कुमतिच॥ ॥अनेकाजुत्तरपदार्थोयमारंभः। वस्त्रयुगेणविनि। युगशब्दादिनिवृत्तेय

॥एकाजुत्तरपदेणः॥ ॥एकाचउत्तरपदंयस्यसएकाजुत्तरपदः तस्मिन्नेकाजुत्तरपदेसमासेप्रातिपदिकांतनु
म्विभक्तिषुपूर्वपदस्थान्निमित्तादुत्तरस्यनकारस्यणाकारादेशोभवति। वृत्रहणौवृत्रहणः। नुमि। क्षीरपाणि
सुरापाणि। विभक्तौ। क्षीरपेण। सुरापेण। णइतिवर्त्तमानेपुनर्णग्रहणं विकल्पाधिकारनिवृत्तेर्विस्पष्टीकरणा
र्थं॥ ॥कुमतिच॥ ॥कवर्गवतिचोत्तरपदेप्रातिपदिकांतनुम्विभक्तिषुपूर्वपदस्थान्निमित्तादुत्तरस्यनका
रस्यणाकारादेशोभवति। वस्त्रयुगिणौवस्त्रयुगिणः। नुमि। वस्त्रयुगाणि। खरयुगाणि। विभक्तौ। वस्त्रयुगेण। ख
रयुगेण ६ ॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥छ॥॥

ष्यादिवृत्तेतेनसमासः कर्त्तव्यः एवंह्युत्तरपदस्यप्रातिपदिकस्यांतोनकारोभवति। अन्यथामात्सभोगीणावल्लदृशांतरेणोवर्ण
त्वंसिद्धंस्यात्। काविसुक्ष्ममानेपि कवर्गमात्रस्योत्तरपदस्यासंभवान्मनुवर्थोलिभ्यतेनार्थमनुया। सत्सोकाविशुक्ष्ममाने
तदादिविधिर्विज्ञायेत कवर्गादावुत्तरपदइति ६ ॥

२ का॰ प॰ ५

उपसर्गादसमासेऽपि॥ ॥ण॥ उपदेशेऽपस्य संज्ञोपदेशः प्रनायको देश इति। अत्र गामि क्रियायोगात्प्रमेव प्रतिप्रस्योपसर्गत्वं न नयतीति प्र
ति। असमासेऽपीति किमिति। विशेषानुपादानाद्धि समासासमासयोर्द्वयोरपि भविष्यतीति प्रश्नः। पूर्वपदाधिकारादिति। सर्वत्रैवात्र प्र
करणे पूर्वपदादिति वर्त्तते समासे च पूर्वपदं भवतीति तेन समास एव स्यात्। तदधिकारनिवृत्तिद्योतनार्थमिति। नानेन विस्पष्टार्थमस
मासेऽपि ग्रहणमित्युच्यते। तथा हि यद्यप्यस्य रितत्वात्पूर्वपदादिति निवर्त्तेत तथाप्यसमासेऽपि ग्रहणं कर्त्तव्यमेव यथा। संज्ञायां समासे

उपसर्गादसमासेऽपि णोपदेशस्य॥ ॥ णोपदेशस्य धातोर्यो नकारस्तस्योपसर्गस्थान्निमित्तादुत्तरस्य णकारा
देशो भवति। असमासे समासेऽपि। प्रणमति। परिणमति। प्रणयति परिणयति। प्रणायकः परिणायकः। उपसर्गा
दिति किं। प्रगतो नायकोऽस्माद्देशात् प्रनायको देशः। असमासेऽपीति किं। पूर्वपदाधिकारात्समास एव स्यादिति तदधिका
रनिवृत्तिद्योतनार्थं। णोपदेशस्येति किं। प्रनर्द्दीति प्रनर्द्दति प्रनर्द्दकः॥ ॥श्री४॥ ॥श्री४॥ ॥छ॥ ॥

न स्यात्। पूर्वपदात्संज्ञायामेवेति नियमादस्य च विधेरसमासे चरितार्थत्वात्तस्मात्पूर्वपदाधिकारनिवृत्तिद्योतनमुखेन समासाऽ
समासयोर्द्वयोरपि यथा स्यादित्यसमासेऽपि ग्रहणमित्ययमर्थोऽत्र द्रष्टव्यः। नन्वसिद्धमुपसर्गाणत्वं तस्यासिद्धत्वान्नियमो न भविष्य
ति। तेन पूर्वपदादित्यस्मिन्निवृत्ते न कर्त्तव्यमसमासेऽपि ग्रहणं। एवं तर्हि तज्ज्ञापयति न योगे योगोऽसिद्धोऽपि तु प्रकरणे प्रकरणम् राम॰
सिद्धमिति। यदा तु पूर्वपदात्संज्ञायामिति सूत्रं नियमार्थमिति पक्षस्तदैतदुच्यते पदानुविभज्य तदा नेतदुपपद्यते॥ ॥छ॥ ॥

॥हिनुमीना॥ ॥हिंगतोत्वादिः मीञ् हिंसायां क्रादिः दीर्घान्तः। हिनुमीनाग्रहणोविकृतस्योपसंख्यानं रूहापिपथास्यात् प्रहिणोतिप्र
मिणोतिः सिद्धंतास्थानिवत्वात् गुणयोः स्थानिवद्भावे सति उपात्तमेव रूपमिति णत्वं भविष्यति। ननु पूर्वत्रासिद्धेन स्थानिवत्। दोष
एवायस्याः परिभाषायास्तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति॥ ॥आनिलोट्॥ ॥प्रवपाणीति। वपेर्लोट्। मेर्निः। आ
डुत्तमस्य पिच्च। याणीति। यातेरूपं। प्रवपानीति प्रकृष्टाव पायेषु तानि प्रवपानि। आनिलोड्ग्रहणमनर्थकमर्थवद्ग्रहणात्। अर्थव

हिनुमीना॥ ॥उपसर्गादिति वर्त्तते। हिनुमीना इत्येतयोरुपसर्गस्थान्निमित्तादुत्तरस्य नकारस्य णकारादेशो
भवति। प्रहिणुतः। प्रमीणाति॥ ॥आनिलोट्॥ ॥आनीत्येतस्य लोडादेशस्य उपसर्गस्थान्निमित्तादुत्त
रस्य नकारस्य णकारादेशो भवति। प्रवपाणि। परिवपाणि। प्रयाणि। परियाणि। लोडिति किं। प्रवपानि मांसानि
७ ॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

तआनिशब्दस्य ग्रहणं न चैषोऽर्थवान्। अनुपसर्गा ह्यापत्तक्रियायुक्ताः प्रादयस्तं प्रतिगत्युपसर्गसंज्ञे भवतः। न चैनमानिश
ब्दं प्रतिक्रियायोगः। इहापि तर्हि न प्राप्नोति प्रवपाणीति। अत्रापि नानिशब्दं प्रतिक्रियायोगः। माभूदा
निशब्दं प्रतिक्रियायोगः तदन्तं तु प्रति भवति। कथं। नैवं विज्ञायते यस्य क्रियापत्तक्रियायत् क्रियायुक्ता इति कथं तर्हि या क्रिया
पात्क्रियायुक्ता इति प्रयोगविषया च क्रिया तत्र कश्चिदसंस्पृष्टास्तीति। समुदायस्याशीपत इति। आनिशब्दान्तं समुदायं प्रति क्रियायो
गः। तत्रायं वस्त्वार्थः उपसर्गात्परस्यावयवो य आनिशब्दस्तन्नकारस्य णत्वमिति। तदेवं प्रसज्यमाने लोड्ग्रहणं ७ ॥

८का०प०४

नेर्गदनद॥ ॥गामादाग्रहणेष्वविशेष इति वचनान्मीनातिमिनोतिदीङामित्वे कृते य मारूपं पद्यमान इति तेषामपि ग्रहणात्प्रसं
गस्तदाशंकाह माङ्गो ङोर्ग्रहणमिष्यत इति। इष्टिरेवेयं प्रणिमास्यतीति। ओतः श्यनि उपसर्गात्सुनोतीत्यादिना षत्वं॥ हंतिग्रहणं त
पः स्यातिपर्यंता अरादयः मामा नेव प्रणिशाम्यतीति शमामष्टानां दीर्घः श्यनि। स्यत्यादिषु तिपा निर्देशो यङ्लुङ्निवृत्त्यर्थः। अड्व्यवा

नेर्गदनदपतपदघुमास्यतिहंतियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च॥ ॥उपसर्गस्थान्निमित्ता
दुत्तरस्य नेः इत्येतस्य नकारस्य णकारादेशो भवति गदनदपतपदघुमास्यतिहंतियातिवातिष्वपि द्रातिप्सातिवपतिवह
तिशाम्यतिचिनोतिदेग्धिष्वित्येतेषु परतः। गदः प्रणिगदति परिणिगदति। नदः प्रणिनदति परिणिनदति। पत। प्रणिपत
ति परिणिपतति। पद। प्रणिपद्यते परिणिपद्यते। घु। प्रणिददाति परिणिददाति। प्रणिदधाति परिणिदधाति। मा ङ्। प्र
णिमिमीते परिणिमिमीते। मेङ्। प्रणिमयते परिणिमयते। मा इति मेङ्। माङोर्ग्रहणमिष्यते। स्यति। प्रणिष्यति प
रिणिष्यति। हंति। प्रणिहंति परिणिहंति। याति। प्रणिवपति परिणिवपति। वहति। प्रणिवहति परिणिवहति। शाम्य
ति। प्रणिशाम्यति परिणिशाम्यति। चिनोति। प्रणिचिनोति परिणिचिनोति। देग्धि। प्रणिदेग्धि परिणिदेग्धि। अड्व्यवायेपि
तेणत्वमिष्यते। प्रण्यपादत परिण्यपादत॥ ॥

येपीति। अस्मथोगस्यादु अते विकरणांतं चभंसोषोसंबा तभञ्जोः शवोगदादिग्रहणेनयहीतुमिति न स्यात। आडाचेति वक्तव्यं प्र एम०
ण्यागदत् इति। नन्वहि वक्तव्यं न वक्तव्यं अट्कुप्वाङ्नुम्व्यवायेपीति वर्त्तते तेन नेर्गदादौ नां चाड्व्यवायेऽप्यव्यवाये च भविष्यति। प्रन्युपगदती
त्यादौ तु परत्वमवायेपीति प्रतिषेधात्प्रसंगः॥ ॥

शेषेविभाषा॥ ॥अकखादावषांत इतिचोपसर्गसंनिधापितस्यधातोर्विशेषणमित्याह अकखादिरषांतउपदेशे योधातुरिति। आदि ग्रहणं शकारमकर्तुमकखे इतिवक्तव्ये पामिति विधिस्तदादावल्ग्रहणे अंतग्रहणंतु कर्तव्यं असतिहि तस्मिन्नल्लायेत केनतदादिविधिः केनतदंतविधिरिति। शेषग्रहणं किं गदादिषुमाभूत्। पठितेष्वपि सम्प्रयोगो निर्विषयः स्यात्रसमाच्छेष इति शक्यमवक्तुं। प्रनिपिक्षतीति।

शेषेविभाषाकखादावषांतउपदेशे॥ ॥अककारखकारादिरषकारांतउपदेशेयोधातुः शेषः तस्मिन्परतउपसर्गस्थान्निमित्तादुत्तरस्य नेर्नकारस्यविभाषाणकारादेशोभवति। प्रणिपचति प्रनिपचति। प्रणिभिनत्ति प्रनिभिनत्ति। अकखादाविति किं। प्रनिकरोति प्रनिखादति। अषांत इति किं प्रनिपिनष्टि। उपदेशग्रहणं सर्वेषां विशेषणं तेनेहच प्रतिषेधोभवति प्रनिचकार प्रनिचखाद प्रनिपिक्षतीति इहच माभूत्। विशेः प्रनिवेष्टा प्रणिवेष्टा॥ ॥अनितेः॥ ॥अनितेर्नकारस्योपसर्गस्थान्निमित्तादुत्तरस्य णकारादेशोभवति। प्राणिति पराणितीति॥ ॥श्रीः॥ ॥श्रीः॥ ॥ ॥

षढोः कः सीति कत्वे कृते संप्रत्यषांतोभवति। प्रनिचकारेति कुहोश्चुरित्यभ्यासस्य चुत्वे कृते संप्रत्ययं नककारादिर्भवति। प्रणिवेक्षतीति व्रश्चेत्यादिना षत्वे कृते संप्रतिषांतोभवति उपदेशेत्वषांतत्वात् अस्त्येव भवति॥ ॥अनितेः॥ ॥प्राणिणीति। श्वसप्राणने अनचाहदादिभ्यस्सार्वधातुक इतीट् ८ ॥ ॥ ७॥ ॥७॥ ॥७॥ ॥७॥ ॥ ॥

८का.पा.४ ॥अंतः॥ ॥अनितेरंतस्यनकारस्येति।अनितेः संबंधिनः पदांतस्यनकारस्येत्यर्थः हेप्राणिति।किंवंतान्मंबुद्धिः नहि संबुध्योरिति
नलोपप्रतिषेधः।अस्मात्नुपदांतस्यनकारस्यलोपेनभवितव्यमिसंबुद्ध्यंतमुदाहृतं।अंतश्चपदापेक्षोगृह्यतइति।नानित्यपेक्षः।अभि
धानाभावात्।केचित्तित्यादि।अनितेरंतइत्येकमेवयोगंपठंतिसमीपवचनंचांतशब्दमाश्रयंतीत्यर्थः।किमर्थमित्याह।निमित्तसमी
पस्यस्येति।ननुचनास्त्येवसंनिधिर्यत्रनिमित्तस्यसमीपभूतोनितेर्नकारः प्राणितीत्यादावेकादेशोकृते आकारेणव्यवधानः निर
णितीत्यत्राः कारेणतत्कथंनिमित्तसमीपस्थस्येत्युच्यते।तत्राह।एकवर्णव्यवहितस्येतिसामर्थ्यादेकवर्णेनव्यवधानमाश्रीय
तइत्यर्थः।नचप्राणितीत्यत्रैकादेशस्यपूर्वस्माद्विधौस्थानिवद्भावाद्वर्णद्वयव्यवायः शंकनीयः पूर्वत्रासिद्धेस्थानिवत्वनिषेधात्।न

॥अंतः॥ ॥अनितेरितिवर्त्तते।उपसर्गस्थान्निमित्तादुत्तरस्यानितेर्नकारस्यपदांतेवर्त्तमानस्यणकारआदेशोभव
ति।हेप्राण।हेपराण।पदांतस्येतिप्रतिषेधस्यापवादोयं।अंतश्चपदापेक्षोगृह्यते।केचित्तुपूर्वसूत्रएवैतदंतग्रहणंसा
मीप्यार्थमभिसंबध्नंतिनिमित्तसमीपस्थस्यएकवर्णव्यवहितस्यानितिनकारस्यणकारोयथास्यादिहमाभूत्पर्यनि
तीति।तेद्वितीयमपिपदांतस्यणत्वार्थमाश्रयितव्यमेव।येषांतुपर्यणितीत्येवंभवितव्यमितिदर्शनंतेषांपूर्वसूत्रेणा
र्थेतिग्रहणेन॥ ॥७॥ ॥
नुवोक्तंतस्यदोषः संयोगादिलोपलत्वणत्वेष्विति।एवंतर्हिनित्यः पूर्वस्माद्विधौस्थानिवद्भावः।निष्ठायांसेटीतिसेड्ग्रहणात्एतज्ज्ञस्या
निवत्वकरणएवआख्यातं।तेरित्यादि।एकंपदांतग्रहणंनत्वसामीप्यार्थंपर्यणितीत्यत्रणत्वमाहत्याचरितार्थंततश्चहेप्राणित्यत्रप
दांतस्येतिप्रतिषेधः प्राप्नोतितस्मात्तेद्वितीयमपदांतग्रहणमावृत्यांतेत्रेणवाश्रयितव्यंननुचयेपियोगविभागंकुर्वंतिअवयववृत्त्यन्तं
वांतशब्दमाश्रयंतितैरपिपूर्वसूत्रेसामीप्यवाच्यंतशब्दः पठितव्यएवअन्यथापर्यणितीत्यत्रापिस्यात्।अत आह।येषांत्वितितेः नेकव
र्णव्यवहितस्यापिणत्वमिष्टंतेवतस्मान्नार्थस्तेषांपूर्वसूत्रेंतग्रहणेनेत्यर्थः॥ ॥७ ७॥ ॥७॥ ॥ ११५०

मेर्येहस्वद्या उभौ॥ ॥प्राणिणिणीषतीतिमनिच्अजादेर्द्वितीयस्येतिनिशब्दस्य द्विर्वचनं प्राणिणिषतीति। रयंतालुरुः स्लेष्म्वरः णिलोपः द्विर्वचनेचीतिस्थानिवद्भावान्निशब्दस्य द्विर्वचनं। पूर्वत्रासिद्धीयमित्यादि। पूर्वत्रासिद्धीयमद्विर्वचन इत्यस्मिन्नसतिप्रानिमइति स्थितेद्विर्व प्राप्नोतिणत्वंचतत्राणत्वस्यासिद्धत्वात्पूर्वं द्विर्वचनेकृतेअभ्यासगणकारेणाव्यवधानाद्धातुनकारस्य णत्वं नस्यात्। अस्मिंस्तु प्रतिषेधत्वात्स्मले कृतेकृतणत्वस्यैवद्विर्वचनेअंतरेणाप्येतद्वचनं प्राणिणिषतीत्यादि सिद्धं भवति। यद्येवं किमर्थमिदमारभ्यतइत्याह। एतन्निति। शास्त्रार्थेकृत्स्नः इतिकरणोहेतौ तु शब्दो वधारणेयस्मादेतदपवादवचनमेतदर्थनैवशक्यमाश्रयितुं तस्मादेतदारभ्यतेअयमभिप्रायः अस्यवच

उभौसाभ्यासस्य॥ ॥साभ्यासस्यानितेरुपसर्गस्थान्निमित्तादुत्तरस्योभयोर्नकारयोर्णकारआदेशोभवति। प्राणिणिषति। प्राणिणत्। पराणिणत्। पूर्वत्रासिद्धीयमद्विर्वचनइत्येतस्मिन्सतिपूर्वेणैववकृतणत्वस्यद्विर्वचनेकृतेसिद्धमेतदंतरेणापिवचनंतत्तुनाश्रयितव्यमितिसूत्रमिदमारभ्यते॥ ॥हंतेरत्पूर्वस्य॥ ॥हंतिनकारस्याकारपूर्वस्योपसर्गस्थान्निमित्तादुत्तरस्यणकारादेशोभवति। प्रहण्यते परिहण्यते। प्रहणनं परिहणनं। अत्पूर्वस्येतिकिं प्रघ्नंति परिघ्नंति। तपरकरणंकिं। प्राघानि पर्यघानि॥ ॥८॥ ॥

नस्यानिसत्वज्ञापनार्थमिदमारभ्यतइतितेनोज्झटदित्यत्रप्रत्याहारेनामसिद्धत्वातकृतइमेतद्धिरुच्यतेइत्युपपन्नंभवति। अथोमाविति किमर्थं यावतामध्यस्तकारस्य पूर्वेणैवणत्वं सिद्धमित्याह भ्यासमर्थ्याद्धातुनकारस्य अकपेयनेनभविष्यति। सत्संभवहितत्वस्यसिद्धातिअनंतरस्य तु लक्ष्यक्रौंदिमस्यायान्नास्यादित्युभाविस्युच्यते॥ ॥हंतेः॥ ॥हंतेरित्यवयवषष्ठी अत्पूर्वीयस्मादितिबहुव्रीहिः नकारोत्पपूर्वस्यार्थः पद्यपि नकारविशेषणानि प्रथमयानिर्दिश्यंतेअतः उभाविति तथापीह षष्ठ्या निर्दिशः कृतइदं हिसाध्यस्यंजितिक्रमोत्सः। प्रहण्यतइतिभावेकर्मणिवालट्। प्रघ्नंतीविगमहनेत्युपधालोपः होहंतेरीतिकुत्वंअत्रकुत्वव्यवायइतिप्रसंगः। प्राघानीतिविरणभावकर्मणोरितिचिणएछितपानिर्दिशोधातुनिर्दिशार्थएवनपकृतु। ज्ञिहृस्पर्धाः प्रपर्धाः प्रजंघनीतिअत्रहिचुत्वेकृतेज

र का-प००५

॥वमोर्वा॥ ॥पूर्वेणानित्ये प्राप्ते विकल्पः॥ ॥अंतरदेशे॥ ॥अंतःशब्दस्याङ्किविधिणत्वेषूपसंख्यानमिस्युपसर्गसंज्ञायाभावा
द्धं तेरन्तर्वर्तिसिद्धे देशप्रतिषेधार्थं वचनं। अंतर्हननो देश इति अधिकरणे ल्युट्॥ ॥अयनं च॥ ॥अंतरयणमिति। अयेरिति
वाल्युटि हृर्यहूस्य च इति सिद्धे रूपमपि देशप्रतिषेधार्थं वचनं॥ ॥छंदस्यृदवग्रहात्॥ ॥ऋकारान्ते विच्छिद्य यत्र स्यवग्रहः ऋ

वमोर्वा॥ ॥वकारमकारयोः परतो हंतेरुपसर्गस्थान्निमित्तादुत्तरस्य नकारस्य णकारादेशो भवति वा। प्रहण्वः प्रह
न्वः। प्रहण्मः प्रहन्मः। पूर्वेणनित्ये प्राप्ते विकल्पः॥ ॥अंतरदेशे॥ ॥अंतःशब्दादुत्तरस्य हंतिनकारस्यातस्वर्वस्मोप
सर्गस्थान्निमित्तादुत्तरस्य णकारादेशो भवति अदेशाभिधाने। अंतर्हण्यते। अंतर्हणनं वर्त्तते। अदेश इति किं अंत
र्हननो देशः। अत्वर्वस्मिंस्त्वेव अंतर्घ्नंति। तपरकरणं स्वेव अंतरघानि॥ अयनं च॥ अयनं नकारस्य चांतःशब्दादुत्तरस्य ण
कारादेशो भवति अदेशाभिधाने। अंतरयणं वर्त्तते। अदेश इत्येव अंतरयनो देशः॥ ॥छंदस्यृदवग्रहात्॥ ॥पूर्व
पदादिति वर्त्तते। छंदसि विषये ऋकारांतादवग्रहात्पूर्वपदादुत्तरस्य नकारस्य णकारादेशो भवति। नृमणाः। पितृयाणं
। अत्र हि नृमनः पितृयानमिति ऋकारोवगृह्यते। अवग्रहणं किमर्थमुच्यते यावता संहिताधिकार आध्यायपरिसमाप्ते
रित्युक्तं। विषयोपलक्षणार्थमवग्रहात्। अवग्रहसमाणाद्यथा स्यात् अनवग्रहसमाणात्पदांतान्मा भूत् अपदांते चावग्रहो ना
स्ति॥ ॥श्री४॥ ॥

त्यासावत्रग्रहश्च ऋदवग्रहः ऋकारांतोदवग्रहात्पूर्वपदादितिति स्त्रोपि समानाधिकरणाः पंचम्यः तत्र ऋकारमात्रस्य पूर्वपदस्यासं
भवादृकारेणान्तर्वर्त्तविधिः अवग्रहणभूतोपन्न ऋकारः नदंताद्दितिसंहिताधिकारात् संहिताकालएतेषां णत्वं पदकाले चावग्रहः क्रिय
तेते नावग्रहणोपलादृकारोवग्रह इत्युक्तः न तु तद्दशापन्नः तथा चावग्रहं दर्शयता णत्वं न प्रयुक्तं। अनवग्रहसमाणादिति अनवग्रह गोपा
दित्यर्थः। अपदादिति पदे ह्यवग्रहः क्रियते यद्मत्र विच्छिद्य इति निदर्शनाय॥ ॥

राम०

।।नश्च।। ।।धातोरिति ष्ठतीति धातुस्थो रेफः षकारश्च। उदाहरणं च इति कृतषत्वस्य सुञो ग्रहणं नमभीवडवचनस्य तेन इंद्रो ध
नीगृहेषु नः इत्यत्र न भवति नमितिनासिकादेशस्यासमस्तादेशस्य च साम्यामेन ग्रहणं तन्नीत्रास्मदादेशश्च एव कार्यान्तस्येव धातु
स्थाविप्यः परस्य संभवात उत्तरसूत्रे तद्भयोः कार्यित्वं। रक्षाणामिति। रक्षेति लोण्मध्यमपुरुषे कवचनांतं घ्नो ताभिरु। इति दीर्घः।।शि
क्षाणामिति शिक्षतिदानिकर्मा छंदसि उरुणस्कृधीतिर कृञो लोट् सेर्हिः श्रुशृणुपृकृवृभ्यश्छंदसीति हेर्धिरादेशः ककरस्थितस्य

।।नश्चधातुस्थोरुषुभ्यः।। ।।नस इत्येतस्य नकारस्य धातुस्थान्निमित्तादुत्तरस्य उरुशब्दात् षुशब्दाच्चोत्तर
स्य णकारादेशो भवति छंदसि विषये। धातुस्थात्। अग्ने रक्षाणः। शिक्षाणो अस्मिन्। उरुशब्दात्। उरुणस्कृ
धि। षुशब्दात्। अभीषुणः सखीनां। ऊर्ध्व ऊ षुण ऊतये। अस्मदादेशो नस् शब्दो बहुवचनस्य वस्नसावि
ति। ।।उपसर्गाद्बहुलं।। ।।उपसर्गस्थान्निमित्तादुत्तरस्य नसो नकारस्य बहुलं णकारादेशो भवति। प्र
णः शूद्रः। प्रणासः। प्रणो राजा। न च भवति प्रनो मुंचतं। बहुलग्रहणादाख्यातमपि भवति। प्रणसंमुखं

विसर्जनीयस्य षत्वं अभीषुणा इति। इकः सुञीति दीर्घः एवमूषुणा इत्यत्रापि।। ।।उपसर्गाद्बहुलं।। ।।नसंप्रति क्रियायोगाभा
वात्स्यापुपलक्षणमुपसर्गग्रहणं। प्रणा इत्यस्मादेव नसादेशः। प्रणसमिति बहुव्रीहिः उपसर्गाच्चेत्स च समासांतः नासिकाया
श्च नसभावः। उपसर्गादिनो नस इति पाठांतरं उपसर्गात्परस्य नसो नकारस्य णत्वं भवति। ओतः परस्य ओकारे वा न भवतीत्य
र्थः उभयथाप्यतिव्याप्त्यव्याप्तिसंभवाद्व्याख्यातपाठ एव पाणिनेरिति कारेणाश्रितः १०

२का॰प२०४

॥कृत्यचः॥ ॥कृत्स्थोयोनकारः अचउत्तरइत्यनेनावइतिनकारस्येदं विशेषणांनकृतइतिदर्शयतिपरिहिकृतएतद्विशेषणांस्यात्प्रायणा
मित्यादौनस्यात्तनभाभूप्रकमिणमिण्यापिवेयामित्यत्रचकम्यादीनांप्रतिषेधोनर्थकःस्यात्। अनमानेत्यादिसंभवोदाहरणप्रदर्शनप
रंनयरिणानंअस्यसंभवात्। अनइतियोरणादेशः। मानइत्यामतमुकशानजादिः तव्यदादिसूत्रविहितोनीयः। आङोशेनस्पनि:

॥कृत्यचः॥ ॥कृत्स्थोयोनकारः उत्तरस्तस्योपसर्गस्थान्निमित्तादुत्तरस्यणकारादेशोभवति। अनमानअनीयअ
निइनिनिष्ठादेशाःएतेणत्वंप्रयोजयंति। अन। प्रयाणांपरिहाणं। मान। अचइतिकिं प्रमग्नः परिभुग्नः। कृत्स्थस्यणत्वेनि
र्विण्णस्योपसंख्यानं। निर्विण्णोऽस्मिखलसंगेन॥ ॥णेर्विभाषा॥ ॥णंयन्तात्धोविहितः कृत्प्रत्ययस्तत्स्थस्यनकारस्यवि
भाषाणकारादेशोभवति। प्रयापणंप्रयापनं। परियापणंपरियापनं। प्रयाप्यमाणंप्रयाप्यमानं। प्रज्ञापनीयंप्रयाप
णीयं। अप्रयापणिः। अप्रयापनिः॥ प्रयापितेणोपरियापितेनो। विहितविशेषणंकिं प्रयाप्यमाणंप्रयाप्यमानमसि
+ रिपाणंप्रमाणंपरिमाणं। मान। प्रयायमाणंपरियायमाणं। अनीय। प्रयाणीयंपरियाणीयं। अनि। अप्रयाणिः
अपरियाणिः। इनि। प्रयायिणोपरियायिणो। निष्ठादेशःप्रहीणः परिहीणः। प्रहीणवान्। प+ सत्रयकारव्यवधाने
पिपर्यास्यादिति॥ ॥७॥ ॥७॥ ॥

सुप्पजातौणिनिः आवश्यकेचानिष्ठादेशोरदाभ्यामितिविहितः। प्रहीणइतिघुमास्थेत्यादिनाईत्वं। प्रमग्नः प्रभुग्नइतिओदितश्चे एम॰
तिनिष्ठानत्वंनिर्विण्णस्येति। अचः परः कृत्स्थोनकारोनभवतीतिवचनंतत्रपरस्यनस्यणत्वंपूर्वस्यछुत्वं॥ ॥णेर्विभाषा॥ ॥
णंयन्ताधोविहितइति। एतेनणेर्विषयस्यविहितविशेषणत्वंदर्शयतिप्रयोजनंहत्त्रावेववक्ष्यते। अपरः प्रकारः अहुगायइतिवर्त्तते
तेनणंतस्यकृतश्चाडागमेपिणत्वस्याभ्यनुज्ञानास्यन्तासरः कृदिसेवमाश्रीयमाणेपिप्रयाप्यमाणमित्यादौयकारव्यवायेपि
णत्वसिद्धिरिति॥ ॥

॥हलश्च॥ ॥प्रकोपणमिति॥ कुप क्रोधने। प्रेहणं प्रोहणमिति॥ रुहि चेष्टायां तु ह। किमर्थं अत्र इकारस्य च इति णत्वं नित्यमेव भवति। कथं पुनरस्य
इह ग्रहणे हलादिरिति लभ्यते तत आह इजुपधस्येति। इजुपधस्य हलन्तत्वाव्यभिचारात्सामर्थ्यादादिविशेषणं हलग्रहणमित्यर्थः॥ ॥इजादेः॥
॥हल इति वर्त्तत इति। प्रयोजनमुक्तं तत्रैव स्यादिति। ननु तत्रादिविशेषणं हलग्रहणं अन्तविशेषणे न चेहार्थः अत आह तेनेति। इजादेर्हला
दित्वासंभवः सामर्थ्यं प्रेरणमिति। उखि गत्यर्थः। इदित्वान्नुम्। ननु चात्रानुस्वारे कृते नायं सनुम्को भवति। काममत्र स्यान्निवृत्तिः। तेऽप्रे
तिप्रोम्भणमिति अत्र त्वादितं एव नुम् भवति। तत्र न सिध्यति ओत्सर्गिकोऽयं तत्र नकारः प्रेन्व नपि सत्र च प्राप्नोतीय तत्र नुमेवागिकृतः अस्य

वेतस्मादिहापि नुमग्रहणात्स्यात्॥ हलश्चेजुपधात्॥ ॥हलादिर्यो धातुरिजुपधस्तस्मात्कृत्स्थस्य नकारस्याच उत्तरस्य उपसर्ग
स्थान्निमित्तादुत्तरस्य विभाषा णकारादेशो भवति। प्रकोपणं प्रकोपनं। परिकोपणं परिकोपनं। हल इति किं प्रेहणं प्रोहणं। इजुप
धादिति किं प्रवपणं परिवेपणं। अच इत्येव प्रभुग्नः परिभुग्नः। इजुपधस्य सर्वस्य हलन्तत्वादिह हलग्रहणमादिविशेष
णं॥ ॥इजादेः सनुमः॥ ॥हल इति वर्त्तते तेनेह सामर्थ्यात्तदन्तविधिः। इजादेः सनुमो हलन्ताद्धातोर्विहितो यः कृत
त्तस्थस्य नकारस्योपसर्गस्थान्निमित्तादुत्तरस्य णकारादेशो भवति। प्रेङ्खणं परीङ्खणं। प्रेङ्गणं परीङ्गणं। प्रोम्भणं पर्यु
म्भणं। इदुम्भ सनुम्ग्रहणं नियमार्थं इजादेरेव सनुमो नान्यस्य प्रमेगनं परिमेगनं। हल इत्यधिकारात्संपते नित्यं विध्यर्थमेतत्र
भवति। ११ ॥
तेतस्मादिहापि नुमग्रहणमनुस्वारोपलक्षणार्थमाम्रेऽपन क्षत्र दर्शनस्यापेनेष्टविषये सर्वत्र भविष्यतीत्यनिष्टे
चन भविष्यति एवं वहुत्वो नियमार्थतोपपद्यते अस्य प्राप्रेन्वमितस्तत्र विध्यर्थता संभाव्येत। न चाहु धातुः स्मवायेपी स्येतेन सिद्धिः तत्रा
पि नुम्ग्रहणं स्यादनुस्वारोपलक्षणत्वात्। ननु कृत्यच रत्नेनैव सिद्धं नार्थोऽनेनेति अत आह सिद्धे सतीति। प्रसंग नमिति। मणिरपि गत्य
र्थ एव प्रमंक नमिति पारेमं इनार्थः ननु चकेमर्थ्यान्नियमो भवति विधेयं नास्तीति कृत्वा इह चास्ति विधेयं किं एयन्ताद्विभाषा प्राप्ता
तत्र नित्यं णत्वं विधेयमत आह। हल इत्यधिकारादिति। ननु णिलोपे कृते एवं सनोपि हलन्तो भवति ततः किं मर्त्यपि हलधिकारे
विध्यर्थता संभवति। नेतरास्ति विहितविशेषणस्याश्रयणात् एतदेव स्वभिप्रेत्य कृत्कारेणोक्तं हलन्ताद्धातोर्विहितस्येति ११

४ का. प८. ४

॥वानिंस॥ ॥णिसिंबुं बनेणाक्षरोषेषणिरिकुत्सायां णोपदेशत्वादितेषां निसेणत्वे प्राप्ते विकल्पः॥ ॥नभाभू॥ ॥प्रग्रहणो नपूजोग्रह
णार्थं स्वमितिरिष्टिरेवेयं। णयंतानां चेति। णपंतस्य प्रग्रात्वंतरत्वान्न प्राप्नोतीति वचनं। किंच णपंते घस्य प्रवृत्तोपक्षेऽनुवादरूपेषप्रसंगः णोर्वि
भाषे सेवपक्षे निर्हिन्नैः सिद्धात्वात्॥ ॥षात्पदांतात्॥ ॥निष्पानं दुष्पानमिति। इदुदुपधस्य चेति विसर्जनीयस्य षत्वं। अत्र हृत्स्व
इतिप्रसंगः। सर्पिष्पानमिति कर्मणि षष्ठ्याः समासः। यजुष्पानमिति कर्तृकरणे कृता बहुलमिति समासः। उभयत्रापि नित्यं समासे

॥वानिंसनिक्षनिंदां॥ निंसनिक्षनिंदइत्येतेषां नकारस्योपसर्गस्थान्निमित्तादुत्तरस्य वा णकारादेशो भवति। प्रणिंस
नं प्रनिंसनं। प्रणिक्षणं प्रनिक्षणं। प्रणिंदनं प्रनिंदनं॥ ॥नभाभूपूकमिगमिप्यायिवेपां॥ भाभूपूकमिगमिप्यायिवे
पइत्येतेषां उपसर्गस्थान्निमित्तादुत्तरस्य कृत्स्थनकारस्य णकारादेशो न भवति। भा। प्रभानं परिभानं। भू। प्रभवनं प
रिभवनं। पू। प्रपवनं परिपवनं। पूञ्ग्रहणो पूञ्ग्रहणं द्रष्टव्यं। पूङोहि भवत्येव णत्वं प्रपवमाणः सोमस्येति। कमि। प्रक्रम
णं परिक्रमणं। गमि। प्रगमनं परिगमनं। प्यायि। प्रप्यायनं परिप्यायनं। वेप। प्रवेपनं परिवेपनं। णपंतानां च भादीनां प्रति
षेधस्योपसंख्यानं कर्तव्यं। प्रभापनं परिभापनं॥ ॥षात्पदांतात्॥ ॥षकारात्पदांतादुत्तरस्य नकारस्य णकारादेशो न भवति।
निष्पानं दुष्पानं। सर्पिष्पानं यजुष्पानं। षादिति किं। निर्णयः दुर्णयः। पदांतादिति किं। कुष्णाति पुष्णाति। पदे अंतः
पदांत इति सप्तमीसमासो न षष्ठीसमासः तेनेह न भवति सुसर्पिष्केण सुयजुष्केणेति विभाषेति कप्॥ ॥ राम०

उत्तरपदस्थस्येति षत्वं। अत्र पानं देशे वा भावकरणयोरिति प्राप्तिः। पदे अंतः इति। सप्तमीति योगविभागात्समासः। सुसर्पिष्केणेति
शोभनं सर्पिरस्येति बहुव्रीहिः कप्रत्ययः षइति षत्वं। नापंपदे परतः पूर्वमवस्थितस्यातो भवति पदस्यत्वं तो भवति स्वादिष्विति पद
संज्ञाया विधानात् तत्र षष्ठीसमासे त्रापि प्राप्नोति। कथं पुनर्ज्ञायते सप्तमीसमासोऽयमिति अंतग्रहणात् अन्यथा वर्णग्रह

॥नशेः॥ ॥प्रनष्ट इति मक्षिन शोऽशलीत्वात् तस्य नुमो निरिहिता मितिनलोपः अश्वादिषत्वं। नशेरशः अशकारात् तस्य नशेरिति कृत्वं
नतु षां तस्येति रूपा पिपथास्यात्मनं स्पतीति षरोः कुः मीति कृत्वे भवति तत्र हित्तथा वक्तमं नेसाह। अंत ग्रहणामिति। षकारेण नशेर्वि
शेषणात् सांतस्येति सिद्धे पुनरंतग्रहणसामर्थ्याघः संप्रतिषांतोयश्च भूतपूर्वस्तस्य सर्वस्य भवति प्रतिषेधः॥ ॥पदांतस्य॥ हेकुरि
न्निसाध्यमुदाहरणं॥ ॥पदव्यवायेपि॥ ॥माषकुंभवामेनेति। अत्र केचिदाहुः यदा माषाणां कुंभो माषकुंभः तस्य वाय इति अ

नशेः षांतस्य॥ ॥नशेः षकारांतस्य णकारादेशो न भवति। प्रनष्टः परिनष्टः। षांतस्येति किं। प्रणश्यति परिणश्यति।
अंतग्रहणं षांतभूतपूर्वस्यापि यथा स्यात् प्रनंक्ष्यति परिनंक्ष्यति॥ ॥पदांतस्य॥ ॥पदांतो यो नकारस्तस्य णकारादेशो न
भवति। वृक्षान् प्लक्षान्। गिरीन् अरीन्॥ ॥पदव्यवायेपि॥ ॥पदेन व्यवायः पदव्यवायः पदव्यवधानं पदेन व्यवाये सति
निमित्तनिमित्तिनोर्नकारस्य णकारो न भवति। माषकुंभवापेन चतुरंगयोगेन। प्रावनद्धं। पर्यवनद्धं। प्रगान्नयामः य
रिगान्नयामः। पदव्यवाये तद्धितेइतिवक्तव्यं। इहमाभूत् आर्द्रगोमयेण। शुष्कगोमयेण। स्वादौ पूर्वं पदमिति गिशो
शब्दः पदं तेन व्यवायः॥ १२ ॥ ॥छ॥ ॥

क्रियात दोत्तर पदत्वे चाप इत्यादि विभावितिप्रत्ययलक्षणप्रतिषेधात् पदत्वाभावान्निषेधाप्रवृत्ते भीवितव्यमेव णत्वेन तस्मात् कुंभस्य
वापः कुंभवापः माषाणां कुंभवापो माषकुंभवापः इति प्रक्रियाश्रयेणोदाहरणमिति। अत्र कुमतिचेति प्राप्तिः। प्रावणद्धमित्य
प्रगात् समासेपीत्यवशब्दव्यवायेपि अड्व्यवाय इति प्राप्तिः। प्रगान्नयाम इति छंदस्य पमवहितः प्रयोगः गामिनिरिति तीयांतेन पदेन व्य
वायः। पदव्यवायेऽतद्धित इति। योयं पदव्यवाये प्रतिषेधः स तद्धिते परे पदं तत्र न भवतीति वक्तव्यमित्यर्थः आर्द्रगोमयेणेति। गोश्चपु
रीष इति मयट् तत्र परतो गोशब्दः स्वादिविति पदं १२ ॥

॥क्षुभ्नादिषु च॥ ॥क्षुभ्नेति स्वरूपग्रहणं न धातुग्रहणं तेन क्षोभणमित्यादौ णत्वं भवत्येव क्षुभ्नीतः क्षुभ्नंतीत्यत्र लीत्वाल्लोपयोः स्थानिवद्भावादेकदेशविकृतस्यानन्यत्वाद्वा णत्वं न भवति। नृनमयतीति नृ॰ नमः नः। हरिनंदीति ताच्छीलिको णिनिः। हरिनंदनः गिरिनगरमिति षष्ठीसमासौ। नरीनृत्यत इति रीगृदुपधस्य च। तृप्नोतीति। छंदसि श्नप्रत्ययेन श्नु परिनर्त्तनं परिगहनमिति प

॥क्षुभ्नादिषु च॥ ॥नेति वर्त्तते। क्षुभ्ना इत्येवमादिषु च नकारस्य णकारादेशो न भवति। क्षुभ्नाति। अत्र णादेशस्यास्याभिक्ज्ञावादिहाविप्रतिषेधो भवति क्षुभ्नीतः क्षुभ्नंति। नृनमनः। पूर्वपदात्संज्ञायामिति प्राप्तिः श्नुभ्नं रसद्व्यग्रहादिति ग प्राप्नोति। नंदिन्। नंदन। नगर। एतान्युत्तरपदानि संज्ञायां प्रयोजयंति। हरिनंदी। हरिनंदनः। गिरिनगरं। नृतिर्यङि प्रयोजयति। नरीनृत्यते। नरीनर्त्ति। तृप्नु। तृप्नोति। नर्त्तन गहन नंदन निवेश निवास अग्नि अनूप एतान्युत्तरपदानि प्रयोजयंति। परिनर्त्तनं परिगहनमिति संज्ञायां। पूर्वपदात्संज्ञायां। पूर्वपदात्संज्ञायामिति प्राप्नोति। परिनंदनमित्यत्रोपसर्गादसमासेपीति प्राप्नोति। शरनिवेशः। शरनिवासः। शराग्निः। दर्भानूप इमे ताः संज्ञाः। आचार्यादणत्वं च। आचार्यभोगीनः। आचार्यानी। तथा हायनस्य नेष्यते त्रिहायनः चतुर्हायनः कर्मार इति चोत्तरपदस्य संज्ञायां। क्षुभ्नादिराकृतिगणः। अविहितलक्षणो णत्वप्रतिषेधः क्षुभ्नादिषु द्रष्टः॥ ॥ श्री४॥ ॥छ॥ ॥

दिसमासो परिनंदनमिति गतिसमासः। शरनिवेशादयो दर्भानूपांताः षष्ठीसमासाः। आचार्यभोगीनः आचार्यानीति अत्रैवास्य प्रतिषेधः आचार्येण आचार्याणामित्यादौ तु भवत्येव। क्षुभ्नातिराकृतिगण इति चकारोनुक्तसमुच्चयार्थ एतमेवार्थं सूचयति॥ ॥छ॥ ॥ राम०

॥स्तोःश्चुनाश्चुः॥ ॥अत्रसंनिपातश्चसंधाहार्योवृक्षः शेतइति। वाशरीतिपक्षेविसर्जनीयस्यसकारः। मज्जतीतिमलांनत्र्यस
शीतिसकारस्यदकारकृतेतस्यचुत्वेजकारः अस्मिन्सूत्रेपुनःश्चुत्वंनभवतिनमुनःस्त्रत्रेनेतियोगविभागात्तथाचमज्जतीनां
ङ्नीतितिनिर्दिशन्तपद्यते। इहसकारतवर्गयोःशिरोद्दीनिमित्तेअपिदेएवशकारचवर्गेतितत्रश्चसाम्यान्तसंख्यातानुदेशः।प्र

॥स्तोःश्चुनाश्चुः॥ ॥सकारतवर्गयोःशकारचवर्गाभ्यांसंनिपातेशकारचवर्गवादेशोभवतः।स्तोःश्चुनेति
यथासंख्यमत्रनेष्यतेसकारस्यशकारेणचवर्गेणचद्वाभ्यामपिसंनिपातेशकारोभवति।तवर्गस्यापिशकारेण
चवर्गोभवति।आदेशोनुयथासंख्यमिष्यते।सकारस्यशकारःतवर्गस्यचवर्गइति।सकारस्यशकारेणसंनिपाते।
वृक्षश्शेतेप्लक्षश्शेते।सकारस्यचवर्गेण।वृक्षश्चिनोतिप्लक्षश्चिनोति।वृक्षश्छादयतिप्लक्षश्छादयति।तवर्गस्यश
कारेणअग्निचिच्छेते।सोमसुच्छेते।तवर्गस्यचवर्गेण।अग्निचिच्चिनोति।सोमसुच्चिनोति।अग्निचिच्छादयति।
सोमसुच्छादयति।अग्निचिज्जयतिसोमसुज्जयति।अग्निचिञ्‌ञकारः।अग्निचिञकारः सोमसुञकारः।मस्जेः।
मज्जति।भ्रस्जेः।भृज्जति।व्रश्चेः।वृश्चति।स्तोः श्चावितिसप्तमीनिर्देशोनकृतः पूर्वेणापरेणश्चुनासंनिपातेश्चुत्वंय
थास्यादित्येवमर्थंतः।याच्ञेर्याञ्चा।शादितिप्रतिषेधोज्ञापकमत्रसंख्यातानुदेशाभावस्य॥ ॥ष्टुनाष्टुः॥ ॥स्तोरिति
वर्तते सकारतवर्गयोः षकारटवर्गाभ्यांसंनिपातेषकारटवर्गावादेशौभवतः।सकारस्यषकारेण।वृक्षष्षण्डेप्लक्षष्षण्डे
ते।सकारस्यटवर्गेण।वृक्षष्टीकते।प्लक्षष्टीकते।वृक्षष्टकारः प्लक्षष्टकारः।तवर्गस्यषकारेण।पेष्टा पेष्टुं पेष्टव्यं॥
क्षषीष्टाः।तवर्गस्यटवर्गेण।अग्निचिट्टीकतेसोमसुट्टीकते।अग्निचिट्टकारः सोमसुट्टकारः।अग्निचिड्डीनः सोम
सुड्डीनः।अग्निचिड्ढौकतेसोमसुड्ढौकते।अग्निचिण्णकारः सोमसुण्णकारः।अतट्।अट्टति।अ
तोतीत्याशंक्याह शादितिप्रतिषेधइति।श्चुनेतितृतीयानिर्देशः सर्वभूतेनापियोगेयथास्यादित्यतः पाश्चेतिसप्तमीनिर्देशे तु
तस्मिन्नितिनिर्दिष्टेपूर्वस्येतिपरभूतेनैवयोगेस्यात्॥ ॥एनाष्टुः॥ ॥अट्टतीत्यादिअतटअतिक्रमणादिंसपोः अटटअभि
योगेतकारटकारयोपयोरेनसंयोगापाठः।किंतत्वयोगातैतापेक्षतेतकारटकारयोः अवणार्थः नन्द्राः संयोगादयइतिप्रतिषेधो

॥ १३ ॥ ॥

ष्टु नेभवति। रहापितृतीयानिर्देशः पूर्वभूतेनापियोगेष्टुत्वंयथास्या
त्पष्टाष्टेठेति अत्रापि तोः षीतिप्रतिषेधान्निमित्तनिमित्तयोः संख्या
तानुदेशोनभवति॥ १३ ॥

१ का·प·४

॥नपदांतात॥ ॥अनामितिषष्ठीबहुवचनस्यानान्तनुर्ह्रस्वप्रतिषेधः श्वलिट्सायइतिधुउभावपक्षेसकारस्यष्टुत्वंप्राप्नोतिधुट्
पक्षेतुचत्वस्यासिद्धत्वात्तस्यैवधकारस्येति। ईट्टिरितिईडस्तुतौअदादिरितुदादिर्नेता। षडधिकानवतिः षण्णवतिः षण्णांनगराणांसमा
हारः षण्णगरी॥ ॥तोःषि॥ ॥षीतिसप्तमीनिर्देशात्सर्वभूतेनसंनिपातेभवत्येवलोपष्ठायषेष्टेति॥ ॥शात॥ ॥प्रश्नः विश्नइतिप
ज्याचेत्याहिनानट् स्तोः श्चुडनुनासिकेचेतिच्छकारस्यशकारः। सर्वैविधयश्छंदसिविकल्प्यन्तइतिनैत्रिपक्षेवायंप्रतिषेधोभव ॥

॥नपदांताट्टोरनां॥ ॥पदांताट्टोरनां॥ ॥पदांताट्टवर्गादुत्तरस्यस्तोर्नाम्वर्जितस्यष्टुर्नभवति। श्वलिट्साये ॥
मधुलिट्तरति। पदांतादितिकिं ईडस्तुतौ। ईट्टे। टोरितिकिं सर्पिष्टमं। अनामितिकिं। षण्णां। अत्यल्पमिदमुच्यते
अनाम्नवतिनगरीणामितिवक्तव्यं। षण्णवतिः षण्णगरी॥ ॥तोःषि॥ ॥तवर्गस्यषकारेपरेयदुक्तं तन्नभवति।
अग्निचित्षंडे। सोमसुत्षंडे। भवान्षंडे। महान्षंडो॥ ॥शात॥ ॥तोरिति॥ वर्त्तते। शकारादुत्तरस्यतवर्गस्ययदुक्तं
तन्नभवति। प्रश्नः विश्नः॥ ॥यरोनुनासिकेनुनासिकोवा॥ ॥यरः पदांतस्यानुनासिकेपरतोनुनासिकादेशोवा
भवति। वाङ्नयनं। वाग्नयनं। श्वलिण्नयति श्वलिड्नयति। अग्निचिन्नयति अग्निचिद्नयति। त्रिष्टुम्नयति त्रिष्टुब्नयति।
पदांतस्येत्येवपेद्यि। क्षुभ्नाति। परोनुनासिकेप्रत्यये भाषायांनित्यवचनंकर्त्तव्यं। वाङ्मयं। अम्मयं। व्यवस्थितविभाषावि
ज्ञानात्सिद्धं॥ ॥अचोरहाभ्यांद्वे॥ ॥अचउत्तरौयौरेफहकारौताभ्यामुत्तरस्ययरोद्वेभवतः। अर्क्कः। मर्क्कः। ब्रह्म्मा।
अपह्नुते। अचरति। किं अते। मलयति॥ ॥ २००

तिस्रपोश्वातितत्रापिकाठकेभवत्येवब्रह्मचारिणोपश्मान। प्रोव्यप्रतिघायाः। स्ताध्मायत्राहरणीचा। सकल्लंभद्रमश्नुते॥ ॥यरोनु॥
॥पदांतादित्यनुवर्त्तनेषष्ठ्योन्तंविपरिणाम्यते· वाङ्· पतिमित्यनिर्त्यं ह्रद्दशरादिभ्यइतिमयट्॥ ॥अचोर॥ ॥अर्धपतेर्वर्जकुलंअ
र्क्कः मर्क्किः सौत्रोधातुधाः तस्मादिणभाकापाशल्पतिमर्चिभ्यः कनचोः कुरितिकुल्लं· मर्क्कः अत्राकारादनन्तरोरेफः तस्मादपि
ककारः एवमुत्तरेष्वपिद्रष्टव्यम्॥

॥अनिचिवा॥ ॥अनन्यस्येति॰ अत्रोमोनच॰ स्यपरोयस्मात्सोनन्यरः अनेनपर्युदासोदर्शितः किंप्रयोजनंननकिंचित्प्रत्युतदोषए
वअवसानेनसिद्ध्यतिवा क्रुअचसदृशस्यवर्णांतरस्याभावात्प्रतिपत्तिगौरवप्रसंगात्पर्युदासआश्रितः पक्षांतरेहिविशेषप्रति
षेधात्सामान्येनविधिरनुमेयः स्यादितिगौरवं॥ उल्कावल्मीकइति॥ लकारोपरणकारमकारौयमौ॥ स्थालीतिसकारः शरायका
रः खय॥ वत्साद्दिषुतकारककारयकाराः खयः सकारषकारौशरौ॥ अवसानइति॥ पर्युदासाश्रयणादिदमारब्धं प्रसज्यप्रतिषे

अनचिच॥ ॥अचोयरइतिचवर्त्तते॥ अचउत्तरस्ययरोनचपरस्यद्वेभवतः दध्यत्रमद्ध्वत्र॥ अचइत्येवास्मिनंस्तांताप
णोमयोद्वेभवतइतिवक्तव्यं॥ केचित्तुयणइतिपंचमीमयइतिषष्ठीतिव्याचक्षते तेषामुल्कावल्मीकइत्युदाहरणं
॥अपरेतुयणइतिषष्ठीमयइतिपंचमी तेषांदध्यत्रमध्वत्रेत्युदाहरणं॥ शरः खयोद्वेभवतइतिवक्तव्यं॥ अत्रापियदि
शरइतिपंचमीखयइतिषष्ठी स्थ्याली स्थ्यालीत्युदाहरणं॥ अथवाशरइतिषष्ठीखयइतिपंचमी वत्सः क्षीरं॥ अप्स
राइत्युदाहरणं॥ अवसानेयरोवाद्वेभवतइतिवक्तव्यं॥ वाक्क् वाक्॥ त्वक्क् त्वक्॥ ॥नादिन्याक्रोशेपुत्रस्य॥ ॥आदि
निपरतः आक्रोशेगम्यमानेपुत्रशब्दस्यनद्वेभवतः॥ पुत्रादिनीत्वमसिपापे॥ आक्रोशइतिकिं तत्वकथनेद्विर्वचनंभ
वत्येव॥ पुत्रानत्तीतिपुत्रादिनीशिशुमारी॥ तत्परेचेतिवक्तव्यं॥ पुत्रपुत्रादिनी॥ वाहतजग्धयरइतिवक्तव्यं॥ पुत्रहती॥ पु
त्रजग्धी॥ खयोद्वितीयाः शरियौष्कर सादेः॥ खयो द्वितीया भवंति शरि परतः यौष्करसादेराचार्यस्यमतेन॥ तकारस्यथका
रः वथ्सः॥ ककारस्यखकारः अख्षरं॥ पकारस्यफकारः अफ्सराः १४ ॥

॥अनिचिवा॥ ॥अनन्यस्येति अनुप्रासाश्रयणाद्धेत्यविकारान्तिसद्धं॥ ॥नादिन्या॥ ॥पुत्रादिनीति॥ ताच्छील्येणिनिः॥ तत्परेचेति॥ सत्रादिनी
चेत्पुरस्यनिमित्तस्यानाश्रयणाद्वेत्यविकारान्तिसद्धं॥ तत्रापिपरतः पुत्रशब्दस्यद्विर्वचनंनभवति पुत्राश्चपौत्राश्च पुत्रापौत्राः तानत्तुंशीलमस्याः पुत्रपौत्रादिनी॥ अ
शब्दोयस्मात्परः तत्रापिपरतः पुत्रशब्दस्यद्विर्वचनंनभवति पुत्राश्चपौत्राश्च पुत्रपौत्राः तानत्तुंशीलमस्याः पुत्रपौत्रादिनी॥ अ
न्येतुतत्परेपुत्रशब्दइतिव्याचक्षाणाः पुत्रपुत्रादिनीत्युदाहरंति तत्रपुत्रमत्तीति विग्रहः॥ वाहतजग्धयरइति हतजग्धंच तत्परंचे
तिविशेषणसमासः राजदंतादित्वात्परशब्दस्यपरनिपातः॥ पुत्रहतीति पुत्रो हतोनयेतिबहुव्रीहिः अस्वांगपूर्वपदाद्वेति ङीष् मन

॥शरोचि॥ ॥आदर्शइति। शोरधिकारोऽवज दर्शइति अत्राप्यधिकरणेऽवज विपरीतलक्षणा चेयं न दृश्यते स्मिंश्चं दृश्मा इति दृश्य
ति॥ ॥त्रिप्रभृतिषु॥ ॥इंद्र इत्यत्र नकारदकारयोर्द्विर्वचनाभावः। आष्ट्रमिति दीर्घादाचार्याणामिसस्यासिद्धत्वात्त्रिप्रभृतिष्वय
मेव प्रतिषेधो भवतीति मन्यते॥ ॥सर्वत्र॥ ॥अत्रिप्रभृत्यर्थीयमारंभः॥ ॥दीर्घात्॥ ॥दात्रमित्यादावनचि चेति प्राप्तिः सलां॥
॥उदाहरणेषु भघयानांबागदः॥ ॥अभ्यासे॥ ॥चिखनिषतीति खनेः सन्द्विर्वचनं कुहोश्चुरिति चुत्वे छकारः तस्य चकारः
चैच

॥शरोचि॥ ॥शरोचि परतो न द्वे भवतः। कर्षति। वर्षति। आदर्शः। दर्शः॥ ॥त्रिप्रभृतिषु शाकटायनस्य॥ ॥त्रिप्रभृ
तिषु वर्णेषु शाकटायनस्याचार्यस्य मतेन न द्वे भवतः। इन्द्रः। चन्द्रः। राष्ट्रं॥ ॥सर्वत्र शाकल्यस्य॥ ॥सर्वत्र शाकल्यस्या
चार्यस्य मतेन न द्वे भवतः। अर्कः। मर्कः। ब्रह्मा। अपह्नुते॥ ॥दीर्घादाचार्याणां॥ ॥दीर्घादुत्तरस्य आचार्याणां मतेन
न द्वे भवतः। दात्रं। पात्रं। सूत्रं। मूत्रं॥ ॥झलां जश् झशि॥ ॥झलां स्थाने जशो भवंति झशि परतः। लब्धा। लब्धुं। लब्धव्यं।
दोग्धा। दोग्धुं। दोग्धव्यं। बोद्धा। बोद्धुं। बोद्धव्यं। झशीति किं। दत्तः। दत्थः॥ ॥अभ्यासे चर्च॥ ॥अभ्यासे वर्त्तमानानां झलां
चर् आदेशो भवंति चकाराज्जश्च। चिखनिषति चिच्छित्सति। टिठकारयिषति। तिष्ठासति। पिफकारयिषति। बुभूष
ति। जिघत्सति। डुढौकिषते। प्रकृतिचरां प्रकृतिचरो भवंति। चिचीषति। टिटीकिषते। तितनिषति। प्रकृतिजशां प्रकृतिज
शश्च भवंति। जिजनिषति। बुबुधे। ददौ। डिड्ये॥ ॥खरि च॥ ॥खरि च परतो झलां चरो भवंति। जश्ग्रहणं नानुवर्त्तते पूर्व
सूत्रे चानुकृष्टत्वात्। भेत्ता। भेत्तुं। भेत्तव्यं। युयुत्सते। आरिप्सते। आलिप्सते॥ ॥

ठकारस्माच्छ इति णिचि टिलोपः सन्ठकारस्य टकारः। तिष्ठासतीति शर्पूर्वाः खय इति थकारस्य शेषः तस्य च तकारः। प्रकृतिचरां
ढकारस्मात् इति णिचि टिलोपः सन्ढकारस्य डकारः। तिष्ठासतीति शर्पूर्वाः खय इति थकारस्य शेषः तस्य च तकारः। प्रकृतिचरां
प्रकृतिचर इति जश्त्व बाधनार्थं पर्जन्यवल्लक्षणप्रवृत्तावुक्ति स्यात्। स्थानिनः भिन्नरूपा भवंतीत्यर्थः। एतच्चांतरतमपरिभा
षया लभ्यते। प्रकृतिजशां प्रकृतिजश इति व्याख्यातं। डिड्ये इति डीङो लिटि द्विर्वचने एरनेकाच इति यण्॥ ॥खरि च॥ ॥युयुत्सत
इति युधेः सन्धकारस्य तकारः। आरिप्सते आलिप्सत इति रभिलभ्योः सनि मीमा इत्यादिना अत इस्सको संयोगाद्योरिति सलोपः

१४५०

।।वावा।। ।।सलांजशांतरतिनिसेजश्चेप्राप्तेचर्त्वविधीयतेवावचनात्सश्चेसोपिभवति।। ।।अणो।। ।।अणइतिपूर्वेणाणकारोप्र
त्याहारः अग्नीवायुइति। ॠॡटेदितिग्रहसंज्ञा।। ।।अनुस्वारः।। ।।शंकितेत्यादि। शंकिशंकायां उछिउंछे कुडिदाहे टुनदिसमृद्धौ क
पिचलने इदितांनुमनश्चापदांतस्यझलीसनुस्वारः तस्यककारादिषुपरतोयथासंख्यंपसवर्णवर्गपंचमाङकारादयः। कुर्वंतिह

।।वावसाने।। ।।अवसानेशलांचरौवाभवंति। वाक वाग। त्वक त्वग। त्वकत्वग। अश्वलिट् अश्वलिड्। त्रिष्टुप त्रिष्टुब्
।। ।।अणोप्रगृह्यस्यानुनासिकः।। ।।अणोप्रगृह्यसंज्ञकस्यावसानेनुनासिकादेशोवाभवति। दधिं दधि। मधुं
मधु। कुमारीं कुमारी। अणइतिकिं कर्तृ हर्तृ। अप्रगृह्यस्येति। किं अग्नीवायू।। ।।अनुस्वारस्ययपियरसवर्णः।। ।।अ
नुस्वारस्ययपिपरतः परसवर्णादेशोभवति। शङ्किता शङ्कितुं शङ्कितव्यं। उञ्छिता उञ्छितुं। गञ्छितव्यं। कुण्डि
ता कुण्डितुं कुण्डितव्यं। नन्दिता नन्दितुं नन्दितव्यं। कम्पिता कम्पितुं कम्पितव्यं। इहकुर्वंति हुर्वंति णत्वस्यासिद्धत्वात्स
र्वेन्कारस्यानुस्वारः क्रियतेतस्यापिपरसवर्णोनपुनर्नकारएवतस्याप्यसिद्धत्वात्पुनर्णत्वंनभवतिएवमनुस्वारीभू
तोणत्वमतिक्रामतीति। यथीतिकिं। आक्रंस्यते। आक्रंसते।। ।।वापदांतस्य।। ।।पदांतस्यानुस्वारस्ययपिपरतो
वापरसवर्णादेशोभवति। तङ्कथञ्चित्रपक्षत्यपमानन्नमस्यम्पुरुषोवधीत्। तंकथंचित्रपक्षंत्यमानंनमस्यंपुरु
षोवधीत।। १५ ।।छ।। ।।
षंनीत्यत्रक्षेरंतादेशेनकारस्यणत्वंप्राप्नोतितत्कस्मान्नभवतीत्याह। इहेति। णत्वमनुस्वारात्पूर्वंनभवतियस्मात्सत्वस्यासिद्धत्वात्स
र्वेमनुस्वारएवक्रियते। पश्चादपिनभवतिअनुस्वारस्यानिकस्मात्परसवर्णस्यणत्वेकर्तव्येअसिद्धत्वात्। परसवर्णेनिति।
परसवर्णार्थेनशास्त्रेणेत्यर्थः। एवमित्यादि। अनुस्वारीभूतोणत्वमतिक्रामतीतिभाष्येयदुक्तंतदेवमुक्तप्रकारेणेत्यर्थः।। ।।
वापदांत।। ।।तंकथमित्यादिककारादिषुपरतोङकारादयः क्रमेणभवंति १५

॥ ॥तोर्लि॥ ॥अत्र तकारस्य शुद्धो लकारः नकारस्य सानुनासिकः॥ ॥उदः स्थास्तम्भोः॥ ॥परसवर्ण इति समस्तमपि सवर्णग्रह-
णमिह निष्कृष्य संबध्यते। उत्थानेति। सकारस्य पूर्वसवर्णस्तकारः। अन्ये तु बाह्यप्रयत्नसाम्यात् थकारमिच्छन्ति तत्र थकाद्
पस्य श्रवणं न च पूर्वस्य चर्त्वे तत्र कर्तव्ये स पूर्वसवर्णस्यासिद्धत्वात्। रोगे चेति वक्तव्यमिति। इदमविशेषेण छन्दसि भाषायां

॥तोर्लि॥ ॥तवर्गस्य लकारे परतः परसवर्णादेशो भवति। अग्निचिल्लुनाति। सोमसुल्लुनाति। महाल्लुनाति भ-
वाल्लुनाति॥ ॥उदः स्थास्तम्भोः पूर्वस्य॥ ॥उदादुत्तरयोः स्थास्तम्भ्योः पूर्वसवर्णादेशो भवति। उत्थाता। उत्था-
तुं उत्थातव्यं। उत्तंभिता। उत्तंभितव्यं। स्थास्तंभोरिति किं उत्स्नातः उत्सितः। उदः पूर्वत्वे स्कंदेश्छन्दस्युपसंख्यानं कर्तव्यं।
अग्ने दूरमुत्कंदः। रोगे चेति वक्तव्यं। उत्कंदको नाम रोगः। कंदतेर्वा धात्वंतस्यैतद्रूपं॥ ॥झयो हो ऽन्यतरस्यां॥ ॥
झय उत्तरस्य हकारस्यान्यतरस्यां पूर्वसवर्णादेशो भवति। वाग्घसति वाग्हसति। श्वलिड्ढसति श्वलिड्हसति। झय इ-
ति किं प्राङ् हसति भवान्हसति॥ ॥शश्छोऽटि॥ ॥झय उत्तरस्याटि परस्य शकारस्य छकारादेशो भवत्यन्यतरस्यां
॥वाक्छेते वाक् शेते। अग्निचिच्छेते अग्निचित् शेते। सोमसुच्छेते सोमसुत् शेते। श्वलिट्छेते श्वलिट् शेते। त्रिष्टुप्
छेते त्रिष्टुप् शेते। शश्छोऽमीति। वक्तव्यं। किं प्रयोजनं। तच्छ्लोकेन तच्छ्मश्रुणा। एवमर्थं॥

चा॥ ॥झयो हो॥ ॥उदाहरणेषु हकारस्य महाप्राणस्य सोष्मणो घोषवतस्तादृश एव घकारादयश्चतुर्था भवंति॥ ॥शश्छो-
ऽटि॥ ॥शश्छोऽमीति। अटीत्यपनीयामीति वक्तव्यमित्यर्थः। तच्छ्लोकेन तच्छ्मश्रुणेत्यत्र लकारपरस्यापि शकारस्य भवति॥ राम॰

॥छ॥ ॥छ॥

ाहलोपमां॥ ॥द्वौयकाराविति। एकः संज्ञार्णासमजेसादिना विहितस्यकापः संबंधी द्वितीयोऽपद्वितीत्यपडादेउस्यक्रमजस्तृतीयइ
तिक्रमस्यानुपूर्वीततोजातः क्रमजः सपुनरनचिचेतिद्विर्वचनेनसंपादितः। तकारासरएकोयकारइति। दिसदिसदिसेस्यादिना विहितस्य
रपस्यसंबंधी द्वौयकाराविति एकोऽदितिशब्दासरस्यसंबंधी द्वितीयस्यादित्यशब्दात्। अन्नमितिभवस्यपंनकारोयम यमपरश्चनन हलःप

॥हलोयमांयमिलोपः॥ ॥हलउत्तरेषांयमांयमिपरतोलोपोभवत्यन्यतरस्यां। शय्या इत्यत्रयकारौद्वौक्रमजस्तृती
यः तत्रमध्यमस्यवालोपोभवति। शय्याशय्या। आदित्येरयस्यमादित्स इत्यत्र तकारात्परे एकोयकारोयणोमयइतिक्रम
जोद्वितीयः तत्रमध्यमस्यवालोपोभवति। आदित्योदेवतास्यस्थालीपाकस्येति आदित्य इत्यत्र द्वौयकारौक्रमजस्तृ
तीयः तत्रमध्यमस्यमध्यमयोर्वालोपोभवति। हलइतिकिं अन्नं। यमामिं किति अर्घ्यं। यमीतिकिं शार्ङ्गं॥ ॥

रः। अर्घ्यमिति। पादार्घाभ्यांचेतितादर्थ्येयत्भवत्ययंघकारोरेफाद्धलःपरोयमपरश्चनतुयम। शार्ङ्गमितिशृंगस्यविकारइत्यणाक्र
कारस्यपराद्वृद्धिः अत्रउकारोयमभवतिहलश्चपरः नतुयमपरः। ननुचबहिरंगावृद्धिस्ततःकिंहलःपरोनकारोनभवति। लोपोपि
बहिरंगोऽनेकनिमित्तापेक्षत्वात्॥ ॥छ॥ ॥

पृ. ५

झरोझरी॥ ॥त्रयस्तकारा इति। अव उपसर्गात् दा इत्याकारस्य तकारः दकारस्यापि चर्त्वे तकारः एकः प्रत्ययसंबंधी अनचि चेति द्विर्वचनेनान्यत
श्चतुर्थः। चत्वारस्तकारा इति पूर्वोक्तास्त्रयश्चतुर्थो मरुत्शब्दसंबंधी पंचमो द्विर्वचनेन संपादितः मरुच्छब्दस्योपसंख्यानसामर्थ्या
दिति। एतच्च मरुच्छब्दस्योपसंख्यानमित्यत्रैव प्रतिपादितं। शार्ङ्गमिति। भवत्ययं ङकारो हलः परः झरि सवर्णे परतः न त्वयं झरीति न लु
प्यते। प्रियपंचेति प्रियाः पंचास्येति बहुव्रीहिः वा प्रियस्येति प्रियशब्दपूर्वनिपातस्ततो तीयैकवचनं अल्लोपः नकारस्य श्चुत्वे ञका
रः भवत्ययं चकारो हलः परः स्वयं च झर् सवर्णे च परतः न तु ञकारो झरीति न लुप्यते। न तु वा अल्लोपस्य स्थानिवत्त्वादनंतरो न भव

झरो झरि सवर्णे॥ ॥हल उत्तरस्य झरो झरि सवर्णे लोपो भवत्यन्यतरस्यां। प्रत्तमवत्तमित्यत्र त्रयस्तकाराः क्रमज्ञश्चतुर्थः
तत्र मध्यमस्य मध्यमयोर्वा लोपो भवति। मरुत्त इत्यत्र चत्वारस्तकाराः क्रमज्ञः पंचमः तत्र मध्यमस्य मध्यमयोर्मध्यमानां
वा लोपो भवति। मरुच्छब्दस्य हि उपसंख्यानसामर्थ्यादच उपसर्गात्त इति तत्त्वं भवति। झर इति किं शार्ङ्गं। झरीति किं प्रि
यपञ्च्ना। अल्लोपस्य पूर्वत्रासिद्धे न स्थानिवदिति स्थानिवद्भावप्रतिषेधादत्र चकारस्य ञकारे लोपः स्यात्। सवर्ण इति
किं तर्प्ता तर्प्तुं तर्प्तव्यं। सवर्णग्रहणसामर्थ्यादिह संख्यातानुदेशो न भवति॥ १६ ॥ ॥श्री॥ ॥

ति सवर्णाः तत्किमेतन्निवृत्त्यर्थं न झरीत्यनेनैव तत्राह। अल्लोपस्येति। तर्प्तेति तृप प्रीणने इत्यस्य तकारः स्थानभेदात्सवर्णो न भवति
ननु च निमित्तानां कार्यिणां च संख्यासाम्यादिह संख्यातानुदेशे सति नैव तत्र लोपः प्राप्नोति तत्किमेतन्निवृत्त्यर्थेन सवर्णग्रहणे
नात आह। सवर्णग्रहणसामर्थ्यादिति। न हि यथासंख्ये सवर्णे झरि लोप इत्यर्थं सवर्णग्रहणं स्यात् शिंढि पिंढीति शिष्ल
विशेषणे पिष्ल संचूर्णने रुधादौ लोट् सेर्हिः श्नसोरल्लोपः हेर्धिः सलोपः झरः झशीति षकारस्य डकारः न श्चापदान्तस्य झलीत्यनु एम०
स्वारः तस्य परसवर्णो णकारः धकारस्य ष्टुत्वं ढकारः अनेन डकारस्य ढकारे लोपः १६

॥ उदात्तात्॥ ॥ गार्ग्यवात्स्ययोरिति। गर्गादिभ्यो यञ् ञित्त्वादाद्युदात्तः शेषं निघातः तस्य स्वरितः। पचतिपठतीति शसिपाव
नुदात्तो धातुस्वरः शवकारस्य स्वरितयोः प्रकरणं भवति॥ ॥ नोदात्त॥ ॥ नोदात्तस्वरितानुदययोः पस्मादिति नदुब्धी+ तत्वंति
स्वरितं रस्य स्वानं तरश्मिदं वक्रमं एवं हि स्वरितग्रहणं तकर्मत्वं भवति अत आह स्येति। यदि तत्र क्रियेत अनुदात्तं पदमे
कवर्जमित्येतन्न प्रवर्त्तेत रह तु प्रकरणे न प्रवर्त्तते स्वरितौ हि उदयशब्दः प्रत्येकमभिसंबध्यते यदाह उदात्तोदयस्येति उदयश
॥ उदात्तादनुदात्तस्य स्वरितः॥ ॥ उदात्तादुत्तरस्यानुदात्तस्य स्वरितआदेशो भवति। गार्ग्यः वात्स्यः पचति पठ
ति। अस्य स्वरितस्यासिद्धत्वादनुदात्तं पदमेकवर्जमित्येतन्न प्रवर्त्तते नोदात्तश्च भवति स्वरितश्च श्रूयते॥ ॥
॥ नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानां॥ ॥ उदात्तोदयस्य स्वरितोदयस्य वानुदात्तस्य स्वरितो न भवति।
पूर्वेण प्राप्तः प्रतिषिध्यते अगार्ग्यकाश्यपगालवानामाचार्याणां मतेन। उदात्त उदयो यस्मात्स उदात्तोदयः उ
दात्तपर इत्यर्थः। एवं स्वरितोदयः। उदात्तोदयस्तावत्। गार्ग्यस्तत्र वात्स्यस्तत्र। तत्र शब्द आद्युदात्तः तस्मिन्नुदा
त्ते परतो गार्ग्यशब्दः स्वरितो न भवति। स्वरितोदयः। गार्ग्यः क्व वात्स्यः क्व। क्व शब्दः स्वरितः तस्मिन्परतोनुदात्त
स्य स्वरितो न भवति। अगार्ग्यकाश्यपगालवानामिति किं गार्ग्यस्तत्र गार्ग्यः क्व। तेषां हि मते न स्वरितो भवत्येव। उदात्त
परस्येति वक्तव्ये उदयग्रहणं॥ ॥
दः परशब्देन समानार्थः प्रातिशाख्येषु प्रसिद्धः तत्र शब्दो लित्त्वरेणाद्युदात्तः क्व शब्दः किमो ऽदित्यत्र प्रत्ययांतस्तित् स्वरितः
॥ उदात्तस्वरितपरस्येति वक्तव्य इति एतदप्युपलक्षणं उदात्तस्वरितयोरित्येव वक्तव्यमिति इत एव परशब्दार्थलाभात्॥ ॥

॥मंगलार्थमिति॥ अथशब्दोच्चारणमेव मंगलं मंगलादीनि हि शास्त्राणि प्रथंते मंगलमध्यानि मंगलांतानि च वीरपुरुषाणि च
भवंति आयुष्मत्पुरुषाणि च। इह चादौ वृद्धिशब्दो मध्ये शिवशब्दः शिवशमरिष्टस्य करे इति अंते चाभ्युदयशब्दः॥ ॥अ अ इ
ति॥ ॥एकोत्र विवृतः परः संवृतः द्वावप्यविभक्तिकौ यो विवृतः स स्थानीयः संवृतः स आदेशः किमर्थं पुनरकारस्याकारो वि
धीयते इत्यत आह इहेति। कार्यार्थमिति तत्पुनः कार्यमकारस्य दीर्घप्लुताभ्यां सवर्णसंज्ञा। अन्यथा प्रयत्नभेदान्न स्यात्तत्तन्न स्य

॥मंगलार्थे अनेकाचार्यसंकीर्तनं पूजार्थं॥ ॥अ अ इति॥ ॥एकोत्र विवृतोपरः संवृतस्तत्र विवृ
तस्य संवृतः क्रियते अकारो विवृतः संवृतो भवति। वृक्षः प्लक्षः। इह शास्त्रे कार्यार्थमकारो विवृतः प्रति
ज्ञातस्तस्य तथाभूतस्यैव प्रयोगो माभूदिति संवृतप्रत्यापत्तिरियं क्रियते॥ ॥छ॥ ॥छ॥ ॥

ह्रस्वोकारो ग्रहणमात्रेणो दीर्घप्लुतौ न गृह्णीयात् तत्र को दोषः अकः सवर्णे दीर्घः इहैव स्यात् दंडाग्रमिति इह न स्याद् दंडादकमिति
न स्यादेवमादि कार्यार्थमकार इह शास्त्रे विवृतः प्रतिज्ञायते तत्र यदीयं प्रत्यापत्तिर्न क्रियेत तदा तत्र तत्र तथाभूतस्यैव प्रयो
गः स्यात्। अत्राकारः संवृतो न भवतीति सवर्णानां ग्राहको न प्राप्नोतीति नासमानत्वाच्च न तत्र ग्रहणः संवृत उच्चारितः तद्गु
णा एवाष्टादशभेदभिन्नस्याप्यवर्णस्य प्राप्नोतीत्याशंक्याह [illegible]॥ एम०

८का·पद·४ दीर्घप्लुतयोश्चेत्तायुक्तिरेवेयं यायद्यात्तपरनिर्देशात्सिद्धं अद इति सूत्रं कर्त्तव्यं तत्र ततः परोयस्मादिति पूर्वोकारस्तपरस्तात्तर
इति द्वितीयः ततः अस्यास्यकारो दीर्घप्लुतो न ग्रहीष्यसादेशास्त्वनणापि गुणानां तरभुक्तोसत्कालान् ग्रहीष्यति। एकशेषनिर्दे
शो वायं द्रष्टव्यः तत्र षण्मात्रिका अकाराः स्थानिनो निर्दिश्यन्ते आदेशा अपि षडेव तत उभयत्रैकशेषः तत्र षसंख्या। निनों

दीर्घप्लुतयोश्चानेन विवृतेनाकारेणाग्रहणं नेष्यते तेन तयोः संवृतो न भवति। संवृतेन च सर्वगुणास्यमा
त्रिकस्याग्रहणमिष्यते तेन सर्वगुणाः प्रत्यापद्यते॥ ॥इष्ट्युपसंख्यानवती शुद्धगणा विवृतगूढसू
त्रार्था। मुसन्नहृद्यासिद्धिर्वृत्तिरियं काशिकानाम। माकरणस्य शरीरं परिनिष्ठितशास्त्रकार्यमेतावत।
शिष्टः परिकारबंधः क्रियते स्य पंथ कारेण॥ ॥इति वामनकाशिकावृत्तावष्टमाध्यायस्य तुरीयः पा
दः समाप्तश्चायमध्यायो ग्रंथश्च॥ ७७ ॥

निर्देशासामर्थ्यात्स्थानिनिर्दिष्टो दीर्घप्लुतो भिन्नकालो न गृह्येते ततश्च षसंख्यानां स्थानिनां स्थाने षडादेशाः संवृताः पथ्यासंख्यं भवंती
ति सर्वं सुस्थितिः॥ ॥इति श्रीभट्टहरदत्तमिश्रविरचितायां पदमंजर्यामष्टमस्याध्यायस्य चतुर्थः ४ पादः॥ ॥अष्टमाध्याय
श्च समाप्तश्चायं ग्रंथः॥ ७७ ॥ ॥४॥ राम०

नं. ४

कारक

